CC0. In Public Domain. Digitization by eGangotri

कृष्णदास संस्कृत सीरीज १४

श्रीकृष्णयज्वविरचिता

मीमांसापरिभाषा

'आशुबोधिनी' संस्कृत-हिन्दीव्याख्योपेता

[सटिप्पण-विमर्श-परिशिष्ट-विभूषिता]

संस्कृतव्याख्याकारः

डॉ० गजानन शास्त्री मुसलगाँवकरः

हिन्दीव्याख्याकारः

डॉ० कमलनयन शर्मा, एम० ए०, आचार्य

कृष्णदास अकादमी, वाराणसी

Dr. Urmila Sharma Collection, Varanasi.

CC0. In Public Domain, Digitizagtion by eGangotri

८'।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृष्णदास संस्कृत सीरीज

६४

महामीमांसक-
श्रीकृष्णयज्वविरचिता

मीमांसापरिभाषा

'आशुबोधिनी' संस्कृत-हिन्दीव्याख्योपेता
[सटिप्पण-विमर्श-परिशिष्ट-विभूषिता]

संस्कृतव्याख्याकारः
डॉ० गजानन शास्त्री मुसलगाँवकरः
(काशी हिन्दू वि० वि० मीमांसा धर्मशास्त्र-कर्मकाण्डविभागस्य भूतपूर्वः—अध्यक्षः)

हिन्दीव्याख्याकारः
डॉ० कमलनयन शर्मा, एम. ए., आचार्यः
(मीमांसा-न्याय-व्याकरण-वेदान्त-धर्मशास्त्र)
रीडर—केन्द्रीय सदाशिव संस्कृत विद्यापीठ, जगन्नाथपुरी।

प्राक्कथनलेखकः
पद्मभूषण-विद्यासागर—श्रीपट्टाभिरामशास्त्री

कृष्णदास अकादमी, वाराणसी
१९८७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकाशक : कृष्णदास अकादमी, वाराणसी

मुद्रक : चौखम्बा प्रेस, वाराणसी

संस्करण : प्रथम, वि० सं० २०४४

मूल्य : रू० 20/-

© कृष्णदास अकादमी

पो० बा० नं० १११८

चौक, (चित्रा सिनेमा बिल्डिंग), वाराणसी-२२१००१

(भारत)

अपरं च प्राप्तिस्थानम्

चौखम्बा संस्कृत सीरीज आफिस

के० ३७/९९, गोपाल मन्दिर लेन

पो० बा० १००८, वाराणसी-२२१००१ (भारत)

फोन : ६३१४५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

KRISHNADAS SANSKRIT SERIES

94

***

MĪMĀNSĀ PARIBHĀSHĀ

OF

MAHAMIMANSAKA

SHRI KRISHNAYAJVA

Edited With

'Ashubodhini' Sanskrit-Hindi Commentaries and Notes, Parishisth Etc.

By

Dr. Gajanan Shastri Musalgaonkar

Ex.-Prof. : Department of Mimansa, Dharmashastra & Karmakanda, B. H. U., Varanasi.

and

Dr. Kamalanayan Sharma, M.A., Acharya (Mimansa, Nyaya, Vyakaran, Vedant, Dharma Shastra)

Reader : Kendriya Sadashiva Sanskrit Vidyapith, Jagannath Puri.

Foreword By

Padmabhushan–Vidyasagar

SRI PATTABHIRAM SHASTRI

KRISHNADAS Academy

VARANASI–221001

1987

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

© KRISHNADAS ACADEMY

Oriental Publishers & Distributors

Post Box No. 1118

Chowk, (Chitra Cinema Building), Varanasi-221001

(India)

First Edition

1987

Rs. [illegible]-00

Also can be had from

Chowkhamba Sanskrit Series Office

K. 37/99, Gopal Mandir Lane

Post Box No. 1008, Varanasi-221001 (India)

Phone : 63145

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीः

यत्किञ्चित्

मीमांसादर्शनस्य मूलप्रवर्तको महर्षिर्जैमिनिरिति सर्वस्वसंवेद्यम् । परम्परया महर्षीणां चर्चागोष्ठीषु विचार्य निर्णीतानां विषयाणां सूत्ररूपेण ग्रन्थान् जग्रन्थुर्व्यासजैमिनिप्रभृतयो महर्षयः । एतेनेदं ज्ञातं भवति—यदयमस्माकं पवित्रतमो भारतदेशः विद्याविहीनः कदापि नासीदिति । 'विद्वद्भिश्शोभते देशस्तैर्विहीनस्त्वमङ्गलः' इति सिद्धान्तो भारते जनिमातस्थुष एकैकस्याप्यासीत् । आसीदित्येव वक्तव्यं भवति तादृशः कालः, न त्वस्तीति, यस्मिंश्च चिरन्तनाः स्वे स्वे कर्मणि निरताः सततं विद्याव्यसनिनः वृद्धोपसेविनश्चावर्तन्त । तदिदं भगवान् वेदपुरुष एव चित्रयति, यश्च सर्वान् लोकान् साधुषु कर्मसु प्रवर्तकः—'अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ये तत्र ब्राह्मणास्सम्मर्शिनः युक्ता आयुक्ता अलूक्षा धर्मकामास्स्युः यथा ते तेषु वर्तेरन् तथा तेषु वर्तेथाः, एष आदेशः, इति ।' अनेन सन्दर्भेणेदमभ्यूहितुं शक्यते—यदस्मच्चिरन्तनानां कर्माणि वृत्तानि चोपमानकोटौ सम्प्रवेश्य वेदपुरुष एव भारतस्य गौरवं कियदिति प्रदर्शयतीति । सत्यमेव वयं पचेलिकस्य भागधेयस्य भोक्तारः । एतादृशं सन्मानं भारतदेशोऽवापदित्यत्र किं कारणमिति जिज्ञासायां निस्सङ्कोचं वक्तव्यं भवति—यदस्माकं दर्शनप्रवर्तकानां तपोनिधीनां पुरुषकार एवेति । इमे हि तपोनिधयः विषयवैमुख्यद्वारा वैराग्यं धर्मबुद्धिं शान्तिश्चावाप्तुं दर्शनानि प्रवर्तयाम्बभूवुः । एतेषाम्—

'यच्छ्रुतं न विरागाय न धर्माय न शान्तये ।
सुबद्धमपि शब्देन काकवाशितमेव तत् ॥'

इति सिद्धान्त आसीद्ग्रन्थप्रणयनावसरे । तत्रापि पूर्वोक्तैस्त्रिभिः फलैस्सह नीत्यावर्तनं परममावश्यकमिति निर्धार्य भगवान् जैमिनिः न्यायनिबन्धनात्मकमतिविस्तृतं मीमांसादर्शनं प्रणिनाय । मीमांसाशास्त्रमिदं महासागरोऽ-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

© KRISHNADAS ACADEMY

Oriental Publishers & Distributors

Post Box No. 1118

Chowk, (Chitra Cinema Building), Varanasi-221001

(India)

First Edition

1987

Rs. [illegible]-00

Also can be had from

Chowkhamba Sanskrit Series Office

K. 37/99, Gopal Mandir Lane

Post Box No. 1008, Varanasi-221001 (India)

Phone : 63145

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीः

यत्किञ्चित्

मीमांसादर्शनस्य मूलप्रवर्तको महर्षिर्जैमिनिरिति सर्वस्वसंवेद्यम् । परम्परया महर्षीणां चर्चागोष्ठीषु विचार्य निर्णीतानां विषयाणां सूत्ररूपेण ग्रन्थान् जग्रन्थुर्व्यासजैमिनिप्रभृतयो महर्षयः । एतेनेदं ज्ञातं भवति—यदयमस्माकं पवित्रतमो भारतदेशः विद्याविहीनः कदापि नासीदिति । 'विद्वद्भिश्शोभते देशस्तैर्विहीनस्त्वमङ्गलः' इति सिद्धान्तो भारते जनिमातस्थुष एकैकस्याप्यासीत् । आसीदित्येव वक्तव्यं भवति तादृशः कालः, न त्वस्तीति, यस्मिश्च चिरन्तनाः स्वे स्वे कर्मणि निरताः सततं विद्याव्यसनिनः वृद्धोपसेविनश्चावर्तन्त । तदिदं भगवान् वेदपूरुष एव चित्रयति, यश्च सर्वान् लोकान् साधुषु कर्मसु प्रवर्तकः—'अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ये तत्र ब्राह्मणास्सम्मर्शिनः युक्ता आयुक्ता अलूक्षा धर्मकामास्स्युः यथा ते तेषु वर्तेरन् तथा तेषु वर्तेथाः, एष आदेशः, इति ।' अनेन सन्दर्भेणेदमस्यूहितुं शक्यते—यदस्मच्चिरन्तनानां कर्माणि वृत्तानि चोपमानकोटी सम्प्रवेश्य वेदपुरुष एव भारतस्य गौरवं कियदिति प्रदर्शयतीति । सत्यमेव वयं पचेलिकस्य भागधेयस्य भोक्तारः । एतादृशं सन्मानं भारतदेशोऽवापदित्यत्र किं कारणमिति जिज्ञासायां निस्सङ्कोचं वक्तव्यं भवति—यदस्माकं दर्शनप्रवर्तकानां तपोनिधीनां पुरुषकार एवेति । इमे हि तपोनिधयः विषयवैमुख्यद्वारा वैराग्यं धर्मबुद्धिं शान्तिञ्चावाप्तुं दर्शनानि प्रवर्तयाम्बभूवुः । एतेषाम्—

> 'यच्छ्रुतं न विरागाय न धर्माय न शान्तये ।
> सुबद्धमपि शब्देन काकवाशितमेव तत् ॥'

इति सिद्धान्त आसीद्ग्रन्थप्रणयनावसरे । तत्रापि पूर्वोक्तैस्त्रिभिः फलैस्सह नीत्यावर्तनं परममावश्यकमिति निर्धार्य भगवान् जैमिनिः न्यायनिबन्धनात्मकमतिविस्तृतं मीमांसादर्शनं प्रणिनाय । मीमांसाशास्त्रमिदं महासागरोऽ-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तिगभीरश्च । अत्र सर्वयं प्रविश्य तिमिङ्गला इव शबर-कुमारिल-पार्थसारथि-खण्डदेव-भवदेव-सोमेश्वर-प्रभाकर-शालिकनाथ-भवनाथ-प्रभृतयः खेलन्तः कूर्दन्तः, मिथः कृत्रिमं कलहमाचरन्तश्च शास्त्रमिदमतिविस्तृतं कृतवन्तः । अस्मिन् सागरे यूनां प्रवेशाय बृहदाकारा विविधास्तरीः कल्पयामासुः । यथा हि प्रौढाः कैवर्ता बालानां समुद्रे तरणाय लघुकायान् प्लवान् निर्माय तरणं शिक्षयन्ति, तथैव मीमांसासागरे प्रवेशाय सागरस्य तटे तरणशिक्षणाय लघुग्रन्थान् निर्माय महदुपकृतवन्तो मण्डन-माधव-कमलाकरभट्ट-प्रभृतयः । इमे हि मीमांसानुक्रमणिका-जैमिनीयन्यायमाला-न्यायप्रकाशार्थसङ्ग्रह-मीमांसा-शास्त्रमालाप्रभृतीन् लघूनपि सारभूतान् ग्रन्थान् प्रणीय मीमांसासाहित्यस्य कुक्षिमुदबृंहितवन्तः ।

एतेष्वेव श्रीकृष्णयज्वाऽन्तर्भूतस्सन् नाम्ना 'मीमांसापरिभाषां' निर्माय नितान्तमुपकृतवान् । अत्र यावतां पदार्थानां ज्ञानेन मीमांसान्यायेषु प्रवेशस्सुकरो भवेत् तावतां पदार्थानां निरूपणं ग्रन्थकृता कृतम् । आकारेण लघुरयं ग्रन्थः, किन्तु विषयातिशयेन संयुतः । तत्र तत्र विवरणसापेक्षास्सन्ति विषयाः । तेषां प्रामाणिकं विवरणं यथायथं मत्सुहृन्मणिना मुसलगांवकरोपाह्वेन पं० श्रीगजाननशास्त्रिणा स्वीयव्याख्यायाम् 'आशुबोधिन्याम्' कृतमिति नितरां प्रसीदामि, प्रार्थये चोमारमणम्—मन्मित्रवराय व्याख्यात्रे पण्डिताग्रगण्याय श्रेयः प्रेयश्च प्रदातुम् ॥

वाराणसी
२५–५–८७

पट्टाभिरामशास्त्री

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ श्रीहरिः शरणम् ॥

प्रास्ताविकम्

भगवतो मायामयमिदं चराचरं जगद् यदस्माभिर्दरीदृश्यते, तस्य प्रतिष्ठायाः परमं निदानं धर्म एवेति समस्वरं जोघुष्यतेऽखिलेष्वपि श्रुति-स्मृतीतिहास-पुराणप्रमुखेषु प्राचीनप्रबन्धेषु। तथा च भगवानाम्नायः "धर्मो विश्वस्य जगतः प्रतिष्ठा" इत्यादि श्रावयति। स्मारयन्ति च निसर्गदयालवः पुरातनाः परमर्षयोऽपि "धर्माद्राज्यं धनं सौख्यमधर्मात् पापसम्भवः" इत्यादि। श्रुत्युपश्लोक्यमानयशःपटलो मनुरपि "धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः" इति उपदिशति। भगवान् वासुदेवोऽपि स्व-सुहृद्भक्तवरायार्जुनाय गीतासु नैकवारं "स्वधर्मे निधनं श्रेयः परधर्मो भयावहः" इत्याद्युपदिशति। गर्जति च पञ्चमवेदत्वेन प्रतीयमानं भारतम्पुनः "न धर्मं त्यजेज्जीवितस्यापि हेतोः" इति। अन्यच्च ये खलु श्रूयन्ते धर्मार्थकाममोक्षरूपाश्चतुर्विधाः पुरुषार्थाः परमश्रेयःसाधनत्वेन, तेष्वपि धर्मस्यैव प्राधान्यमुपश्लोक्यते। बोभूयते च स एव शिष्टानां त्रयाणां प्रापकः।

एवं सर्वत्र प्राधान्येनोपवर्ण्यमानस्य धर्मस्य स्वरूपमुपवर्णयन्ति भिन्नभिन्नया विधया शास्त्रकाराः। मीमांसकास्तावत् "चोदनालक्षणोऽर्थो धर्मः" इत्याचक्षते। जेगीयन्ते च तार्किकाः—"यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" इति। आत्मविद्याविदः "अयं हि परमो धर्मो यद् योगेनात्मदर्शनम्" इति कीर्तयन्ति। साम्प्रदायिकास्तु "आचारः परमो धर्मः" इति वर्णयन्ति। अन्ये चान्यथोपश्लोकयन्ति। शिष्टाः पुनः सर्वाणि शास्त्रीयाणि वचनानि विविच्य व्यपदिशन्ति, "इष्टप्राप्त्यनिष्टपरिहारालौकिकोपायो धर्मः" इति धर्मस्य स्वरूपम्।

धर्मोऽयं प्रवृत्तिरूपो निवृत्तिरूपश्चेति द्वैविध्यमश्नुते। उभयविधमप्येतं धर्मं श्रुतयः सबहुमानं सम्मन्वते। स च धर्मो जैवे प्रपञ्चेऽस्मिन् जातमात्रेण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मानुषेण यथावर्णमवश्यं परिपालनीयः। नैतच्च निवेदनीयं, शास्त्रसमादिष्टेन पथा परिपालित एवोभयत्र महते श्रेयसे भवति, अन्यथा हि एष प्रत्यवायप्रद एव सर्वथा भवति। तस्यान्तःस्वरूपावबोधमन्तरा तं यथावदनुष्ठातुं मतिमानपि न मनाक् प्रभवति। अन्तःस्वरूपावबोधश्च श्रुत्यर्थप्रतिपत्तिं विना न संभवति। स्वयंभुवां वेदानां चार्थावबोधपथः कामं कण्टकाक्रान्तः खलु, यतः शाखोपशाखाप्रभेदेनानन्त्याद् वेदानां, तत्र समाम्नातानां मन्त्राणां भिन्न-भिन्नाः पाठाः प्रतिभान्ति। तैः मन्त्रेषु श्रूयमाणानि वाक्यान्यन्योन्यं विरुद्धानीव अवभासन्ते। वाक्येषु श्रुताः शब्दाः पुनरनेकार्थकाः, कथञ्चैवं सति सुसञ्चरः श्रुतार्थप्रतिपत्तिमार्गो भवेत्। विज्ञायैतदव्याजकरुणासरस्वान् भगवान् मुनिसार्वभौमः श्रीमान् जैमिनिराचार्यः श्रुत्यर्थप्रतिपत्तिमार्गस्य निष्कण्टकीकरणाय पूर्वमीमांसासूत्राणि प्रणिनाय।

सूत्राणां चैतेषां यथावदर्थवैशद्यसम्पत्तये भाष्यवृत्तिवार्तिकादिरूपाणि साधनान्यनेकानि सज्जीकृतानि प्राचीनैर्महर्षिकल्पैराचार्यैः। साधनानां पुनस्तेषां याथार्थ्यं प्रकाशनाय टीका-प्रटीकादिपरम्परया प्रादुर्भूतानि मीमांसातत्त्वप्रकाशनानि दिव्यानि ग्रन्थरत्नानि। तानि च दीपयन्ति स्वीयेन महता प्रभाभरेण प्राचीननिबन्धभाण्डागारम्।

मीमांसाशास्त्रीयनिबन्धकारेषु 'प्रभाकरः, कुमारिलः, मिश्रः' इत्येषा त्रयी महती विश्रुतिङ्गता। अस्यां त्रय्यां पुनरद्ययावत् कुमारिलाचार्यमतमेव सूत्रकारमतमिव सर्वत्र सम्मान्यते. कालविपर्ययेण तावत् प्राभाकरमतं सरस्वती–प्रवाह इव विरलतरप्रचारं समनुभूयते। मिश्रमतन्तु केवलमाभाणकमधितिष्ठति।

मीमांसादर्शनमिदमशेषं वेदभागं, कर्मकाण्डप्रतिपादकमिति सम्मनुते। शास्त्रमिदं दिगन्तरालकुहरे कर्मणां प्राशस्त्यदुन्दुभिं ताडंताडमापूरयति। शास्त्रेऽस्मिन् श्रौतानां स्वर्गादिफलप्रदानामग्निहोत्रादिकर्मणामनुष्ठाने मूलभूतश्रुत्यर्थावगतये पुनरनेके नियमाः सूत्रिताः। सर्वथा सुज्ञाताः खल्वेते, वेदार्थविवेचनावसरेऽपि महदेव साहाय्यमाकलयन्ति। भिन्न-भिन्नार्थकप्रतिपादकत्वेन भासमानानि वैदिकानि वचनानि नियमानुसारेण विवेचितानि आत्मनो याथार्थ्यं प्रकाशयन्ति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मीमांसाशास्त्रे निरूपिता विषयाश्चैते—धर्मस्वरूपनिरूपणम्, विधायकानां वचनानां विनियोगः, शेषशब्दविवरणम्, क्रत्वर्थ-पुरुषार्थविचारः, क्रमविधानम्, अधिकारसम्पत्तिः, अतिदेशपरामर्शः, ऊहशब्दविवेकः, बाधाभ्युच्चयविचारः, तन्त्रावापनिरूपणम्, प्रसङ्गसङ्गतिश्चेत्यादयः। अन्तरान्तरा चान्ये उपयुक्ताः शब्दार्थविध्यर्थवादसम्बन्धादयो विषयाः सङ्गृहीताः।

अत्र शास्त्रे विवृता विषया न केवलं वैदिकेष्वेव व्यवहारेषूपयुक्ताः, अपितु राजकीयेषु सामाजिकेषु नैतिकेषु च व्यवहारेष्वपि तेषामुपयोगो बोभवीति। उक्तेष्वेतेषु व्यवहारेषु नैकोऽपि तादृशो व्यवहारो, यत्र मीमांसान्याया उपकारका न भवेयुः। किम्बहुना नैशान्तेष्वपि व्यवहारेषु उपयुज्यमानमिदं मीमांसाशास्त्रमुपकारकं स्यादित्यत्र न काऽपि विप्रतिपत्तिः। नास्तीदंविधं शास्त्रमन्यदिति शास्त्रपरिशीलिनोऽभिरूपमणयो सम्यग्वेविद्यन्ते। शास्त्रमिदं सूत्रयता भगवता मुनिपुङ्गवेन जैमिनिना अतिमात्रमुपकृतमिदं विद्वत्कुलम्।

एवं सर्वत्रोपकारकं शास्त्रमिदं साम्प्रतिकानां संस्कारकं मन्यमानानां पण्डितानां काममनादरपात्रीभवत्कञ्चित्कोणं शरणमपेक्षमाणमवीभवत्। त एते पण्डिताः, किमिदं शास्त्रं, किमत्रप्रतिपादितं, राजकीयादिसाम्प्रतिकव्यवहारेषूपकारकं भवति वेत्यादि न विवेचयन्ति। केचन पण्डितम्रुवाश्च 'शास्त्रमिदं हिंसाप्रधानं, अव्यवहार्यञ्च साम्प्रतिकेषु व्यवहारेषु' इति स्वैरं जल्पन्ति। नूनमेष कलिराजस्यैव महिमा। अहो! क्व गतं तद्भारतीयानां प्राचीनानामनन्यसाधारणं तत्त्वज्ञानविवेचनवैचक्षण्यम्? यदाकर्ण्य सारासारविचारपटवोऽपि विदेशीयास्तत्त्वजिज्ञासवो विद्वांसोऽगाधे विस्मयसागरे निमज्जन्तिस्म।

अद्यत्वे निविडमोहमूर्छितज्ञानप्रपीडितानाम्पण्डितानामपि दुरवस्थां विलोक्यैव करुणावरुणालया अस्मद् गुरुचरणाः पुण्यनामधेयाः श्रीपट्टाभिरामशास्त्रिचरणा जराजीर्णशरीरा वर्षिष्ठाः स्वीयमस्वास्थ्यमविगणय्यापि मीमांसाशास्त्रीयप्राचीनग्रन्थान् टीका-टिप्पण्यादिभिः संयोज्य सरलीकृत्य प्रकाशनद्वारेण मीमांसाशास्त्रप्रचारेऽनवरतम्परिश्राम्यन्ति। एतत्खलु मीमांसारसिकानां विदुषां सौभाग्यमेव वक्तव्यम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथेदानीं मीमांसाशास्त्रजिज्ञासूनां शास्त्ररसिकानामधिकरकमलं स्थानं लभमानो 'मीमांसापरिभाषा'ऽभिधानो लघुकायोऽपि गभीरार्थकः प्रकरणग्रन्थः, मन्ये सर्वेषां मनोमोदाय कल्पेत । ग्रन्थस्यास्य प्रणेता महामीमांसकः श्रौत-परम्परानिष्णातः 'श्रीकृष्णयज्वा' महाशयो मीमांसाशास्त्रप्रविविक्षूणां विद्यार्थिनां कल्याणकामनयेमां मीमांसापरिभाषां व्यरीरचत् । अस्य शास्त्रस्य मार्मिकान् सांकेतिकान् शब्दानर्थांश्च सुस्पष्टमवगन्तुमयमेव ग्रन्थो विशेषतया लाभप्रदोऽस्ति । अत्र च अङ्गापूर्वम्, उत्पत्त्यपूर्वं, समुदायापूर्वं, फलापूर्वं, प्रधानसमकाला प्रतिपत्तिः, प्रधानपूर्वकाला प्रतिपत्तिः, प्रधानोत्तरकाला प्रतिपत्तिः इत्यादीनि कर्माणि साङ्गानि सोदाहरणानि विवेचितानि सन्ति । विकल्पस्थले समुपतिष्ठतामष्टदोषाणां सविस्तरं विवेचनं कृतमस्ति । स्तोत्र-शस्त्रस्तोभ-साम्नां तथा कर्मभेदप्रयोजकानामभ्यास-सङ्ख्या-संज्ञा-गुण-प्रकरणादि-विषयाणां सुस्पष्टं प्रतिपादनमर्थसङ्ग्रहे मीमांसान्यायप्रकाशे चापि नोपलभ्यते, किन्तु अस्मिन् लघुकाये प्रकरणग्रन्थे इमे विषया उत्कृष्टरीत्या प्रपञ्चिताः ।

अस्य ग्रन्थस्य प्रतिपादनशैली सुबोधा भाषा च सरला हृदयावर्जिका वर्तते ।

अस्य ग्रन्थस्याध्ययनमात्रेणैव अर्थसंग्रह-न्यायप्रकाशादयो ग्रन्थाः सुखाव-बोधा भवन्ति । अतो मीमांसाशास्त्रप्रविविक्षूणां छात्राणां कल्याणकामनया चौखम्बा संस्कृत सीरीज संस्थाया अध्यक्षैः श्री विट्ठलदासमहोदयैस्तथा श्रीव्रजमोहनदासमहोदयैश्चायं प्रकरणग्रन्थो मीमांसापरिभाषाख्यः मुद्राप्य प्रकाशतां नीत इति उभावपि धन्यवादार्हौ । उभयोश्चाभ्युदयं कामयामहे इति विज्ञाप्य श्री कृष्णस्मरणमङ्गलं विधाय विरमामीति शम् ।

—गजाननशास्त्री

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

विषयानुक्रमणिका

प्रथमं प्रकरणम्

	पृष्ठ सं०		पृष्ठ सं०
मङ्गलाचरणम्	१	फलापूर्वकल्पना	३५
धर्माधर्मनिरूपणम्	११	उत्पत्त्यपूर्वकल्पना	३८
वेदद्वैविध्यम्	२०	दर्शपूर्णमासयोस्तु विशेषः	४१
ब्राह्मणवाक्यभेदाः	२२	यजिपदाश्रवणेऽपि यागविधानम्	४३
कर्मोत्पत्तिवाक्यम्	२२	लिङ्प्रत्ययाद्यभावेऽपि विधि-कल्पना	४५
गुणवाक्यम्	२३	त्रिकापूर्वाद्युत्पत्तिः	५०
फलवाक्यनिरूपणम्	२६	विधेस्त्रैविध्यम्	५३
फलाय गुणवाक्यम्	२७	अपूर्वविधिः	५४
सगुणकर्मोत्पत्तिवाक्यम्	२८	नियमविधिः	५५
सफलकर्मोत्पत्तिवाक्यम्	३०	परिसंख्याविधिः	५८
प्रयोगविधिः	३१		

द्वितीयं प्रकरणम्

श्रुत्यादिषट्प्रमाणानि	६२	लिङ्गादिप्राबल्यविचारः	७२
श्रुतिप्रमाणनिरूपणम्	६२	अङ्गताबोधकप्रमाणोपसंहारः	७५
लिङ्गप्रमाणनिरूपणम्	६३	अङ्गलक्षणप्रदर्शनम्	७६
वाक्यनिरूपणम्	६५	अङ्गद्वैविध्यम्	७८
प्रकरणनिरूपणम्	६६	सन्निपत्त्योपकारकाङ्गनिरूपणम्	७८
स्थानप्रमाणनिरूपणम्	६८	आरादुपकारकाङ्गनिरूपणम्	८०
समाख्याप्रमाणनिरूपणम्	६९	कर्मभेदविचारः	८१
श्रुतिप्राबल्यनिरूपणम्	७०	प्रतिपत्तिकर्मस्वरूपम्	८३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

	पृष्ठ सं०		पृष्ठ सं०
प्रतिपत्तिभेदाः	८६	ज्योतिष्टोमादीनां नामत्व प्रतिपादनम्	१२९
याग-होमशब्दविचारः	८८	तत्प्रख्यादिहेतुविचारः	१३२
उपयोक्ष्यमाणसंस्कारभेदाः	९३	विरुद्धत्रिकविचारः	१४०
मतान्तरेण प्रतिपत्तिलक्षणम्	९८	अर्थवादविचारः	१५७
अर्थ-गुणकर्मणोः प्राधान्यविचारः	९९	अथ मन्त्रविचारः	१६७
गुणकर्मणश्चातुर्विध्यम्	१००	परिसंख्याया दोषत्रयम्	१६७
अर्थकर्मणस्त्रैविध्यम्	१०२	विकल्पे दोषाष्टकम्	१७१
काम्यकर्मणस्त्रैविध्यम्	१०५	वेदस्य प्रामाण्यविचारः	१७७
विधिवाक्यस्य विधायकत्व-विचारः	१०८	अथ स्मृत्यादिप्रामाण्यविचारः	१७८
तत्रार्थी भावना	११०	कर्मभेदनिरूपणम्	१८३
शाब्दी भावना	११६	अथ प्रमेयादिविचारः	१९२
भावनालक्षणम्	१२७	अथ क्रमनिरूपणम्	१९६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिभाषागतानामवतरणानां

सूची

अश्रुतं हि रजतम् ।
अश्रुजं हि रजतं यो बर्हिषि ददाति पुराऽस्य संवत्सराद् गृहेरुदन्ति ।
अक्ता: शर्करा उपदधाति (तै. ब्रा. ३।१२।५) ।
अग्नये जुष्टमभिधारयामि
अग्नये त्वा जुष्टं निर्वपामि (तै. सं. १।१।४) ।
अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत् (तै. सं. २।२।२) ।
अग्निं प्रीणयति
अग्निहोत्रं जुहोति (तै. सं. १।५।९) ।
अग्निर्वा अकामयत
अग्निषु समिध आदधाति
अग्निहोत्रं जुहुयात् स्वर्गकामः (मै. सं. १।८।६) ।
अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति (तै. ब्रा. २।१।९) ।
अग्नीनादधीत (ध. प. १।१।१)
अग्नीषोमीयं पशुमालभेत (तै. सं. ६।१।११)
अतिरात्रे षोडशिनं गृह्णाति
अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेत
(तां. ब्रा. १६।८, १०।१,१)
अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति
अरुणया पिङ्गाक्ष्या एकहायन्या गवा सोमं क्रीणाति (तै. सं. ७।१।६।२) ।
असत्रं वा एतद्यदच्छन्दोमम्
आज्यभागौ यजति (तै० सं० २।६।२)
इषेत्वा (वा. सं १।१, तै. सं. १।१।१)
इमामगृभ्णन् राशनामृतस्येत्यश्वाभिधानीमादत्ते (तै. सं. ५।१।२।१)
उद्भिदा यजेत पशुकामः (तां. म. ब्रा. १९।७।३)
उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति (तां. ब्रा. २५।४।१)
उपांशुयाजमन्तरा यजति
उभावामिन्द्राग्नी (तै. सं. १।१४।१)
एकस्य तूभयत्वे पृथक्त्वम्
ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकाम. (मै. सं. २।१।१)
ऐन्द्रं दध्यमावास्यायाम् (तै. सं. २।५।४)
ऐन्द्रं पयोऽमावास्याम्
औदुम्बरी सर्वा वेष्टयितव्या (द्रा. श्रौ. सू. ५।२)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

औदुम्बरीं स्पृष्ट्वोद्गायेत् (द्रा. श्रौ. सू. ५।२)
कदाचनस्तरीरसीत्यैन्द्र्या गार्हपत्यमुपतिष्ठते (मै. सं. १।५।४)
ग्रहं संमार्ष्टि
चतुरवत्तं जुहोति
चित्रया यजेत पशुकामः (तै. सं. २।४।६)
ज्योतिष्टोमेन यजेत
तनूनपातं यजति (तै सं. २।६।१)
तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्
तमशपद्धिया धिया त्वा वध्यासुः
ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छत् (तै. सं. २।५।२।३)
तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन् (शां. ब्रा. ३।६)
तिस्र आहुतीर्जुहोति
तेजो वै घृतम्
त्रिवृत्पञ्चदशः सप्तदश एकविंशः । एतानि वाव तानि ज्योतींषि । य—
एतस्य स्तोमाः
दधि मधु घृतं पयो धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यम् (मै. सं. २।३।६)
दध्ना जुहुयात्
दध्ना जुहोति (आप. श्रौ. सू. ६।२५)
दध्नेन्द्रियकामस्य जुहुयात् (तै. ब्रा. २।१।५)
दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत (श. प. ब्रा. १।६।४)
द्विर्हविषोऽवद्यति
नातिरात्रे षोडशिनं गृह्णाति (तै. सं. ६।६।११)
नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्
पञ्च-पञ्चनखा भक्ष्याः (वा. रा. कि. कां. १७।३९)
पशावनालम्भाल्लोहितशकृतोरकर्मत्वम्
पुरोडाशकपालेन तुषानुपवपति (आप. श्रौ. सू. १।२०।९)
पशुना यजेत (आप. श्रौ. सू. ८।२१।२)
प्रति प्रधानं गुण आवर्तनीयः
प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः (तं. वा. ४७६)
'फलं न विधेयं किन्तु फलमुद्दिश्य तत्साधनत्वेन कर्मैव विधेयम्'—इति सिद्धान्तः
बर्हिर्देवसदनं दामि (मै. सं. १।१।२)
बृहत्पृष्ठं भवति
मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च (शाता.स्मृ.)
य एवं विद्वानमावास्यां यजते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्तो-
यमभिचरति श्येनेन् (षड्‌विंश ब्रा. ३।८।३)
यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति (तै.सं.२।६।३)
यवागूं पचति (तै. ब्रा. २।१ ५।६)
यवैर्यजेत (आप. श्रौ. सू. ६।३१।१३)
यावज्जीवमग्निहोत्रं जुहोति
रथन्तरं पृष्ठं भवति (तां. ब्रा. ११।४।६)
राजन्यवासिष्ठानां नाराशंसो द्वितीयः प्रयाजस्तनूनपादन्येषाम्
लोहित निरस्यति
वत्समालभेत (तै. सं २।१।४)
वषट्कृते जुहोति (आप. श्रौ. सू ७।२१।१३)
वायव्यं श्वेतमालभेत भूतिकामः (तै. स. २।१।१)
वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेनभागधेयेनोपधावति स एवैनं—भूतिं गमयति
(तै. सं. २।१।१)
वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णाति
व्रीहीन् प्रोक्षति (तै. ब्रा. ३।२।५)
व्रीहिभिर्यजेत (आप. श्रौ. सू. ६।३१।१४)
व्रीहीनवहन्ति (तै. ब्रा. ३।२।५), (आप. श्रौ. सू. १।१०)
शकृत्सम्प्रविध्यति
शुन्धध्वम् (तै. सं. १।१।३)
शोभतेऽस्य मुखं य एवं वेद (तां. म. ब्रा. २०।१६।६)
श्येनेनाभिचरन् यजेत (षड्‌विंश ब्रा. ३।८।२, आप. श्रौ. सू. २२।४।१३)
सकृदभिघारयति
सकृदुपस्तृणाति (तै. ब्रा. ३।३।८।२)
सप्तदशप्राजापत्यान् पशूनालभेत (तै. ब्रा. १।३।४)
समिधो यजति (तै. सं. २।६।१)
सह पशूनालभते (का. श्रौ. सू. २२।३।२८)
सोमेन यजेत (आप. श्रौ. सू. ८।२१।२)
सौर्यं चरु निर्वपेत् (तै. सं. २।३।२)
स्रुवेणावद्यति (आप. श्रौ. सू. २।१३।१)
स्योनं ते सदन कृणोमि (तै. ब्रा. ३।७।५)
स्वाध्यायोऽध्येतव्य. (शत. ब्रा. ११।५।६, तै. आर. २।१६।७) ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मीमांसापरिभाषायां

परीक्षोपयोगिनः प्रश्नाः

१—(क) क्रत्वर्थ-पुरुषार्थयोः को भेदः ?

(ख) अर्थवादभेदाश्च के ?

(ग) अपूर्वं नाम किम् ? तदनङ्गीकारे च का हानिः ? इत्येतत्सुविशदं निरूप्यताम् ।

२—(क) 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' अत्रत्यः सम्पूर्णो विषयः सुस्पष्टं निरूपणीयः ।

(ख) 'ग्रहं संमार्ष्टि' इत्यत्र एकत्वं विवक्षितमविवक्षितं वा ? तच्च केन कारणेनेति यथाग्रन्थं स्वभाषया वर्ण्यताम् ।

३— अङ्गबोधकप्रमाणानां लक्षणान्युदाहरणानि च प्रपञ्च्यन्ताम् । तत्रैव आरादुपकारकं, सन्निपत्योपकारकमङ्गजातं वर्णयित्वा लक्षणोदाहरणमपि लिख्यताम् ।

४— धर्माऽधर्मलक्षणे सपदकृत्ये विलिख्य 'दध्ना जुहुयात्'–इत्यत्र विरुद्धत्रिकद्वयस्य लक्षणप्रदर्शनपुरःसरं समन्वयः प्रदर्श्यताम् ।

५— प्रतिपत्तिकर्मणो लक्षणमवान्तरभेदाश्च सोदाहरणाः प्रदर्श्यन्ताम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

॥ श्रीः ॥

मीमांसा-परिभाषा

'आशुबोधिनी' संस्कृत-हिन्दीव्याख्योपेता

प्रथमं प्रकरणम्

मङ्गलाचरणम्

(१) सूर्यनारायणं वन्दे देवीं त्रिपुरसुन्दरीम् ।

आशुबोधिनी

तातं सदाशिवं वन्दे गुरुं राजेश्वरं तथा।
श्रीचिन्नस्वामिपट्टाभिरामं सत्स्फूर्तिदायकम् ॥ १ ॥

(१) इह खलु 'मङ्गलारम्भा ग्रन्थाः प्रचीयन्ते, निष्प्रत्यूहं परिसमाप्यन्ते'चेति वचनेन प्रचिक्रमिषितस्य निरन्तरायपरिसमाप्तिप्रचयादिकं प्रयोजनमाशासानोऽभिमतदेवताभिवादनात्मकं मङ्गलमाचरति—ग्रन्थकृत् कृष्णयज्वा सुधीः । सूर्यनारायणमिति । अत्र श्लेषालङ्कारेण स्वजनकं सूर्यनारायणं, सकललोकप्रणम्यं श्रीसूर्यदेवञ्च तथा त्रिपुरसुन्दरीं स्वजननीं, त्रिपुराणामसुरविशेषाणाम्; असून् प्राणान् दारयतीति विग्रहे शकन्ध्वादित्वादकारस्य पररूपत्वे, 'पूःसर्वयोर्दारिसहोः' इति बाहुलकादसुशब्दस्यापि

श्रियः कान्तायाः कल्याणनिधये निधयेऽर्थिनाम् ।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम् ॥ १ ॥
वायुपुत्रं महावीरं शक्तिस्फूर्त्तिप्रदायकम् ।
मङ्गलानां विधातारं हनुमन्तमुपास्महे ॥ २ ॥

(१) 'सूर्यनारायणं वन्दे' इत्यादि श्लोक से मङ्गलाचरण किया गया है। इसके द्वारा सूर्यनारायण तथा त्रिपुरसुन्दरी को नमस्कार किया गया है। ग्रन्थकार के पिता का नाम 'सूर्यनारायण' तथा माता का नाम 'त्रिपुरसुन्दरी है। माता-पिता भी साक्षात् देवता हैं। अतः उनको नमस्कार करना अत्यन्त उचित ही है। अथवा सभी प्राणियों के नमस्कार करने

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गुरूनधिगतार्थांश्च निरन्तरमहं भजे ॥ १ ॥

ञ्चुमि चेति सिद्धस्य त्रिपुरसुन्दरीशब्दस्य वाच्यां, त्रीणि पुराणि ब्रह्म-विष्णु-शिवशरीराणि यस्मिन् स त्रिपुरः परशिवः तस्य सुन्दरीमिति वा ललितादेवीम्। अधिगता लब्धा अर्थाः शास्त्रार्थाः येभ्यस्तान्, गुरून् स्वगुरून्

योग्य श्री सूर्यभगवान् को तथा सब का पालन करने वाली, आदि-शक्ति, जगज्जननी माता पार्वती को नमस्कार करते हैं। एक ही शब्द से ये दोनों अर्थ श्लेषालङ्कार के द्वारा प्रतिपादित होते हैं। जहाँ एक शब्द के अनेक अर्थ होते हैं, वहाँ श्लेषालङ्कार माना जाता है। आचार्य मम्मट ने कहा भी है कि 'श्लेषः स, वाक्ये एकस्मिन् यत्रानेकार्थता भवेत्'। अतः यह निश्चित होता है कि ग्रन्थनिर्माता 'श्रीकृष्णयज्वा' ग्रन्थ के प्रारम्भ में श्रीसूर्यनारायण—पिता तथा त्रिपुरसुन्दरी—माता को नमस्कार करते हैं। 'वन्दे' पदघटकीभूत 'वदि' धातु का स्तुति अर्थ है। देवता आदि के सामने बैठकर स्वनिष्ठापकृष्टत्वप्रकारक तथा देवतादिनिष्ठोत्कृष्टत्व का बोध करते हुए उनके गुणों का गान करना ही तो स्तुति है। नमस्कार में भी नमस्कर्त्ता अपने में अपकृष्टत्व तथा नमस्कार्य में उत्कृष्टत्व का बोधन करने से ही नमस्कार्यनमस्कारकभाव सम्बन्ध बन पाता है।

ग्रन्थकार पहले श्लोकार्द्ध से माता-पिता को नमस्कार करके अन्तिम श्लोकार्द्ध से अपने गुरुवर के चरणों में प्रणाम करते हैं। गुरु भी साक्षात् ब्रह्मस्वरूप हैं। उनकी कृपा से ही शास्त्रों के गूढ़ अर्थ, हस्तामलकवत् प्रत्यक्ष दिखाई देते हैं। जिनके ऊपर गुरु की कृपा नहीं रहती, उनको जीवन भर माथा-पच्ची करने पर भी शास्त्रों के अर्थों का यथार्थ ज्ञान नहीं हो पाता है। अतः उन गुरुवर्यों के चरणों में प्रणाम करना शिष्य का परमपवित्र कर्त्तव्य है। कहा भी है—'गुरुः साक्षात् परं ब्रह्म' इत्यादि। इसलिये 'श्रीकृष्णयज्वा' ने अपने परम श्रद्धास्पद गुरु के चरणों में प्रणाम किया है। उनके गुरु ने शास्त्रों के वास्तविक अर्थों को अधिगत कर लिया था अर्थात् सभी पदार्थ उन्हें प्रत्यक्ष दिखाई पड़ते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

अविगता विज्ञाता अर्था मीमांसाशास्त्रीयपदार्था यैस्तान् गुरून् श्रेष्ठान् जैमिनिप्रभृतीन्, मीमांसाशास्त्रप्रबन्धकानिति वा निरन्तरं सततम् अहं कृष्णयज्वा भजे प्रणामाध्ययनादिद्वारा सेवे ॥ १ ॥

थे। शास्त्रों के रहस्यों का निर्णय करने में उन्हें यत्किंचित् भी सन्देह नहीं था। ऐसे परमतत्त्ववेत्ता गुरु को ग्रन्थकार निरन्तर अर्थात् सर्वदा प्रणाम करते हैं। जिससे ग्रन्थलेखनरूप कार्य में कोई कठिनाई न होकर सभी पदार्थ शास्त्रानुकूल रीति से प्रतिपादित हो सकें।

किसी भी कार्य के प्रारम्भ में मङ्गल करना सदाचारी पूर्वाचार्यों के आचरण से अनुमित है। सभी शिष्ट लोग अपने ग्रन्थ के आरम्भ में मङ्गल करते हैं; क्योंकि शास्त्रानुकूल सदाचार भी प्रामाणिक होता है। यह पूर्वमीमांसादर्शन के 'सदाचारप्रामाण्याधिकरण' में बताया गया है। इतना ही नहीं, आगम भी इसका अनुमोदन करता है। महाभाष्यकार ने आगम को प्रस्तुत करते हुए मङ्गल का समर्थन किया है। वह आगम इस प्रकार है—'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते, वीरपुरुषाणि भवन्ति, आयुष्मत् पुरुषाणि चाऽध्येतारः सिद्धार्था यथा स्युः' इत्यादि। तात्पर्य यह है कि जिस ग्रन्थ के आदि, मध्य तथा अन्त में मङ्गल किया जाता है, वह ग्रन्थ विस्तृत अर्थात् उसका विशेष रूप से प्रचार-प्रसार होता है। उसके अध्ययन करने वाले वीर अर्थात् अपने शास्त्रों में निष्णात एवं दीर्घायु होते हैं और शास्त्रप्रतिपादित पदार्थों का यथावत् ज्ञान करने में समर्थ होते हैं। अतः सदाचारप्राप्त तथा आगम से अनुमोदित होने के कारण ग्रन्थ के प्रारम्भ में मङ्गल करना आवश्यक है। उदाहरणरूप से श्रीभट्टोजिदीक्षित की सिद्धान्तकौमुदी को लिया जा सकता है। इस ग्रन्थ के आदि, मध्य तथा अन्त में मङ्गल किया गया है। इसके निर्माण के समय अनेक प्रक्रिया-ग्रन्थ प्रचलित थे, परन्तु जब इसका निर्माण हुआ, तो सभी पूर्ववर्ती ग्रन्थ लुप्त हो गये और इसका कितना प्रचार-प्रसार हुआ, यह सब के सामने प्रत्यक्ष है। इसके पढ़ने वाले भी दूसरों की अपेक्षा प्रक्रिया-निष्णात माने

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जाने लगे। यहाँ तक कि मूल अष्टाध्यायीक्रम से पढ़ने-पढ़ाने वाले नहीं के बराबर हो गये। अतः ग्रन्थ के प्रारम्भ में मङ्गल करना आवश्यक है।

शङ्का—यह ठीक है कि ग्रन्थ के आरम्भ में मङ्गल करना आवश्यक है; परन्तु मन-ही-मन मङ्गल कर लिया जाता, जैसे—भगवान् विनायक की स्तुति के पाठ से भी मङ्गल हो जाया करता है। ग्रन्थ के प्रारम्भ में लिखने की क्या आवश्यकता है ?

समाधान—मन-ही-मन मङ्गल कर लेने पर भी मङ्गल हो जाता है, किन्तु वह समुचित नहीं है। ग्रन्थ के आदि में मङ्गल को लिपिबद्ध करने के दो कारण दिखाई देते हैं। जिसमें पहला कारण यह है कि अपने परवर्त्ती शिष्य-प्रशिष्यों को शिक्षा देना। मानसिक-मङ्गल कर लेने पर आगे आने वाले शिष्य यह नहीं समझ पायेंगे कि ग्रन्थ के प्रारम्भ में मङ्गल करना आवश्यक है; क्योंकि गुरुकृत मङ्गल में कोई प्रमाण उपस्थित नहीं किया जा सकता था। ग्रन्थ के प्रारम्भ में लिख देने से आगे की पीढ़ी भी समझने लगेगी कि ग्रन्थ के आदि में मङ्गल करना आवश्यक है; क्योंकि गुरुजी आदि सभी शिष्टजनों ने इसका आचरण किया है।

दूसरा कारण यह है कि इस ग्रन्थ के अध्ययन करने वालों का भी प्रसङ्गतः कल्याण हो जाय। जब कोई भी व्यक्ति ग्रन्थ का अध्ययन या अध्यापन करता है, तो वह मङ्गलाचरण से ही प्रारम्भ करता है; क्योंकि मङ्गलाचरण भी ग्रन्थ के अन्तर्गत ही आता है। इसलिये 'एका क्रिया द्व्यर्थकरी प्रसिद्धा' इस न्याय से छात्रों का भी मङ्गल हो जाता है। इससे उनकी विद्या परिपुष्ट होगी। अतः मन-ही-मन मङ्गल करना समुचित नहीं दिखाई देता। इसीलिये करुणावरुणालय ग्रन्थकार प्रारम्भ में ही मङ्गल को लिपिबद्ध कर दिया करते हैं।

शङ्का—मङ्गल करना आवश्यक है—यह तो सिद्ध हुआ; परन्तु वह मङ्गल कितने प्रकार का होता है ?

समाधान—मङ्गल तीन प्रकार के होते हैं। १. आशीर्वादात्मक २. नमस्कारात्मक ३. वस्तुनिर्देशात्मक। कहा भी गया है कि 'आशीर्न-

Dr. Urmila Sharma Collection, Varanasi

CC0: In Public Domain, Digitization by eGangotri

मस्क्रिया वस्तुनिर्देशो वाऽपि तन्मुखम्'। जिस मङ्गल-वाक्य में अपने तथा अपने शिष्यों के लिये ईश्वर से वाञ्छित वस्तु की प्रार्थना की जाती है, उसे आशीर्वादात्मक मङ्गल कहते हैं, जैसे—सिद्धान्त-कौमुदी के मध्य में तथा अन्त में मङ्गलाचरण किया गया है।

जिस मङ्गलाचरण में नमस्कार के प्रतिपादक शब्दों का प्रयोग किया जाता है, वह नमस्कारात्मक मङ्गल कहलाता है, जैसे—उसी ग्रन्थ के आदिमश्लोक में। इसी प्रकार जिसमें ग्रन्थ के प्रतिपाद्य वस्तु का निर्देश किया जाता है, वह वस्तुनिर्देशात्मक मङ्गल कहलाता है, जैसे—उसी सिद्धान्तकौमुदी ग्रन्थ के आदिम श्लोक में ही किया गया है। इस प्रकार मङ्गल करने के तीन प्रकार होते हैं।

शङ्का—मङ्गल की आवश्यकता क्या है ? 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते' इस न्याय से प्रयोजन के बिना मन्द पुरुष की भी प्रवृत्ति नहीं होती, तो विद्वानों की प्रवृत्ति कैसे होगी ? इसलिये उसके प्रयोजन की जिज्ञासा होती है।

समाधान—वह अविगीतशिष्टाचार का विषय होने से सफल है; तथापि मङ्गल के फल के सम्बन्ध में मतभेद है। प्राचीन नैयायिकों ने ग्रन्थ की परिसमाप्ति को ही मङ्गल का फल माना है। उस मङ्गल को कुछ लोग ज्ञान रूप तथा कुछ लोग उच्चारण रूप मानते हैं। उच्चारण रूप मान लेने पर उसी समय मङ्गल का विनाश होने से मंगल और ग्रन्थ समाप्ति दोनों का कार्यकारणभाव सम्भव न हो सकेगा। किसी कार्य के प्रति कारण होने के लिये उस कार्य के अव्यवहित पूर्व में उसका रहना आवश्यक है। अन्यथा वह व्यभिचरित कारण माना जाता है। उस कार्यकारणभाव को उत्पन्न करने के लिये दोनों के बीच में एक व्यापार माना जाता है, जो ग्रन्थ की समाप्ति के अव्यवहित पूर्व में विद्यमान रहता है। वह बीच का व्यापार विघ्नध्वंस है। मङ्गल से विघ्नध्वंस और विघ्नध्वंस से ग्रन्थ की परिसमाप्ति रूप कार्य सम्पन्न होता है, जैसे—याग से अपूर्व उत्पन्न होता है और उस

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपूर्व के द्वारा स्वर्ग की प्राप्ति होती है। तब स्वर्ग के प्रति 'याग' कारण बन पाता है।

इस प्रकार प्राचीन नैयायिकों ने मङ्गल को विघ्नध्वंस रूप व्यापार के द्वारा ग्रन्थ-समाप्ति के प्रति कारण माना है। इनके मत में विघ्न-ध्वंस और समाप्ति दोनों को मङ्गल का कार्य मानना पड़ेगा। अतः गौरवदोष हो जायेगा। इसीलिये नवीन नैयायिकों ने ग्रन्थ-समाप्ति को मङ्गल का कार्य नहीं माना है; अपितु विघ्नध्वंस को ही मङ्गल का कार्य माना है। ग्रन्थ-समाप्ति के प्रति विघ्नरूप प्रतिबन्धक का विनाश हो जाने पर ग्रन्थकार की बुद्धि (प्रतिभा) से ग्रन्थ की परिसमाप्ति हो जायेगी। अतः मङ्गल, विघ्नध्वंस के प्रति ही कारण है, ग्रन्थ-समाप्ति के प्रति नहीं। उसकी समाप्ति के प्रति मङ्गल को अन्यथासिद्ध माना गया है। अतः नवीन नैयायिकों के मत में एक ही कार्य मानना पड़ता है। इसीलिये इस मत में लाघव है; क्योंकि दो कार्यप्रयुक्त दो कार्यकारणभाव मानने में गौरव होता है। लाघव और गौरव पक्षों में लाघव पक्ष ही समुचित तथा ग्राह्य माना जाता है।

शङ्का—अभी तक यह बताया गया है कि मङ्गल करने से ग्रन्थ की समाप्ति होती है; परन्तु इस कार्यकारणभाव का व्यभिचार भी पाया जाता है। अतः व्यभिचरित कारण, 'कार्य' का साधक नहीं हो सकता, जैसे—कादम्बरी नाम के ग्रन्थ में महाकवि बाणभट्ट ने मङ्गल किया है; किन्तु ग्रन्थ की समाप्ति नहीं हो पायी। इसके विपरीत किरणावली ग्रन्थ में मङ्गल नहीं किया गया है; परन्तु उसकी परिसमाप्ति हुई है। इसलिये उपर्युक्त कार्यकारणभाव सुसंगत नहीं दीख पड़ता।

समाधान—उपर्युक्त शङ्का समीचीन नहीं है। कारण यह है कि कादम्बरी में मङ्गल किया गया; किन्तु विघ्न के अनुरूप मङ्गल नहीं किया गया। जितने प्रबल विघ्न हों, उतना ही प्रबल मङ्गल होना चाहिए। तभी वह मङ्गल विघ्न को दूर कर सकता है। विघ्न बहुत अधिक और प्रबल था। उसके अनुपात में मङ्गल कम तथा निर्बल किया गया था। अतः कार्य की समाप्ति नहीं हो पायी। वह अपर्याप्त मङ्गल

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

(२) बालानां शास्त्रसिद्धा[1]न्तलेशबोधाय धीमताम् ।

(२) अभिवादनानन्तरं द्वितीयश्लोकेन प्रकरणग्रन्थप्रणयनं प्रतिजानीते—'बालानामि'ति । धीमतां प्रशस्तमतिशालिनां किन्तु बालानाम्

जितने विघ्नों को दूर कर सकता था, उतना कार्य हो पाया। इसीलिये कहा जाता है—'यादृशो यक्षस्तादृशो बलिः' तथा 'जस देवता तस चाहिए पूजा' इत्यादि। जितना प्रबल यक्ष होता है, उतनी ही प्रबल पूजा से वह सन्तुष्ट होता है। किरणावली ग्रन्थ में यद्यपि मङ्गलाचरण नहीं किया है; परन्तु ग्रन्थ-समाप्तिरूप कार्य से मङ्गलरूप कारण का अनुमान किया जाता है। किरणावलि में मङ्गल दिखाई न देने पर भी जन्मान्तरीय पर्याप्त मङ्गल का अनुमान किया जाता है। उसी जन्मान्तरीय मङ्गल से इस जन्म में विघ्न का ध्वंस हो गया और ग्रन्थ की समाप्ति भी हो गयी। पूर्व जन्म में पर्याप्त मंगल किया था, जिससे विघ्न का अत्यन्ताभाव स्वतः ही हो गया है। अतः वही मंगल इस जन्म में कार्य का साधक सिद्ध हुआ। इस पुनर्जन्म के सिद्धान्त को प्राचीन काल से ही भारतीय लोग जानते हैं। इन्हीं सभी बातों को ध्यान में रखकर 'श्रीकृष्णयज्वा' ने ग्रन्थ के प्रारम्भ में पहले श्लोक से नमस्कारात्मक-मंगलाचरण प्रस्तुत किया है ॥ १ ॥

(२) श्रीकृष्णयज्वा के द्वारा बुद्धिमान् बालकों को मीमांसाशास्त्र में बताये गये पदार्थों का अनायास बोध कराने के लिये यह मीमांसापरिभाषा नाम का ग्रन्थ बनाया जाता है ॥ १ ॥

बालानामिति—जिसने अन्य शास्त्रों का अध्ययन कर लिया है; परन्तु पूर्वमीमांसादर्शन का अध्ययन नहीं किया है, ऐसे व्यक्ति को ही बाल शब्द से बताया गया है। इसलिये बाल शब्द से स्तनन्धय नहीं समझना चाहिए। 'धीमताम्' यह पद इसी का विशेषण है। 'धी' का अर्थ बुद्धि और 'मतुप्' प्रत्यय का अर्थ 'युक्त' है—अर्थात् बुद्धिमान्। बुद्धि तो सभी को होती है, तो इस विशेषण का क्या तात्पर्य होगा? उसका तात्पर्य यह है कि सामान्यकर्मोपयोगी बुद्धि से अतिरिक्त शास्त्रों

१. 'र्थं' इति पाठान्तरम् ।   २. 'मता'—पा०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

मीमांसा-परिभाषेयं क्रियते कृष्णयज्वना ॥ २ ॥

अधीतसर्वशास्त्राणामपि अनधीतमीमांसाशास्त्राणां, शास्त्रसिद्धार्थानां मीमांसाशास्त्रीयसिद्धान्तीभूतपदार्थानां, लेशबोधाय लेशेन सूक्ष्मतया बोधाय मीमांसा-परिभाषेयं मीमांसाया वेदार्थविचारकस्य शास्त्रस्य परिभाषा इयं स्फुटार्थविवृतिः क्रियते कृष्णयज्वना कृष्णयज्वाभिधानेन ग्रन्थकृता विरच्यते ।

के सूक्ष्म अर्थ को ग्रहण करने वाली विशिष्ट बुद्धि। अतः विशिष्ट बुद्धि से युक्त बालक इस शास्त्र के लिये उपयोगी बताया गया है।

शास्त्रसिद्धार्थलेशबोधायेति—शास्त्र तो अनेक हैं, परन्तु यहाँ प्रयुक्त 'शास्त्र' शब्द से पूर्वमीमांसाशास्त्र विवक्षित है। उस शास्त्र में सिद्ध अर्थात् पूर्वोत्तरपक्ष के द्वारा जिन अर्थों को निष्पन्न किया गया है, उसी को 'शास्त्रसिद्ध' कहा गया है। 'अर्थ' शब्द के 'प्रयोजन, धन' इत्यादि अनेक अर्थ होते हैं; तथापि यहाँ पर 'अर्थ' शब्द पदार्थ का वाचक है। वह पदार्थ 'प्रमाणप्रमेयादि' रूप हैं। ये पदार्थ बहुत ही विस्तृत हैं। इस छोटे से ग्रन्थ में सब का समावेश करना सम्भव नहीं है। अतः 'लेश' शब्द का प्रयोग किया है। 'लिश् अल्पीभावे' धातु से लेश शब्द निष्पन्न होता है। इसलिये इसका 'अल्प' अर्थ होता है। 'बोध' का अर्थ है समुचित ज्ञान। सामान्य ज्ञान को बोध नहीं कहा जाता; अपि तु विशिष्ट-ज्ञान को ही बोध कहते हैं। अभिप्राय यह हुआ कि पूर्वमीमांसाशास्त्र में अधिकरणों के द्वारा जिन पदार्थों का निर्णय किया गया है, उन पदार्थों का संक्षिप्त रूप से सम्यक् ज्ञान कराने के लिये इस ग्रन्थ का निर्माण किया जा रहा है।

मीमांसापरिभाषेति—'मान्' धातु से जिज्ञासा अर्थ में सन् प्रत्यय करने पर 'मीमांसा' शब्द निष्पन्न होता है। 'मान्' धातु का पूजा अर्थ है। जिज्ञासा शब्द विचार अर्थ में लाक्षणिक माना जाता है। अतः मीमांसा शब्द का पूजितविचार अर्थ निष्पन्न होता है। ब्रह्म-साक्षात्कार तथा धर्मविचार चित्तशुद्धि के द्वारा ही किया जाता है। इस कारण इसमें पूजितत्व माना जाता है। यह जैमिनि मुनिप्रणीत मीमांसादर्शन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

अत्र—'अधिकारी च सम्बन्धो विषयश्च प्रयोजनम् ।
ग्रन्थादावेव वक्तव्यमनुबन्धचतुष्टयम् ॥

बारह अध्यायों में विभक्त है। 'परितः भाषते' इति परिभाषा। जिसके द्वारा शास्त्रीय पदार्थ स्पष्ट रूप से भासित होते हैं, उसीको 'परिभाषा' शब्द से कहा गया है। इस परिभाषा ग्रन्थ से पूर्वमीमांसा के पदार्थ प्रकाशित होते हैं। अतः इसे 'मीमांसापरिभाषा' नाम दिया गया है।

इयमिति—'इदमस्तु सन्निकृष्टे' इस कोष के अनुसार 'इदम्' शब्द सन्निकृष्ट का वाचक है। उसी 'इदम्' शब्द का स्त्रीलिंग में 'इयम्' यह रूप निष्पन्न होता है। यह शब्द ग्रन्थ का निर्देशक है। अभी ग्रन्थ का मङ्गलाचरण ही किया जा रहा है। ग्रन्थ का निर्माण अभी हुआ नहीं है, किन्तु होने वाला है। इसलिये ग्रन्थ के सान्निध्य की कल्पना भी नहीं की जा सकती। जब वस्तु है ही नहीं, तब सान्निध्य किसका ? इसका समाधान है कि ग्रन्थ का बाह्य रूप अभी बाहर नहीं आया है; तथापि मस्तिष्क में उसका निर्माण हो चुका है। 'अर्थं बुध्वा वाक्यरचना' न्याय के अनुसार पहले मस्तिष्क में ग्रन्थ-निर्माण की पूरी सामग्री तथा उसका स्वरूप बन जाता है। उसके बाद उसी को बाह्य रूप दिया जाता है। अतः मस्तिष्क में स्थित 'मीमांसापरिभाषा' ग्रन्थ का सान्निध्य मानकर सन्निकृष्ट अर्थ के बोधक 'इदम्' शब्द का प्रयोग किया गया है। अतः उसका प्रयोग असङ्गत नहीं है।

क्रियत इति—करणार्थक 'कृञ्' धातु से कर्मवाच्य की विवक्षा रहने पर 'तङ्' तथा 'यक्' प्रत्यय करके आत्मनेपदी 'क्रियते' शब्द निष्पन्न होता है। जब क्रिया का फल कर्तृगामी होता है, तब आत्मनेपद का प्रयोग किया जाता है और जब क्रिया का फल कर्त्ता से भिन्न व्यक्ति में रहता है, तब परस्मैपद का प्रयोग किया जाता है। यहाँ पर पूर्वमीमांसा-प्रतिपादित पदार्थों का बोध बालक को इस ग्रन्थ से हो रहा है, ग्रन्थ-कर्त्ता को नहीं। उसीके बोध के लिये इस ग्रन्थ का निर्माण भी किया जा रहा है। अतः यहाँ पर परस्मैपद का ही प्रयोग करना चाहिए था; आत्मने पद का नहीं। इसका समाधान यह है कि यद्यपि इस

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

इति नियमात् 'अधीतवेदः' अधिकारी, 'मीमांसायाः स्फुटार्थविवरणं' विषयः, 'सूक्ष्मबोधः' प्रयोजनम्, 'बोध्य-बोधकभावश्च' सम्बन्धो विज्ञेयः। मीमांसापरिभाषा नाम पूर्वमीमांसाशास्त्रस्य संकेतविशेषाभिधायको ग्रन्थः ॥ २ ॥

ग्रन्थ से बालक को पदार्थ-बोध हो रहा है; तथापि पदार्थ-बोध-मात्र ही ग्रन्थ-निर्माण का फल नहीं होता। अपने यश आदि की वृद्धि भी उसका फल है। वह फल ग्रन्थ-निर्माण कर्त्ता को ही होगा। अतः कर्तृगामी फल होने के कारण आत्मनेपद का व्यवहार समुचित ही है।

'कृष्णयज्वनेति'--मीमांसापरिभाषाकार का नाम 'कृष्णयज्वा' है। उसी का यह तृतीयान्त रूप है। 'पापान् कर्षतीति कृष्णः। कृष्ण इवायं कृष्णः। 'यज्वन्' शब्द यज्ञ अर्थ से सम्बन्धित है। ये स्वयं यज्ञों के अनुष्ठाता हैं।

शङ्का--'आत्मनाम गुरोर्नाम नामातिकृपणस्य च।
श्रेयस्कामो न गृह्णीयात् ज्येष्ठापत्यकलत्रयोः' ॥

इस स्मृति के अनुसार कल्याणकामी पुरुष को अपने नाम का ग्रहण नहीं करना चाहिए; तथापि विद्वान् लेखक ने अपने नाम का ग्रहण क्यों किया?

समाधान—'न गृह्णीयात्' का 'नोच्चारयेत्' अर्थ किया जाता है अर्थात् अपने नाम का उच्चारण नहीं करना चाहिए, लिखने में कोई दोष नहीं है। अतः ग्रन्थकार का स्वनामनिर्देश अनुचित नहीं है। यहाँ पर कुछ लोग 'कूपखानक' न्याय से दोषों की निवृत्ति भी मानते हैं। कुछ भी हो, स्वनाम का निर्देश करना अनुचित नहीं है।

इस श्लोक से अनुबन्ध-चतुष्टय को भी सूचित किया गया है। 'ग्रन्थ-प्रवृत्तिप्रयोजकज्ञानविषयत्वमनुबन्धत्वम्' अर्थात् ग्रन्थ में प्रवृत्ति कराने वाले ज्ञान के विषय को अनुबन्ध कहते हैं। 'पुरुषमनुबध्नाति स्वज्ञानेन प्रेरयतीत्यनुबन्धः' यह अनुबन्ध शब्द की व्युत्पत्ति कही गयी है। वे अनुबन्ध चार प्रकार के हैं--१. विषय, २. प्रयोजन, ३. अधिकारी, ४. सम्बन्ध।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

धर्माधर्मनिरूपणम्

(३) इह खलु महर्षिणा जैमिनिना द्वादशलक्षण्यां पूर्व-

---

(३) इह द्वादशलक्षण्यां पूर्वमीमांसायामित्यन्वयः। मीमांसासूत्रकृता महर्षिजैमिनिना 'अथातो धर्मजिज्ञासा' इत्यारभ्य 'अन्वाहार्ये च दर्शनात्' इत्यन्ता द्वादशलक्षणी द्वादशाध्यायी पूर्वमीमांसा प्रणीता। द्वादशलक्षण्या-

---

विषय—जिस शास्त्र से उत्पन्न होने वाले प्रमात्मक ज्ञान से निवृत्त होने योग्य अज्ञान का, जो पदार्थ विषय होता है, वही पदार्थ उस शास्त्र का विषय समझा जाता है। पूर्वमीमांसा शास्त्र के परिभाषाओं का ज्ञान इस ग्रन्थ से होता है और उससे तद्विषयक अज्ञान की निवृत्ति हो जाती है। अतः पूर्वमीमांसा की परिभाषाओं को ही इस ग्रन्थ का विषय समझना चाहिए।

प्रयोजन—पुरुष जिस पदार्थ की प्राप्ति के उद्देश्य से उसके साधन में प्रवृत्त होता है, उसी को प्रयोजन शब्द से कहा जाता है। इस ग्रन्थ के अध्ययन से परिभाषाओं का ज्ञान होता है, उसीके लिये इस ग्रन्थ का अध्ययन आवश्यक है। अतः परिभाषाओं का ज्ञान ही इस ग्रन्थ का प्रयोजन है।

अधिकारी—यहाँ पूर्वमीमांसा की परिभाषाओं के ज्ञान की कामना करने वाला पुरुष ही अधिकारी है। अतः मीमांसा की परिभाषाओं के ज्ञान की इच्छा करने वाला मनुष्य ही उस ग्रन्थ के पढ़ने का अधिकारी है।

सम्बन्ध—विषय और शास्त्र दोनों का परस्पर प्रतिपाद्य-प्रतिपादक-भाव सम्बन्ध माना जाता है। विषय उस शास्त्र का प्रतिपाद्य है और शास्त्र उस विषय का प्रतिपादक है। इस प्रकार उक्त श्लोक से अनुबन्ध-चतुष्टय को भी सूचित किया गया है ॥ २ ॥

(३) महर्षि जैमिनि ने इस द्वादशलक्षणी पूर्वमीमांसाशास्त्र में अनुष्ठानोपयोगी होने के कारण धर्म तथा अधर्म का ही विचार प्रस्तुत किया है। महर्षिजैमिनि के द्वारा विरचित मीमांसा-सूत्र बारह अध्यायों

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मीमांसायां धर्माधर्मावेवानुष्ठानोपयोगितया विचारितौ।

मिति। अत्र 'लक्षण' शब्दः अध्यायपरः। द्वादशानां लक्षणानामध्यायानां समाहारः द्वादशलक्षणी, तस्यां द्वादशलक्षण्याम्। मीमांसाशास्त्रीयद्वादशसु अध्यायेषु (१) धर्मप्रमाणम्; (२) धर्माधर्मभेदौ, (३) शेष-शेषिभावः; (४) क्रत्वर्थ-पुरुषार्थयोर्भेदनिरूपणद्वारा प्रयोज्य-प्रयोजकविचारः, (५) श्रुत्यर्थपाठादिक्रमबोधकप्रमाणानि, (६) अधिकारविशेषः, (७) सामान्यातिदेशः, (८) विशेषातिदेशः, (९) ऊहः, (१०) बाधः, (११) तन्त्रम्, (१२) प्रसङ्गश्चेति क्रमेण द्वादश लक्षगानि लक्षयतीति द्वादशलक्षणी। लक्षयतीति लक्षणी टित्वात् ङीप्, तेषां द्वादशानां लक्षणो

में विभक्त किये गये हैं। तीसरे, छठे तथा दशवें अध्याय को छोड़कर शेष नौ अध्यायों में चार-चार पाद हैं तथा उन तीनों अध्यायों में आठ-आठ पाद हैं। द्वादशलक्षणी शब्द में लक्षण शब्द अध्याय का वाचक है। द्वादश लक्षणों (अध्यायों) के समुदाय को द्वादशलक्षणी कहते हैं। पूर्वमीमांसा शास्त्र कर्मकाण्ड का बोध करता है और उत्तरमीमांसाशास्त्र ज्ञान-काण्ड का बोध कराता है। कुछ लोग पूर्व तथा उत्तर शब्द के प्रयोग से दोनों की एकशास्त्रता भी मानते हैं, तथापि मीमांसा-सम्प्रदाय के अनुसार दोनों भिन्न-भिन्न शास्त्र हैं। वेद के दो भागों में से प्रथम (पूर्व) भाग को कर्मकाण्ड और दूसरे (उत्तर) भाग को ज्ञान काण्ड कहते हैं। अतः जिसमें वेद के पूर्व भाग का विचार किया गया है, उसे पूर्वमीमांसा और जिसमें वेद के उत्तर भाग का विचार किया गया है, उसे उत्तरमीमांसा शब्द से कहा गया है।

यागादि के प्रयोग को अनुष्ठान कहा जाता है। यागादि के अनुष्ठान तथा अननुष्ठान के उपयोगी धर्म तथा अधर्म ही हैं। ग्राह्य बुद्धि के कारण धर्म को अनुष्ठेय समझा जाता है तथा त्याज्य बुद्धि के कारण अधर्म को अननुष्ठेय समझा जाता है।

धर्म के सम्बन्ध में अन्य दार्शनिकों तथा मीमांसकों में भी परस्पर मतभेद दृष्टि गोचर होता है। वैशेषिकों का कहना है कि जिससे अभ्युदय तथा निःश्रेयस् की प्राप्ति होती है, उसीको धर्म कहा जाता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्र वेदबोधितेष्टसाधनताको धर्मः—यथा यागादिः ।

द्वादशलक्षणी द्वादशाध्यायीत्यपि केचित् । धर्माधर्माविति । अस्मिन् मीमांसा शास्त्रे 'धर्मः' अनुष्ठेयः, अधर्मश्च अननुष्ठेयः (त्याज्यः) इति विचारितमस्ति । यद्यपि न्यायशास्त्रे 'धर्माधर्मविदृष्टं स्यात्' इति अदृष्टशब्दवाच्यौ धर्माऽ-

है । ऐहलौकिक उत्कर्ष को अभ्युदय तथा पारलौकिक उत्कर्ष को निःश्रेयस् कहते हैं । नैयायिकों ने वेद-विहित यागादि कर्मों से उत्पन्न होने वाले पदार्थ को धर्म शब्द से कहा है । एवं वेदादि से निषिद्ध कर्मों के द्वारा उत्पन्न होने वाले पदार्थ को अधर्म माना है । प्रभाकर तथा उनके अनुयायी मीमांसकों ने इसी सिद्धान्त का अनुसरण किया है । वे भी वेद-विहित कर्मजन्य पदार्थ को ही धर्म मानते हैं ।

भट्टपाद के सिद्धान्तानुसार यागादि कर्मों को ही धर्म माना जाता है । इस मत से भाष्यकार-प्रभृति आचार्य भी सहमत हैं । भाष्यकार शबरस्वामी का कहना है कि 'यो हि यागादिकमनुतिष्ठति, तं धार्मिकमित्याचक्षते' अर्थात् जो मनुष्य यागादि कर्मों का अनुष्ठान करता है, उसे लोग धार्मिक कहते हैं । इससे यह निश्चित होता है कि यागादि ही धर्म है । वार्त्तिककार भट्टपादने भी कहा है कि 'द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते' अर्थात् द्रव्य, गुण तथा क्रिया आदि की धर्मता स्थापित (प्रतिपादित) की जायेगी । पार्थसारथिमिश्र प्रभृति आचार्यों ने इसी सिद्धान्त का अनुसरण किया है । पूर्वमीमांसादर्शन के बारहों अध्यायों में धर्म तथा उसके प्रतिपादन के उपयोगी पदार्थों का निरूपण किया गया है । पहले अध्याय में धर्म-प्रमाण, दूसरे में धर्माधर्म के भेद, तीसरे में अङ्गाङ्गिभाव, चौथे में प्रयोज्य-प्रयोजक विचार, पाँचवें में श्रुत्यादि-क्रम बोधक प्रमाणों का विचार, छठे में अधिकार, सातवें में सामान्यातिदेश, आठवें में विशेषातिदेश, नवें में ऊह, दसवें में बाध, ग्यारहवें में तन्त्र तथा बारहवें अध्याय में प्रसङ्ग पदार्थों का निरूपण किया है । इन सभी से धर्म का ज्ञान होता है ।

धर्म-लक्षण—जो वेद से बोधित होते हुए अर्थकारी इष्ट का साधन हो, उसीको धर्म कहते हैं । उदाहरण रूप से याग, दान तथा होमादि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धर्मौ। 'गङ्गास्नानादियागादिर्व्यापारस्तस्य कीर्तितः' इत्युक्त्या यागादय-स्तस्य व्यापाररूपाः प्रतिपादिताः, तथापि मीमांसाशास्त्रे लक्ष्यन्ते ज्ञायन्ते पदार्था एभिः इति व्युत्पत्त्या 'यागादिरेव धर्मः' इत्युक्तत्वात् याग-होम-दानानामेव धर्मत्वम्, कलञ्जभक्षणादीनामधर्मत्वम्। अतः तयोः धर्माधर्मयोरनुष्ठानोपयोगित्वं स्पष्टमेव।

अनुष्ठानोपयोगितयेति। 'अनुष्ठानोपयोगितया' इति पदं 'विचारितौ' इत्यत्र हेतुत्वेनान्वेति। धर्माऽधर्मविचारस्योपयोगः धर्मानुष्ठाने अधर्मत्यागे च भवति। अतस्तौ विचारितौ। मीमांसकेष्वपि प्राभाकरा नैयायिकवदेव यागजन्यमपूर्वमेव (अदृष्टमेव) धर्मं मन्यन्ते। तथाहि—

'विहितक्रियया साध्यो धर्मः पुंसो गुणो मतः।
प्रतिषिद्धक्रियासाध्यः स गुणोऽधर्म उच्यते॥'

किन्तु मीमांसापरिभाषाकारः कृष्णयज्वा भाट्टमतानुयायित्वाद् यागादिरेव धर्मः इति प्रतिजानीते 'यथा यागादिरि'त्यादिना। 'द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते' इति कौमारिलडिण्डिमः। तत्र धर्माधर्मयोर्निरूपणे धर्मस्य लक्षणं तावत् 'वेदबोधितेष्टसाधनताको धर्मः' इति। 'स्वर्गकामो यजेत' इत्यत्र शाब्दबोध एवं भवति—'स्वर्गफलं यागेन भावयेत्' सम्पादयेदित्यर्थः। अत्र यागस्य इष्ट (स्वर्गफल) साधनतावेदेन अवबोध्यत

को प्रस्तुत किया गया है। ये सब वेद-विहित हैं तथा अनुष्ठाता पुरुष के अर्थकारी इष्ट (स्वर्गादि) के साधन हैं। अतः लक्ष्य में लक्षण समन्वित हो जाता है। इसलिये लक्षण के दूषक अव्याप्ति आदि कोई दोष इस लक्षण में नहीं है। अव्याप्ति आदि दोषों के न होने से लक्षण की समीचीनता सिद्ध होती है। लक्षण में वेद-बोधितत्व विशेषण है और इष्टसाधनताकत्व विशेष्य है। धर्मत्व पद के द्वारा लक्ष्य का निर्देश किया गया है। इसलिये 'वेदबोधितत्वे सति इष्टसाधनताकत्वं धर्मत्वमिति लक्षणं फलितं भवति'। यदि विशेषण दल का उपादान न किया जाय और विशेष्यमात्र को ही लक्षण मान लिया जाय, तो भोजनादि में अतिव्याप्ति हो जायेगी; क्योंकि भोजन भी जीवन-धारण रूप इष्ट का साधन होने के कारण उसमें लक्षण समन्वित हो जायेगा।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

वेदबोधिताऽनिष्टसाधनताकोऽधर्मः—यथा कलञ्जभक्षणादिः ।

इति यागात्मके धर्मे लक्षणसमन्वयः । उक्तधर्मलक्षणे 'वेदेन बोधिता इष्टसाधनता यस्य' स इति विग्रहो ज्ञेयः । धर्मलक्षणे इष्टसाधनत्वमात्रोक्तौ अन्नभक्षणे (भोजनादौ) अतिव्याप्तिः, तद्वारणाय 'वेदे' ति । वेदबोधितत्वमात्रोक्तौ स्वर्गादौ अतिव्याप्तिः, तद्वारणाय 'इष्टसाधनते' ति, तेन स्वर्गात्मकस्य फलस्य स्वयमेवेष्टरूपत्वात् तत् फलं साध्यरूपमस्ति, तच्च इष्टस्य साधनं नास्ति । अतः धर्मलक्षणस्य स्वर्गात्मके फले अतिव्याप्तिप्रसङ्गो न भवति ।

धर्मलक्षणे वेदविहितत्वमात्रोक्तौ (वेदविहितत्वं धर्मत्वमितिलक्षणे),'अग्नीषोमीयवपायां हुतायां दीक्षितान्नमश्नीयात्' इत्याद्यभ्यनुज्ञाविषये दीक्षितान्नाशनादौ अतिव्याप्तिः । तद्वारणार्थं'मिष्टसाधनत्व'निवेशः, तेन नातिव्याप्तिः । कुत इति चेत्, 'न दीक्षितान्नमश्नीयात्' इत्यनेन दीक्षितान्नाशनस्य अनिष्टसाधनत्वे बोधिते 'अश्नीयात्' इत्यभ्यनुज्ञाविधिना दोषाभावमात्रस्यैव बोधनेन इष्टसाधनत्वस्य अनाक्षेपात्, रागप्राप्तस्य इष्टसाधनताकस्यापि दीक्षितान्नाशन—विवाहाऽनृतभाषणादेः वेदबोधितेष्टसाधनताकत्वाभावात् । 'श्येनेनाभिचरन् यजेत' इति विहितस्य श्येनसंज्ञकस्य यागस्य वेदविहिते(बोधिते)ष्टसाधनताकत्वात् धर्मत्वमेव । तत्फलस्यैव (वैरिमरणानुकूलशस्त्रघातादिरूपहिंसात्मकस्य अभिचारस्यैव) तु अधर्मत्वम्, तस्यैव 'न हिंस्यात्' इत्यनेन अनिष्टसाधनत्वबोधनात् । अत एव तामसधर्मेषु श्येनादेरुपादानं सङ्गच्छते ।

वेदबोधिताऽनिष्टेति । 'वेदबोधिताऽनिष्टसाधनताकः' अधर्मः, इति

धर्म का लक्षण तो किया गया किन्तु वह भोजनादि में समन्वित हो रहा है । अतः लक्ष्य के बाहर जाने से लक्षण को अतिव्याप्त माना जायेगा । उस अतिव्याप्ति को दूर करने के लिये विशेषण दल आवश्यक है । लक्षण में विशेषण दल का समावेश कर देने पर अतिव्याप्ति नहीं होती; क्योंकि भोजन वेद-बोधित नहीं है । वह तो रागतः प्राप्त है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हि अधर्मलक्षणम् । यथा—कलञ्जभक्षणादिः । वेदबोधिता अनिष्टसाधनता यस्य सः इति विग्रहः । अस्मिन् लक्षणे 'अनिष्टसाधनत्वमात्रोक्तौ विषभक्षणादौ अपथ्यसेवने चातिव्याप्तिः । विषभक्षणेन, अपथ्यसेवनेन चाऽनिष्टमुत्पद्यते । तन्निवारणार्थं लक्षणे 'वेदबोधितत्व'मित्यंशो निवेश्यते। 'वेदबोधितत्व' मात्रोक्तौ नरकादौ अतिव्याप्तिः । तन्निवारणार्थमनिष्टसाधनत्वांशो निवेश्यते, तेन नातिव्याप्तिः । नरकः स्वयमेवाऽनिष्टरूपः, नहि अनिष्टसाधनरूपः । वेदनिषिद्धत्वरूपे अधर्मलक्षणे स्वीक्रियमाणे 'अतिरात्रे षोडशिनं न गृह्णाति' इति निषिद्धे षोडशिग्रहणे अतिव्याप्तिः, किन्तु अनिष्टसाधनत्वनिवेशने सति नातिव्याप्तिः । 'नातिरात्रे' इति वाक्येन षोडशिग्रहणस्य अनिष्टसाधनत्वं न बोध्यते, किन्तु तद्विनापि इतराङ्गैः क्रतोः पूर्णत्वमेव । अत एव कष्टात्मके तस्मिन् पुरुषनिवृत्तिरुपपद्यते । तत्र प्रवृत्त्यर्थं ग्रहणविधिना फलाधिक्याक्षेपः । अतः फलाधिक्यकामस्य तत्र प्रवृत्तिरिति विज्ञेयम् । कलञ्जभक्षणादिरिति । अत्र 'आदि'

अन्य प्रमाणों से ज्ञात हुए पदार्थों का विधान नहीं किया जाता । विधान तो अन्य प्रमाणों से अज्ञात पदार्थ का ही होता है। यदि कहा जाय कि 'अष्टौ ग्रासाः मुनेर्भक्ष्याः' इत्यादि के द्वारा भोजन का विधान है और स्मृति भी धर्मप्रमापिका होती है; परन्तु यह कहना उचित नहीं है। कारण यह है कि वह स्मृति भोजन की विधायिका नहीं है, अपितु ग्रासनियम की बोधिका है। अतः किसी दोष की सम्भावना नहीं है। इस प्रकार विशेषण दल की सार्थकता हो जाने पर उतने मात्र को लक्षण मान लिया जाय, विशेष्य दल की कोई आवश्यकता प्रतीत नहीं होती; परन्तु यह कथन भी ठीक नहीं है, क्योंकि लक्षण से विशेष्य दल को निकाल देने पर स्वर्गादि में अतिव्याप्ति हो जायेगी; क्योंकि वह भी वेदों से बोधित है। इसलिये उस अतिव्याप्ति को दूर करने के लिये विशेष्य दल आवश्यक है। 'स्वर्ग' पुरुष का इष्ट है, वह इष्ट का साधन नहीं। उसको साधन तब कहा जा सकता था, जब स्वर्ग का भी कोई साध्य होता; किन्तु स्वर्ग का साध्य कुछ भी नही है, वही स्वयं साध्य है। सुख को भी स्वर्ग का साध्य नहीं माना जा सकता; क्योंकि वह

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

पदेन सुरापानादिकं बोद्धव्यम्। कलञ्जेति। 'न कलञ्जं भक्षयेत्' इत्यनेन कलञ्जभक्षणं निषिद्धयते। 'कलञ्जं' नाम विषलिप्तशस्त्रहतमृगमांसम्। केचन 'तम्बाकू' इति मन्यन्ते, लौकिकाश्च रक्तलशुनमिति वदन्ति। उपरिनिर्दिष्टेन निषेधबोधकेन श्रुतिवाक्येन 'कलञ्जभक्षणम्' अनिष्टसाधन-

---

(स्वर्ग) तो स्वतः सुखरूप ही है। सुख उस (स्वर्ग) से भिन्न नहीं है। कहा भी है—

'यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्॥ इति॥

अतः उपर्युक्त धर्म-लक्षण को समुचित कह सकते हैं।

अधर्म-लक्षण—धर्म-लक्षण निरूपण के पश्चात् अधर्म का लक्षण प्रस्तुत करते हैं; क्योंकि 'धर्मशब्द' सम्बन्धि शब्द होने के कारण वह दूसरे का भी स्मारक है। स्मृतिपदार्थ की उपेक्षा नहीं की जा सकती। जो वेद से बोधित होते हुए अनिष्ट का साधन हो, उसे अधर्म कहते हैं, जैसे—कलञ्जभक्षण आदि। कलञ्जभक्षणादि की अनिष्टसाधनता वेदों से बोधित है। वेद बताता है कि कलञ्जभक्षण अनिष्ट का साधन है। इसलिये उसका भक्षण नहीं करना चाहिए। अतः वह अधर्म है। यहाँ श्येन, वज्र, इषु आदि यागों को भी उदाहरण रूप से उपस्थित किया जा सकता है। ये याग वेदों से बोधित भी हैं और भावी अनिष्ट के साधन भी हैं। इसलिये ये स्वरूपतः धर्म होने पर भी फल की दृष्टि से अधर्म हैं। इस लक्षण में भी वेदबोधितत्व विशेषण है और अनिष्टसाधनताकत्व विशेष्य है। अधर्म पद के द्वारा लक्ष्य का निर्देश समझना चाहिए। अतः 'वेदबोधितत्वे सति अनिष्टसाधनताकत्वमधर्मत्वमिति लक्षणं फलितं भवति'। इसमें भी यदि विशेषणमात्र का उपादान किया जायेगा और विशेष्य का उपादान नहीं किया जायेगा, तो धर्मादि में भी लक्षण की अतिव्याप्ति होगी; क्योंकि धर्मादि भी वेद बोधित है। अतः विशेष्य पद की आवश्यकता है। विशेष्य पद का उपादान कर देने पर धर्मादि में अतिव्याप्ति नहीं हो सकती; क्योंकि धर्मादि अनिष्ट के साधन नहीं हैं।

यदि कहा जाय कि विशेष्यमात्र को ही लक्षण मान लिया जाय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तयोश्च वेदः, स्मृतिः, आचारश्च प्रमाणम्, तत्र वेदः

मिति प्रतिपादितम् । अतः कलञ्जभक्षणमधर्मः । तयोश्चेति । अत्र 'च'कारेण आत्मतुष्टिरपि विज्ञेया । तयोः धर्माऽधर्मयोर्ज्ञानविषये श्रुतिः (वेदः) स्मृतिः, शिष्टाचारश्च प्रमाणम् । अत्र 'आचार'पदेन 'शिष्टाचारो' ग्राह्यः । तत्र श्रुति-स्मृति-सदाचारेषु श्रुतिः (वेदः) स्वतन्त्रम्प्रमाणम्,

---

और विशेषण दल का परित्याग कर दिया जाय, तो वह कथन ठीक नहीं होगा, क्योंकि अनिष्टसाधनताकत्वमात्र को लक्षण मानने पर कण्टकादि में भी अतिव्याप्ति हो जायेगी। कण्टकादि-वेध से होने वाले अनिष्ट का कण्टकादि भी साधन है। इसलिये कण्टकादि में अनिष्ट साधनताकत्व रूप लक्षण समन्वित हो जायेगा। जब विशेषण पद का कथन कर दिया जाता है, तब अतिव्याप्ति दूर हो जाती है, क्योंकि कण्टकादि में वेद-बोधितत्व नहीं है। इसलिये उपर्युक्त अधर्म का लक्षण भी उचित ही है।

धर्म और अधर्म का निर्णय करने के लिये वेद, स्मृति तथा आचार प्रमाण माने जाते हैं। स्मृति का मन्वादि-प्रणीत स्मृतियाँ तथा आचार का सदाचार अर्थ है। इन तीनों प्रमाणों में वेद स्वतन्त्र तथा स्वतः प्रमाण है। उसकी प्रामाणिकता के लिये किसी अन्य प्रमाण की आवश्यकता नहीं होती। कारण यह है कि वेद किसी मनुष्य की रचना नहीं है। पुरुष-रचित होने पर उसमें भ्रम, विप्रलिप्सा आदि की शङ्का की जा सकती थी; किन्तु वह तो अपौरुषेय है। उसमें काठक आदि समाख्याएँ भी देखी जाती हैं, जिससे पौरुषेयत्व-भ्रम हो जाता है, तथा कुछ लोग 'वेदवाक्यं, पौरुषेयं, वाक्यत्वात्, कालिदासादिवाक्यवत्' इत्यादि अनुमान भी उपस्थित करके पौरुषेयत्व सिद्ध करने का प्रयास करते हैं; किन्तु ये युक्तियाँ पौरुषेयत्व की साधिका नहीं हो सकतीं, क्योंकि समाख्याएँ उत्कृष्ट प्रवचन के कारण हुई हैं। जिन लोगों ने जिन शाखाओं का विशेष रूप से प्रचार-प्रसार किया, उन्हीं लोगों के नाम से उनका ख्यापन होने लगा। अनुमान प्रमाण भी पौरुषेयत्व

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

स्वतन्त्रं प्रमाणम्, इतरौ तु वेदमूलकतया ।

अन्याऽनधीनमिति यावत् । इतराविति । इतरयोः स्मृत्याचारयोः प्रामाण्यं तु श्रुति(वेद)मूलकत्वेन मन्तव्यम् । स्मृत्याचारयोर्विरुद्धा श्रुतिर्यदि उपलभ्यते चेत् स्मृत्याचारौ अप्रमाणमिति तात्पर्यम् । वेदानुकूलौ स्मृत्याचारावेव प्रमाणमिति यावत् ।

स्मृतिर्नाम श्रुत्यर्थमवबुध्य विरचितो ग्रन्थः । यथा मनुयाज्ञवल्क्यपराशरादिविरचिता ग्रन्थाः । धर्माधर्मयोः वेद(श्रुति)स्मृतिसदा(शिष्टा)-चाराणां प्रमाणत्वेन प्रतिपादने 'वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्' इत्यादीनि वाक्यानि मूलम् । धर्ममूलं नाम धर्मे प्रमाणम्, शीलं नाम आचारः, तद्विदां वेदविदामित्यर्थः । एवं च श्रुति-स्मृति-सदाचाराणामेव धर्माधर्मयोः प्रामाण्यम्, तथा—

साधन में समर्थ नहीं हो सकता; क्योंकि कालिदासादि के ग्रन्थों में प्रत्येक सर्गों के अन्त में कर्त्ता का स्मरण किया जाता है; किन्तु वेदों में किसी भी कर्त्ता के नाम का स्मरण आज तक किसी को नहीं हो पाया है। यदि कर्त्ता होता, तो अवश्य ही उसके नाम का स्मरण किया जाता। नाम का स्मरण न हो पाने से उसका कर्ता कोई 'पुरुष' नहीं है। इस प्रकार प्रतिकूल तर्क से अनुमान भी परास्त हो जाता है। अनादि काल से अविच्छिन्न परम्परा के द्वारा वेदों का अध्ययन-अध्यापन चला आ रहा है। इस अध्ययन-अध्यापन परम्परा का कभी भी विच्छेद नहीं हुआ है। कहा भी है—'धाता यथापूर्वमकल्पयत्' इत्यादि। अतः अपौरुषेय होने के कारण वेदों का स्वतः प्रामाण्य सुरक्षित रहता है। इसलिये धर्म तथा अधर्म के प्रति उसका अन्यानपेक्षप्रामाण्य माना जाता है।

वेद मूलिका होने के कारण स्मृतियाँ भी धर्माधर्म के प्रति प्रमाण होती हैं। पौरुषेय होने के कारण विप्रलम्भकवाक्यों के समान मौलिक प्रामाण्य के अभाव की शङ्का भी नहीं की जा सकती; क्योंकि 'स्मृतिर्वेदमूला, वैदिकमन्वादिप्रणीतस्मृतित्वात्, उपनयनाध्ययनादिस्मृतिवत्' इत्यादि अनुमानों के द्वारा उनकी वेदमूलकता सिद्ध होती है। इसलिये वेदमूलिका होने के कारण स्मृतियाँ भी धर्माधर्म के प्रति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वेद-द्वैविध्यम्

(४) तत्र वेदो द्विविधः—मन्त्ररूपो ब्राह्मणरूपश्चेति

'श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधम्प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥'

इत्यत्र त्रयाणामन्ते तुर्यस्य स्वात्मप्रियत्वस्यापि धर्मे प्रामाण्यमित्यु प्रागपि। 'अतिरात्रे षोडशिनं गृह्णाति', 'नातिरात्रे षोडशिनं गृह्णा 'उदिते जुहोति', 'अनुदिते जुहोति' इत्यत्रापि स्वात्मप्रियत्वानुकू स्वीकर्त्तव्यम्, एतादृशविकल्पस्थले एव—स्वात्मप्रियत्वस्याभ्युपगमा अन्यथा विरोधो दुष्परिहरः स्यात्।

(४) 'तत्रे'ति। श्रुतिस्मृतिसदाचारात्मकेषु त्रिषु प्रमाणेषु श्रुतिरूपं प्रथमं स्वतन्त्रं (प्रमाणान्तरानपेक्ष) प्रमाणं श्रुतिः, तस्या द्वौ विभा

प्रमाणभूत हैं। वेद-विरोधी स्मृतियाँ धर्माधर्म के प्रति प्रमाण नहीं हो जैसे—शाक्यादिकों की स्मृतियाँ प्रमाण नहीं हुआ करतीं।

इसी प्रकार वेद-मूलक या स्मृतिमूलक आचार (सदाचार) धर्माऽधर्म के प्रति प्रमाण होता है। वैदिक शिष्टों के द्वारा किये वाले आचार धर्मनिर्णायक होते हैं। जो आचार शास्त्रप्रतिकूल हैं प्रमाण नहीं हो सकते, जैसे—दाक्षिणात्यों का मातुल-कन्या-परिण रूप आचार धर्मप्रमापक नहीं माना जाता। अर्थात् उसे धर्म नहीं सकते, क्योंकि स्मृतियों में उसकी निन्दा की गयी है। अज्ञानतः या किसी कारणवश मातुलकन्यापरिणय कर लिया जाय तो 'मातु सुतामूढ्वा' इत्यादि स्मृति से चान्द्रायणव्रत रूप प्रायश्चित्त का वि किया गया है। अतः वेद तथा स्मृति के विरुद्ध आचार, 'धर्म एवं अ के प्रमापक नहीं हो सकते। इस प्रकार, वेद, स्मृति तथा आचार धर्माधर्म के प्रति प्रामाण्य सिद्ध होता है ॥ ३ ॥

(४) उक्त प्रमाणों में से प्रथम प्रमाणभूत वेद दो प्रकार का मन्त्ररूप और ब्राह्मणरूप। अनुष्ठान के समय पदार्थों का स कराने में मंत्रों का उपयोग होता है अर्थात् याग आदि के अ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

तत्र प्रयोगकालीनार्थस्मरणहेतुतया मन्त्राणामुपयोग इति वक्ष्यते। प्रयोगोऽनुष्ठानं तत्कालीनेत्यर्थः। विधायकं वाक्यं ब्राह्मणम्। तच्छेषोऽर्थवादः। तस्य विधेयप्राशस्त्यप्रतीतिजन-

'मन्त्राः' 'ब्राह्मणश्च'ति। तत्र 'अनुष्ठानकाले अनुष्ठेयस्य अर्थस्य स्मारणमेव मन्त्राणामुपयोगः' इति अग्रे वदिष्यति ग्रन्थकारः[1]। मूलोक्त 'प्रयोगकालीन' शब्दस्यार्थः—'प्रयोगः'=अनुष्ठानम्, तत्कालीने=तस्मिन् समये। अन्यप्रमाणैरज्ञातस्य अर्थस्य यद् विधानं करोति,[2] तद् वाक्यं 'ब्राह्मणम्' इत्युच्यते। 'तच्छेषोऽर्थवाद' इति। विधायकवाक्यरूपस्य ब्राह्मणस्य यः शेषः स अर्थवादो विज्ञेयः। अर्थवादवाक्यानां ब्राह्मणे एवान्तर्भाव इत्यर्थः। 'तच्छेषो' नाम ब्राह्मणस्यैवान्यतमो भागः[3]। अर्थवादस्य प्रामाण्यमुपपादयति 'तस्ये'ति। इदमर्थवादवाक्यं विधिप्रतिपादनस्य अर्थस्य प्राशस्त्यं विज्ञाप्य विधिवाक्येन सह एकवाक्यताम्प्राप्नाति, अतः तस्यार्थ-

के समय मंत्रों के द्वारा ही पदार्थों का स्मरण करने का नियम है और उसी प्रकार यागादि अनुष्ठानों में मंत्रों का उपयोग भी होता है। इसका आगे निरूपण किया जायेगा। प्रयोग का 'अनुष्ठान' अर्थ है और 'तत्कालीन' का 'प्रयोग के समय' अर्थ है। विधायक अर्थात् कर्त्तव्यताबोधक वाक्यों को ब्राह्मण-वाक्य कहते हैं। उस ब्राह्मण-वाक्य का शेष (अंग) अर्थवाद-वाक्य कहलाता है। अर्थवाद-वाक्य ब्राह्मण-वाक्य का ही अंग होता है, वह कोई पृथक् नहीं है। वह अर्थवाद, विधेय पदार्थ की विशिष्टता का बोधक होता है और विशिष्टता-बोधन के द्वारा ही उसकी विधि-वाक्यों के साथ एक वाक्यता होती है। एक वाक्यता

१. प्रयोगसमवेतार्थस्मारका मन्त्रा इति मन्त्रनिरूपणकाले।

२. कर्तव्यतां बोधयतीत्यर्थः।

३. विधायकवाक्यरूपस्य ब्राह्मणस्य अङ्गमेव अर्थवादः, न तस्मात् पृथगित्यर्थः।

४. अर्थवादनिरूपणप्रसंगे।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नद्वारा विधिवाक्यैकवाक्यतया प्रामाण्यमिति वक्ष्यते ।

ब्राह्मणवाक्यभेदाः

(५) ब्राह्मणवाक्यं च अनेकविधम्—कर्मोत्पत्तिवाक्यम् गुणवाक्यम्, फलवाक्यम्, फलाय गुणवाक्यम्, सगुणकर्मोत्पत्तिवाक्यमित्यादि[1] भेदात् ।

कर्मोत्पत्ति-वाक्यम्

(६) तत्र येन वाक्येन—'इदं कर्म कर्तव्यम्' इति बोध्यते, तत्कर्मोत्पत्तिवाक्यम् । यथा-'अग्निहोत्रं जुहोति' इति

वादवाक्यस्य प्रामाण्यं भवतीति अग्रे वदिष्यति ग्रन्थकारः[2] ।

(५) ब्राह्मणवाक्यमिति । ब्राह्मणवाक्यस्य अनेके प्रकाराः सन्ति—तत्र कर्मोत्पत्तिवाक्यरूपं ब्राह्मणवाक्यम्, गुणवाक्यरूपं ब्राह्मणवाक्यम् फलवाक्यरूपं ब्राह्मणवाक्यम्, फलनिमित्तकगुणवाक्यरूपं ब्राह्मणवाक्यम् सगुणकर्मोत्पत्तिवाक्यरूपं ब्राह्मणवाक्यमिति बहुविधं ब्राह्मणवाक्यं भवति

(६) अनेकविधेषु ब्राह्मणवाक्येषु येन वाक्येन केवलम् 'इदं कर्म कर्त्तव्यम्' इत्येव प्रतिपाद्यते, अर्थात् फलसम्बन्धादिकमन्यत् किमपि न प्रतिपाद्यते, तत् वाक्यं 'कर्मोत्पत्तिवाक्य'मिति विज्ञेयम् । यथा—'अग्नि

होने के कारण ही अर्थवादवाक्य भी धर्माधर्म के प्रति प्रमाण होते हैं यह अर्थवाद-निरूपण के प्रसंग में विस्तृत रूप से बताया जायेगा ॥ ४ ॥

(५) वे ब्राह्मण-वाक्य अनेक प्रकार के होते हैं—कर्मोत्पत्तिवाक्य गुणवाक्य, फलवाक्य, फलाय गुणवाक्य, सगुणकर्मोत्पत्तिवाक्य, इत्यादि उसके भेद हैं । ग्रन्थ में प्रयुक्त 'आदि' पद का 'सफलकर्मोत्पत्ति वाक्य' अर्थ समझना चाहिए ॥ ५ ॥

(६) जिन वाक्यों से 'यह कर्म करना चाहिए' यह बताया जाता है, वे 'कर्मोत्पत्तिवाक्य' कहलाते हैं, जैसे—'अग्निहोत्रं जुहोति' इत्यादि । इस वाक्य का 'अग्निहोत्रहोमेन भावयेत्' अर्थात् 'अग्निहो

---

१. 'आदि'पदेन सफलकर्मोत्पत्तिवाक्यं विज्ञेयम् । २. अर्थवादनिरूपणप्रसङ्गे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

अत्राग्निहोत्रहोमः कर्त्तव्यतया विधीयत इति कर्मोत्पत्ति-वाक्यमिदम् ।

गुण-वाक्यम्

(७) विहिते कर्मणि तदङ्गतया द्रव्यदेवतादिविधायकं वाक्यं गुणवाक्यम् । यथा-'दध्ना जुहोति' इति । अत्र होम-मुद्दिश्याङ्गतया दधि विधीयते इति गुणवाक्यमिदम् ।

होत्रं जुहोति' इत्यनेन वाक्येन 'अग्निहोत्रसंज्ञको होमः कर्त्तव्यः' इति विधीयते, किन्तु स किमर्थं कर्त्तव्य इति न किमपि प्रतिपाद्यते । अत इदं वाक्यं 'कर्मोत्पत्तिवाक्य'मित्युच्यते ।

(७) प्रमाणान्तरेण प्राप्तं कर्म उद्दिश्य अङ्गरूपेण द्रव्यस्य, देवताया वा विधानं येन वाक्येन क्रियते तद् वाक्यं गुणवाक्यम् इत्युच्यते । यथा-'दध्ना जुहोति' इत्यनेन वाक्येन, 'अग्निहोत्रं जुहोती'ति वाक्येन विहित-मग्निहोत्रहोममुद्दिश्य 'दधि'रूपस्य गुणस्य (अंगस्य) विधानं क्रियते, इत्यतः 'दध्ना जुहोती'ति वाक्यं गुणवाक्यम् इत्युच्यते । किञ्चित् कर्म उद्दिश्य, अङ्गत्वेन (अंगरूपेण) यद् विधीयते, तद् 'गुण'शब्देनोच्यते ।

होम करना चाहिए' यह बताया गया है। इस वाक्य से अग्निहोत्र होम कर्तव्य रूप से विहित है। अर्थात् इससे 'अग्निहोत्र होम करना चाहिए' ऐसा प्रतीत होता है। अतः इसको 'कर्मोत्पत्तिवाक्य' कहते हैं ॥६॥

(७) कर्म का विधान हो जाने पर उस कर्म के अङ्ग रूप से द्रव्य तथा देवता आदि के विधायक वाक्य को गुणवाक्य कहते हैं। अभिप्राय यह है कि उत्पत्ति वाक्य से कर्म का विधान हो जाता है। और दूसरे वाक्यों से उन विहित कर्मों के अङ्गरूप से द्रव्यों का विधान किया जाता है। जिन वाक्यों से उन द्रव्यों का विधान होता है, वे ही गुण वाक्य कहलाते हैं, जैसे—'दध्ना जुहुयात्' इत्यादि। इसका 'दधिकरण-केन होमेन भावयेत्' यह अर्थ होता है। यहाँ 'अग्निहोत्रं जुहोति' से होम का विधान हो चुका है। उसी होम को उद्देश्य करके दधि रूप द्रव्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कर्माङ्गतया विहितत्वमेव दध्यादेर्गुणत्वम् ।

(८) अत्र होमस्योद्देश्यत्वं नाम—मानान्तरप्राप्तत्वे सति विधेयान्वयितया निर्देश्यत्वम् । तस्यैव मानान्तरप्राप्तस्य पुनः कथ्यमानरूपत्वमनुवाद्यत्वम्, दध्यादिगुणान्वयितया प्राधान्यञ्च ।

अतः उक्तवाक्ये विहितो 'दधि' इत्याख्यो द्रव्यपदार्थः, अग्निहोत्रसंज्ञकस्य होमस्य 'गुणः' (अङ्गम्) अस्ति ।

(८) मूले 'होममुद्दिश्य' इत्युक्तत्वात् उद्देश्यस्य अन्यान् धर्मान् कथयति 'अत्रे'ति । अत्र होमस्य उद्देश्यत्वं नाम प्रमाणान्तरावगतस्य पदार्थस्य पुनरन्येन विधेयेन सह सम्बन्धं कर्तुं निर्देशः इति 'उद्देश्यस्य' स्वरूपम् । 'दध्ना जुहुयात्' अत्र वाक्ये धात्वर्थो होमस्तादृशोऽस्तीति तस्य उद्देश्यत्वम् । 'तस्यैवेति' । प्रमाणान्तरेण ज्ञातस्य पदार्थस्य (होमस्य) पुनर्वाक्यान्तरेण कथनं नाम 'अनुवादः', इति अनुवादस्य स्वरूपम् । यथा—'अग्निहोत्रं जुहोति' इति वाक्येन ज्ञातस्य होमस्य, 'दध्ना जुहुयात्' इति वाक्यान्तरेण पुनरभिहितत्वात् 'दध्ना जुहोतीति वाक्ये' 'होमः' अनुवाद्यो भवति । 'दध्यादी'ति । पुनस्तस्यैव होमस्य दध्यादिगुणैः सह सम्बन्धः इति प्रधानस्य स्वरूपम् । अर्थात् विधेयस्य गुणस्यान्वयो यस्मिन् भवति तत्प्रधानमित्युच्यते । यथा 'दध्ना जुहुयात्' इत्यत्र दध्यात्मकस्य

का विधान किया गया है। इसलिये यह गुण वाक्य कहलाता है। होम आदि कर्मों के अङ्गरूप से विहित होना ही दधि आदि में गुणत्व है। अर्थात् अङ्गरूप से विहित होने के कारण ही 'दधि' गुण कहलाता है ॥७॥

(८) दूसरे प्रमाणों से प्राप्त (ज्ञात) होते हुए विधेयभूत होम आदि में अन्वयिरूप से निर्दिष्ट होना ही होम की उद्देश्यता है। अभिप्राय यह है कि होम का 'अग्निहोत्रं जुहोति' वाक्य से ज्ञान हो चुका है। उसके बाद विधेयभूत होम में उसके अन्वय का निर्देश किया गया है। अतः वह उद्देश्य होगा। 'अग्निहोत्रं जुहोति' रूप दूसरे प्रमाणों से ज्ञात हुए होम का ही पुनः 'दध्ना जुहोति' से कथन किया गया है। अतः कथित

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

(९) दध्यादेर्मानान्तराप्राप्तत्वादत्रैव विधेयत्वम्, होम-

गुणस्यान्वयो होमक्रियायां भवतीति 'होमः' प्रधानम्। अतः 'दध्ना जुहुयात्' इत्यस्मिन् वाक्ये 'होमः' उद्देश्यम्, अतस्तत्र (१) उद्देश्यत्वम्, (२) अनुवाद्यत्वम्, (३) प्राधान्यं चेति त्रयो धर्माः सन्ति। मीमांसाशास्त्रे इमे त्रयो धर्माः 'उद्देश्यगतं त्रिक'मित्युच्यते।

(९) केनाप्यन्येन प्रमाणेन दध्नः अप्राप्तत्वात् 'दध्ना जुहोति' इत्यस्मिन् वाक्ये 'दध्नः' विधेयत्वम्, तच्च दधि, होमसाधनत्वात् तत्र होमनिरूपितं 'गुणत्वम्' अस्ति। होमकर्त्ता च होमानुष्ठानार्थं तद् दधि स्वीकरोति, अतस्तत्र (दधनि) 'उपादेयत्वं' भवति। 'अज्ञातज्ञाप्यत्वं विधेयत्वम्' अनवगतः पदार्थो येन वाक्येनाभिधीयते, स (पदार्थः) तस्य वाक्यस्य 'विधेयो' भवति। यश्च विधेयो भवति, तत्र 'विधेयत्व'धर्मस्तिष्ठति। 'दध्ना जुहुयात्' इति वाक्यात् पूर्वं 'दधि', होमसाधनमित्यनवगतमासीत्। 'दध्ना जुहुयात्' इति वाक्यदर्शनेनैव दध्नो होमसाधनत्वमवगम्यते।

का पुनः कथन करने के कारण वह अनुवाद कहलाता है और उसमें अनुवाद्यत्व रहता है। दधि आदि गुणों का उस होम में अन्वय होने के कारण वह प्रधान भी हुआ तथा उसमें प्राधान्य (प्रधानत्व) रहता है। इसी उद्देश्यत्व, अनुवाद्यत्व तथा प्रधानत्वरूप तीनों के समूह का एक त्रिक कहा जाता है॥ ८॥

(९) इसी स्थल में दध्यादि द्रव्य (गुण) दूसरे प्रमाणों से ज्ञात नहीं होने के कारण, वह विधेय कहलाता है। अतः उसमें विधेयत्व रहता है। दधि होम का साधन है। अतः होम की अपेक्षा वह गुण (अप्रधान) है। इसलिये उसमें गुणत्व रहता है। पुरुष के द्वारा अनुष्ठीयमान होने के कारण वह उपादेय कहलाता है; क्योंकि उपादेय का ही अनुष्ठान होता है। उपादेय में उपादेयत्व रहता है। इस विधेयत्व, गुणत्व और उपादेयत्व को भी 'एक त्रिक' कहा जाता है। ये दोनों त्रिक परस्पर विरुद्ध हैं। इसलिये एकधर्मी में दोनों त्रिकों के प्राप्त होने पर 'विरुद्धत्रिकद्वयापत्ति'

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

साधनत्वाच्च होमापेक्षया गुणत्वम्, पुरुषेणानुष्ठीयमानत्वाच्चोपादेयत्वञ्च। अत्र मानान्तरप्राप्तत्वं मानान्तरज्ञातत्वम्, अप्राप्तत्वञ्चाज्ञातत्वमिति बोध्यम्।

फलवाक्यनिरूपणम्

(१०) उत्पन्नस्य कर्मणः फलाकाङ्क्षायां फलसम्बन्ध-

'उपकारकत्वं गुणत्वम्' यो यस्योपकारको भवति, स तस्य गुणो भवति, तत्र च गुणत्वं धर्मः। 'दध्ना जुहुयात्' इति वाक्ये दधनि, होमनिरूपितं गुणत्वं तिष्ठति, यतो हि दधि, होमोपकारकमस्ति। 'अनुष्ठीयमानत्वमुपादेयत्वम्' कञ्चित्पदार्थमुद्दिश्य यस्य पदार्थस्य अनुष्ठानं क्रियते स पदार्थः उपादेयो भवति, तत्र च उपादेयत्वधर्मः तिष्ठति। अतोऽत्र 'दधि' उपादेयमस्ति। अस्मिन् वाक्ये दधिपदार्थे (१) विधेयत्वं, (२) गुणत्वं, (३) उपादेयत्वं चेति त्रयो धर्माः सन्तीति कृत्वा इमे धर्माः 'विधेयगतत्रिक'-शब्देनोच्यन्ते।

(१०) उत्पत्तिवाक्यादवगतस्य कर्मणः फलजिज्ञासायां सत्यां तस्य कर्मणः फलेन सह सम्बन्धमभिधीयमानो विधिः 'फलविधि'रित्युच्यते। यथा—'अग्निहोत्रं जुहुयात्स्वर्गकामः', अनेन वाक्येन 'यः स्वर्गमिच्छति, स

नाम का दोष होता है। इस स्थल में 'पूर्वत्रिक' होम में तथा 'अन्त्यत्रिक' दधि में है। अतः यह दोष नहीं है। यहाँ मानान्तरप्राप्तत्व का प्रमाणान्तरज्ञातत्व अर्थ है, क्योंकि मानान्तर का प्रमाणान्तर तथा प्राप्त का ज्ञात अर्थ है। इसी प्रकार अप्राप्तत्व का अज्ञातत्व अर्थ समझना चाहिए॥ ९॥

(१०) उत्पत्ति-वाक्य से विहित कर्मों के फल की आकांक्षा होने पर फल के साथ सम्बन्ध को बतलाने वाला वाक्य 'फलवाक्य' या 'फलविधि' कहलाता है; जैसे—'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्यादि। यहाँ जो पुरुष स्वर्ग की कामना करता है वह उस स्वर्ग के साधन रूप से अग्नि

---

१. प्रधाने उद्देश्यत्वम्, अनुवाद्यत्वम्, प्रधानत्वं (प्राधान्यं) चेत्येकं त्रिकम्, अंगे च विधेयत्वम्, उपादेयत्वम्, गुणत्वम् चेत्यपरं त्रिकं भवतीति मीमांसक सम्प्रदायः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बोधको विधिः फलविधिः । यथा—'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति ।

अत्र 'यः स्वर्गं कामयते स तत्साधनत्वेनाग्निहोत्रनामकं होमं भावयेत्-कुर्यात्' इति अग्निहोत्रवाक्योत्पन्नस्य कर्मणः फलसम्बन्धो बोध्यत इति फलवाक्यमिदम् ।

फलाय गुणवाक्यम्

(११) प्राप्तं कर्माश्रित्य फलाय गुणविधौ[1] फलाय गुणवाक्यम् । यथा—'दध्नेन्द्रियकामस्य जुहुयात्' इति । अत्राग्निहोत्रवाक्योत्पन्नं होममाश्रित्येन्द्रियफलाय दधिरूपो गुणो

स्वर्गप्राप्तिसाधनभूतमग्निहोत्रं कुर्यात्' इति रीत्या 'अग्निहोत्रं जुहुयात्' इतिवाक्यावगतस्य कर्मणः स्वर्गफलेन सह सम्बन्धः प्रतिपादितः । अत इदं फलवाक्यमित्युच्यते ।

(११) चतुर्थं फलाय गुणवाक्यं प्रतिपादयति 'प्राप्तमिति' । प्राप्तं कर्म आश्रित्य फलोद्देशेन गुणस्य (अंगस्य) विधायकं वाक्यं 'फलाय गुणवाक्यम्' इत्युच्यते । यथा 'दध्नेन्द्रियकामस्य जुहुयात्' इत्यत्र 'अग्निहोत्रं जुहुयात्' इत्यग्निहोत्रहोमविधायकेन वाक्येन विहितं होममाश्रित्य इन्द्रियरूपफलोद्देशेन (इन्द्रियरूपफलस्य प्राप्तये) दधिरूपस्य गुणस्य (अङ्गस्य) विधानं कृतमस्ति । तेन 'दध्नेन्द्रियकामस्य जुहुयात्' इति वाक्यस्यायमर्थः

होत्र नामक होम की भावना करे अर्थात् उसका अनुष्ठान सम्पन्न करे—यह अर्थ होता है । इस प्रकार अग्निहोत्र के प्रतिपादक 'अग्निहोत्रं जुहोति' इस वाक्य से विहित होमरूप कर्म का स्वर्गरूप फल के साथ सम्बन्ध का बोध कराया जाता है । इसलिये इस वाक्य को फलवाक्य कहते हैं । होम 'साधन' है तथा स्वर्ग 'साध्य' है । इसलिये इन दोनों में साध्य-साधन भाव सम्बन्ध सिद्ध होता है ॥ १० ॥

(११) उत्पत्तिविधि से ज्ञात कर्म को निमित्त (आश्रित) करके फल

---

१. विधि'—पा०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विधीयते–'होमाश्रितेन दध्ना इन्द्रियरूपं फलं भावयेत्' इति। होमाश्रितेन होमकारणीभूतेनेत्यर्थः। अयमेव गुणफलविधिः गुणकामविधिरिति च उच्यते।

सगुणकर्मोत्पत्ति–वाक्यम्

(१२) द्रव्यदेवतादिगुणविशिष्टकर्मविधायकं वाक्यं सगुणकर्मोत्पत्तिवाक्यम्। यथा –'सोमेन यजेत' इति। अत्र सोमलता-

---

सम्पन्नः—'होमाश्रितेन (होमस्य साधनीभूतेन) दध्ना इन्द्रियरूप फलं सम्पादयेत्।' इदं 'फलाय गुणवाक्य'मेव 'गुणफलविधिः' अथवा 'गुणकामविधिः' इति उच्यते।

(१२) पञ्चमं सगुणकर्मोत्पत्तिवाक्यं प्रतिपादयति 'द्रव्येति।' यस्मिन् वाक्ये द्रव्य-देवतादिगुणैर्विशिष्टस्य (युक्तस्य) कर्मणः विधानं भवति, तद् वाक्यं 'सगुणकर्मोत्पत्तिवाक्यम्' इत्युच्यते। गुणेन सह वर्तते इति सगुणम्, सगुणं च तत् कर्म च सगुणकर्म, सगुणकर्मण उत्पत्तिः सगुणकर्मोत्पत्तिः, तस्याः प्रतिपादकं वाक्यं सगुणकर्मोत्पत्तिवाक्यम्। यथा —'सोमेन यजेत' इति वाक्येन सोमलतारूपद्रव्ययुक्तस्य यागस्य विधानं क्रियते। विशिष्टस्य विधाने सति विशेषणस्य विधानमर्थादेव सिध्यति। विशेषणस्य विधानार्थं कस्यापि भिन्नवाक्यस्य (वाक्यान्तरस्य) आवश्यकता न भवति। अयमभिप्रायः—'सोमेन यजेत' इत्यत्र सोमविशिष्टस्य यागस्य विधान-

---

के लिये गुण का विधायक वाक्य 'फलाय गुणवाक्य' कहलाता है, जसे—'दध्नेन्द्रियकामस्य जुहुयात्' इत्यादि।

इस वाक्य के द्वारा अग्निहोत्र के विधायक वाक्य से विहित होम का आश्रय करके इन्द्रियरूप फल के लिये दधिरूप गुण का विधान किया जाता है। इसका 'होमाश्रित दधि के द्वारा इन्द्रिय रूप फल की भावना करें' यह अर्थ है। होमाश्रित का तात्पर्य होमकारकीभूत[1] अर्थात् होमसम्पादकीभूत है। दधिरूप द्रव्य के बिना होम-सम्पादन (अनुष्ठान) सम्भव नहीं हैं। इसीलिये दधि को होम का सम्पादक माना जाता है। इसीको 'गुणविधि' तथा 'गुणकामविधि' भी कहते हैं॥ ११॥

(१२) द्रव्य, देवता आदि गुण तथा कर्म दोनों के विधायक वाक्य को

---

१. 'कारकी'—पा०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विशिष्टो यागो विधीयते। विशिष्टविधावपि विशेषणस्य अर्थाद्विधिः।

मस्ति तेन विशेषणरूपस्य सोमस्यापि विधानं स्वत एव जातम्।
('सोमेन यजेत' अनेन सोमलताविशिष्टो यागो विधीयते। इदं वैशिष्ट्यं च 'सोम'पदे मत्वर्थलक्षणया प्रदर्श्यते। 'सोमो गुणः, यागश्च अपूर्वः' इति उभयमपि 'सोमेन यजेत' इत्यनेनैव वाक्येन विधीयते। अतोऽयं विशिष्ट-विधिः। अत्र युक्तत्व-सहितत्व-विशिष्टत्वरूपोऽर्थः, मतुप्प्रत्ययस्य वर्तते। अयमर्थो लक्षणया प्राप्यते। 'सोमेन यजेत' इति वाक्यस्य 'सोमेन यागः कर्तव्यः' इत्यर्थं आपाततः समुचितः प्रतिभाति, तथापि शास्त्रीयमर्यादया स न समीचीनः। सोमः पृथक् पदार्थः, यागश्च पृथक् पदार्थः। उभयोरपि विधाने कर्तव्ये नैकेन वाक्येन तद् भवितुमर्हति। 'एकस्यैव विशेष्यस्य (प्रधानस्य) बोधकं यद् वाक्यं तदेकं वाक्यमित्युच्यते।' इति नियमा-नुरोधेन अत्रस्थले 'सोमेन यागं भावयेत्', 'यागेन इष्टं भावयेत्' इति द्वे वाक्ये कर्तव्ये स्याताम्। तथा कृते सति वाक्यभेददोषो भवेत्। किन्तु विशिष्टविधाने कृते सति विशिष्टयाग एव विधेयो भवति। विशिष्ट-श्चैक एव, न पृथक्-पृथक्। तेन वाक्यभेददोषो न भवति। विशेषणाऽभावे विशिष्टस्य विधानमेवाऽशक्यम्। विशिष्टविधिर्यद्यपि मुख्यतया विशेष्य-स्यैव विधानं करोति तथापि तद्विहितस्यानुष्ठानसिद्ध्यर्थं विशेषणस्य

'सगुण कर्मोत्पत्तिवाक्य' कहते हैं, जैसे—'सोमेन यजेत' इत्यादि। जहाँ पर एक ही वाक्य से गुण तथा कर्म दोनों का विधान होता है, वहीं 'सगुण-कर्मोत्पत्तिवाक्य' का व्यवहार होता है। यहाँ सोम पद से मत्वर्थ लक्षित होता है अर्थात् सोम पद का सोमवान् अर्थ किया जाता है। 'सोमेन यजेत' इस एक ही वाक्य से सोमरूप द्रव्य तथा कर्म दोनों का विधान होता है। सोम नाम की लता से युक्त याग का विधान किया जाता है। इसीलिये इस वाक्य का 'सोमवता यागेन इष्टं भावयेत्' यह अर्थ होता है। विशिष्ट विधि में भी विशेषण का अर्थात् विधान माना जाता है। सोम-विशिष्ट याग का विधान होने के कारण इसको विशिष्ट विधि भी कहते हैं।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सफलकर्मोत्पत्तिवाक्यम्

(१३) क्वचित् कर्मोत्पत्तिवाक्यमेव फलसम्बन्धबोधकमपि भवति। यथा—'उद्भिदा यजेत पशुकामः' इति। अत्रोद्भिन्नामको यागो वाक्यान्तराविहित एव पशुकामस्य पशुफलाय विधीयते इत्येकमेवेदं वाक्यं फलसाध[1]नयाग[2]विधायकम्।

विधानमगत्यैव गले पतितं भवति। विना विशेषणं विशिष्टस्य स्वरूपमेव न निष्पद्यते।)

(१३) कुत्रचित् कर्मोत्पत्तिवाक्यमेव, फलसंबंधबोधकमपि भवति, तच्च 'सफलकर्मोत्पत्तिवाक्यम्' इत्यपि व्यवह्रियते। पूर्वं ब्राह्मणवाक्यविभाजनावसरे ग्रन्थकृता 'इत्यादिभेदात्' इत्युक्तम्, तत्र 'आदि'-शब्देन किं तत् वाक्यं स्वीकार्यमिति जिज्ञासायां सत्यामत्र 'क्वचित्' इति ग्रन्थेन प्रतिपादितमस्ति। यथा—'उद्भिदा यजेत पशुकामः' अस्मिन् 'उद्भित्संज्ञकस्य यागस्योत्पत्तिवाक्ये पशुरूपफलस्य सम्बन्धोऽपि बोधितोऽस्ति। अत इदं वाक्यं पशुरूपफलसहितस्य यागस्य विधायकं वर्तते। 'उद्भिद्' इति नाम यस्य सः उद्भिन्नामकः। अयं यागः एतद्-वाक्यातिरिक्तेनअन्येन केनापि वाक्येन विहितो नास्ति। पशुरूपं फलं पशुफलं तस्मै पशुफलायेति विग्रहः। **फलसाधनयागविधायकमिति।** फलप्राप्तेः साधनतया यागस्य विधायकमित्यर्थः। केवलं याग एव न विधीयते, अपितु फलसाधनविशिष्टो यागो विधीयते इति तात्पर्यम्।

'विशिष्ट' को एक ही मानने से आपाततः दोनों के विधान प्रतीत होने पर भी वाक्यभेद नहीं माना जाता ॥ १२ ॥

(१३) कहीं-कहीं पर कर्मोत्पत्तिवाक्य ही फल के साथ सम्बन्ध का भी बोधक होता है, जैसे—'उद्भिदा यजेत पशुकामः' इत्यादि। इस वाक्य के द्वारा किसी अन्य वाक्य से अविहित ही पशु की कामना से युक्त पुरुष पशुरूप फल के लिये उद्भिद् नामक याग करे—ऐसा विधान किया जाता है। इस प्रकार यह एक ही वाक्य पशुरूप फल तथा उस फल के साधनभूत याग का भी विधायक होता है। इस उद्भिद् पद को कर्मनामधेय माना जाता है, अन्यथा मत्वर्थलक्षणा माननी पड़ेगी।

---

१. 'फलसाधनतया'—पा०   २. 'यागकर्म'—पा०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

प्रयोगविधिः

(१४) प्रधानविधिरेवाङ्गविधिभिरेकवाक्यतया महावाक्यतामापन्नः सन् सर्वाङ्गविशिष्टप्रधानप्रयोगविधायकत्वात् प्रयोगविधिरित्युच्यते । यथा—'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति । अत्र 'अग्निहोत्रहोमेन स्वर्गं भावयेत्'

---

(१४) अस्मिन् मीमांसाशास्त्रे चत्वारो विधयो निर्दिष्टाः सन्ति—तत्र (१) उत्पत्तिविधिः, (२) विनियोगविधिः, (३) अधिकारविधिः, (४) प्रयोगविधिरिति । तत्र कर्मस्वरूपमात्रप्रकाशकः 'अग्निहोत्रं जुहोति' इत्याकारकः उत्पत्तिविधिः । अंगताप्रकाशकं 'दध्ना जुहोति' इति वाक्यं विनियोगविधिः । कर्मानुष्ठाने कर्तुरधिकारप्रकाशकं 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति वाक्यम् अधिकारविधिः । तत्र कर्मोत्पत्तिवाक्यं, सगुणकर्मोत्पत्तिवाक्यं, सफलकर्मोत्पत्तिवाक्यं चोत्पत्तिविधिरेव । गुणवाक्यं, फलाय गुणवाक्यं च विनियोगविधिरेव । फलवाक्यं च अधिकारविधिरित्येवं ज्ञातव्यम् । ग्रन्थकृता निर्दिष्टानां पञ्चविधविधिवाक्यानां मध्ये चतुर्णां स्वरूपस्य तत्तदुल्लिखितेषु स्पष्टत्वात् अवशिष्टस्य प्रयोगविधेर्निरूपणं करोति—'प्रधाने'ति ।' प्रधानस्य कर्मणो विधिः 'प्रधानविधि'रित्युच्यते । प्रधानकर्मोपकारकस्योपकरणस्य विधायको विधिः अंगविधिरित्युच्यते । अंगविधिवाक्यैः सह एकवाक्यतामवाप्य महावाक्यतां लभमानः प्रधानविधिरेव सम्पूर्णांगविशिष्टस्य प्रधानकर्मणो विधायको भवतीति कृत्वा स एव 'प्रयोगविधि'रित्युच्यते । यथा—'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्यस्मात्प्रधानविधिबोधकाद्वाक्यात् 'अग्निहोत्रहोमेन स्वर्गं सम्पादयेत्' इत्यर्थः

इस वाक्य से केवल याग का ही नहीं, अपितु फल साधानताविशिष्ट याग का विधान किया जाता है ॥१३॥

(१४) उत्पत्तिविधि को ही प्रधानविधि कहते हैं । इस प्रधानविधि की अङ्गविधियों के साथ एकवाक्यता होती है । उसके साथ एकवाक्यता होने पर महावाक्यता को प्राप्त होता हुआ सभी अङ्गों से युक्त प्रधान प्रयोग का विधायक होने के कारण वही प्रयोगविधि कही जाती है । उदाहरण—'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्यादि । इस वाक्य का 'अग्निहोत्र होम

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्यर्थः प्रतीयते । भावयेत्—उत्पादयेत्, कुर्यात् इति यावत् । अत्र 'कथमनेन होमेन स्वर्गं कुर्याद्' इति कथम्भावाकांक्षा जायते । यथा--'कुठारेण द्वैधीभावं कुर्यात्' इत्युक्ते भवत्याकांक्षा 'कथमनेन द्वैधीभावं कुर्याद्' इति । तत्र 'उद्यमननिपातनादिसहायेन इति गम्यते ।

तद्वदत्रापि 'अग्निं प्रणयति', 'अग्निषु समिध आदधाति' इत्याद्यङ्गविधिविहितप्रणयनसमिदाधानायतनशोधनादिकाङ्गकलापजनितोपकारसहितेन अग्निहोत्रहोमेन स्वर्गं कुर्यात् इति प्रकरणकल्पितेन होमवाक्येन स्वर्गाय साङ्गोऽग्निहोत्रप्रयोगो विधीयत इत्येतादृशः प्रयोगविधिः ।

प्रतीयते । इत्यर्थप्रतिपादनेनेदं सूचितं यत् प्रधानविधिवाक्यस्य अंगविधिवाक्येन सह एकवाक्यताकरणे आकांक्षा आवश्यकी भवति ।

से स्वर्ग की भावना करे' यह अर्थ होता है । 'भावयेत्' पद का 'उत्पादयेत्' अर्थात् उत्पन्न करे, सम्पादित करे, अर्थ होता है । यहाँ पर 'इस होम के द्वारा कैसे स्वर्ग उत्पन्न करना चाहिए' इस प्रकार की कथम्भावाकांक्षा उत्पन्न होती है । इस प्रश्न के द्वारा स्वर्गोत्पादन के प्रकार की जिज्ञासा की जा रही है । इतिकर्त्तव्यताकांक्षा को ही कथम्भावाकांक्षा कहते हैं । उदाहरण— कोई पुरुष आदेश देता है कि 'कुठार से द्वैधीभाव का सम्पादन करो' । उसके ऐसा कहने पर सुनने वाले पुरुष को आकांक्षा (जिज्ञासा) होती है कि 'इस कुठार के द्वारा कैसे अर्थात् किस प्रकार से द्वैधी भाव करें' । उसके बाद उपदेष्टा पुरुष बताता है कि उद्यमन (उठाना) और निपातन (गिराना) की सहायता से इस कुठार के द्वारा द्वैधीभाव (दो टुकड़ा) किया जाता है—इस अर्थ की प्रतीति होती है ।

तद्वदिति—तद्वत्—उपर्युक्त दृष्टान्त के अनुसार इस स्थल में भी 'अग्निं प्रणयति' 'अग्निषु समिध आदधाति' इत्यादि अङ्गविधियों से विहित अग्नि-प्रणयन, समिधाओं का अग्नि में आधान तथा आयतन-शोधन आदि अङ्ग-समूह से उत्पन्न हुए उपकार के सहित 'अग्निहोत्र होम के द्वारा स्वर्ग की भावना करे' इस प्रकार प्रकरण-कल्पित महावाक्य के

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शंका—फलविधेरुदाहरणप्रदर्शनावसरे उपर्युक्तस्यैव वाक्यस्य 'स्वर्गं-कामयमानेन (स्वर्गेच्छुना) पुरुषेण अग्निहोत्रहोमः कर्तव्य इत्यर्थो वर्णितः, किन्तु अत्र तावत् 'अग्निहोत्रहोमेन' अर्थात् अग्निहोत्रहोम-मनुष्ठाय स्वर्गः सम्पादनीय इत्यर्थः कथं वर्ण्यते ?

समा०—वस्तुतोऽयमेवार्थः समुचितः, यतः 'स्वर्गकाम'पदस्य लक्षणया केवलं 'स्वर्गं' इत्येवार्थः कर्तव्योऽस्ति । 'स्वर्गकामः' इति प्रथमान्तं पदं 'स्वर्गकामम्' इति द्वितीयार्थे, 'अग्निहोत्रम्' इति द्वितीयान्तं पदं च 'अग्निहोत्रेण' इति तृतीयार्थे विज्ञेयम् । पूर्वं तावत् बालानां सुखावबोधार्थं केवलं शब्दार्थो विज्ञापित आसीत् । 'भावयेत्' इत्यस्यार्थः, उत्पादयेत्, कुर्यात् इत्यवगन्तव्यः । उभावपि शब्दौ समानार्थकौ स्तः । प्रायः आख्यातार्थस्य भावनापदेन प्रतिपादनं क्रियते मीमांसकैः । प्रकृत-मनुसरामः—होमेन स्वर्गः कथं सम्पादनीयः ? इत्याकारिका 'आकांक्षा' एव 'कथंभावाकांक्षा अथवा इति कर्तव्यताकांक्षा' इत्युच्यते । यथा—'कुठारेण द्वैधोभावं कुर्यात्' इत्युक्ते सति 'केन प्रकारेण (कया पद्धत्या)

द्वारा स्वर्ग के लिए अङ्ग-सहित अग्निहोत्र के प्रयोग (अनुष्ठान) का विधान किया जाता है—यही प्रयोग विधि है । गार्हपत्य से आहवनीय प्रदेश के प्रति अग्नि को ले जाना ही 'अग्नि' प्रणयन-कहलाता है । अङ्गों के समूह को ही 'इत्थम्भाव', 'कथम्भाव' तथा इति-कर्त्तव्यता कहा जाता है । कर्त्तव्य =अनुष्ठेय यागादि के इति=प्रकार अर्थात् अनुष्ठान की पद्धति को 'इति-कर्त्तव्यता' कहते हैं । 'अग्निहोत्र-होम' प्रधान है तथा 'प्रणयन' आदि सभी अङ्ग हैं ।

शङ्का—मीमांसादर्शन में उत्पत्ति, विनियोग, अधिकार तथा प्रयोग के भेद से चार प्रकार की विधियाँ बतलाई गयी हैं । इस ग्रन्थ में कर्मोत्पत्ति-वाक्य इत्यादि भेद उससे भिन्न ही बतलाये गये हैं । दोनों की सङ्गति कैसे होगी ?

समाधान—मीमांसादर्शन में प्रतिपादित विधियाँ तथा इस ग्रन्थ में निर्दिष्ट ब्राह्मण-वाक्यों के भेद परस्पर महत्त्वपूर्ण नहीं हैं; अपि तु तत्त्वतः

३ मी०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अङ्गजातमेवेत्थम्भाव इति, इतिकर्त्तव्यता इति च उच्यते। अत्राग्निहोत्रहोमः प्रधानं, प्रणयनादिकं सर्वम् अङ्गम्।

द्वैधीभावं कुर्यात् इति जिज्ञासा (आकांक्षा) उत्पद्यते। तदा 'कुठारस्य उद्यमनं निपातनं च कृत्वा' द्वैधीभावः कर्तव्यो भवतीतिज्ञायते। तथैवात्र अग्निहोत्रप्रकरणे 'गार्हपत्यात्' आहवोय-दक्षिणाग्निकुण्डयोरग्निरानेयः, 'अग्नो च समिधः प्रक्षेपणीयाः' इत्यादिभिः पठितैरंगविधिभिः येषां विधानं कृतमस्ति, एतादृशैः अग्निप्रणयन–समिदाधानाऽयतनशोधनादीनां अंगानां साहाय्येन अग्नौ होमस्य अनुष्ठानं सम्पाद्य स्वर्गः सम्पादनीयः। एतादृशस्य प्रधान-कर्मणः इतिकर्तव्यताकांक्षावशात् कल्पितामेकवाक्यतामवलम्ब्य स्वर्गार्थिं सर्वांगयुक्तस्य अग्निहोत्रकर्मणो विधानं भवतीतिकृत्वाऽयम्प्रयोग-विधिरित्युच्यते। प्रधानकर्मणोऽङ्गसमूह एव 'इत्थंभाव' शब्देन इतिकर्तव्यताशब्देन वोच्यते। अत्रस्थले 'अग्निहोमः' प्रधानं कर्म, अग्निप्रणयनादिकं च तस्यैव प्रधानकर्मणः अङ्गभूतं विद्यते। मूले 'उद्यमन-निपातनादिसहायेन' इत्यस्य अग्रे 'कुठारेण द्वैधीभावं कुर्यादि' त्यध्याहारः कर्तव्यः। तथैव 'इति' शब्दस्याग्रे 'महावाक्यम्' इति अध्याहारः कल्पनीयः। एवंच 'कुठारेण द्वैधीभावं कुर्यात्' इति प्रधानवाक्यस्य 'कुठारमुद्यच्छति,' 'कुठारं निपातयति' इत्यादिभिरंगवाक्यैः सह आकांक्षाबलेन परस्परान्वये सति एकवाक्यतायां सत्यां 'उद्यमन-निपातनादिक्रियायुक्तेन कुठारेण काष्ठस्य द्वैधीभावं कुर्यात्' इति महावाक्यं निष्पद्यते। कथंभावाकांक्षायां सत्यां प्रधानविधिसमीपस्थितैरङ्गविधिभिः

विचार करने पर दोनों एक ही प्रतीत होते हैं। केवल पृथक् रूप से स्पष्ट ज्ञान कराने के लिये प्रस्तुत पद्धति अपनायी गयी है। उन्हीं चारों विधियों में इनका अन्तर्भाव हो जाता है। उदाहरण—उत्पत्ति विधि में ही कर्मोत्पत्ति-वाक्य, सगुणकर्मोत्पत्तिवाक्य तथा सफलकर्मोत्पत्तिवाक्य अन्तर्भूत हो जाते हैं। विनियोगविधि में गुणवाक्य तथा फलाय गुणवाक्य का अन्तर्भाव हो जाता है। अधिकारविधि और फलवाक्य दोनों एक ही

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

फलापूर्वकल्पना

(१५) नन्विदमनुपपन्नम् । आशुतरविनाशिनां कर्मणां कालान्तरभाविस्वर्गादिफलसाधनत्वानुपपत्तेरिति चेत्मैवम् । विहितनिषिद्धकर्मणां तत्तद्वाक्यैस्तत्तत्फलसाधनत्वेऽवगते

सहैवैकवाक्यता भवति । अन्यप्रकरणस्थितैरंगविधिवाक्यैः सह एकवाक्यता न भवतीत्यर्थः ।

(१५) 'अग्निहोत्रं जुहुयात् स्वर्गकामः' अग्निहोत्रकर्मणा स्वर्गः सम्पादनीयः—इति यदुक्तं; तन्न संभवति, अनुपपन्नत्वात् इति शंकते 'नन्विति ।' 'इदम्' अग्निहोत्रादेः स्वर्गसाधनत्वम् ।

शंका—यागादिकर्मणां क्षणिकत्वात् कालान्तरे (मरणानन्तरं) स्वर्ग-नरकादीनां प्राप्तौ तत्कर्म कथं कारणं भवेत् ? अर्थात् अग्निहोत्रादि-कर्म, स्वर्गादिफलानां साधनमिति कथनमनुचितं प्रतीयते । यतो हि 'कार्यनियतपूर्ववृत्तिकारणम्' इति 'कारणस्य' लक्षणम् । इति लक्षणानु-

---

हैं । इन विधियों के सहित प्रयोगविधि ही प्रधान विधि है । इसीलिये ग्रन्थकार श्रीकृष्णयज्वा ने केवल प्रयोगविधि का ही निरूपण किया है ।

शङ्का—अग्निहोत्र होम को स्वर्ग का साधन बताया गया है किन्तु 'अग्निहोत्र' न स्वर्ग का साधन बन सकता है और न 'स्वर्ग' अग्निहोत्र का साध्य बन सकता है । कारण यह है कि 'साध्य' एवं 'साधन' बनने के लिये अव्यवहितोत्तरत्व तथा अव्यवहितपूर्वत्व आवश्यक होता है । 'साधन' में अव्यवहितपूर्वत्व तथा 'साध्य' में अव्यवहितोत्तरत्व जब रहता है तभी साध्यसाधनभाव, बन पाता है, अन्यथा नहीं । स्वर्ग रूप साध्य के अव्यवहित-पूर्व अग्निहोत्र को अवश्य रहना चाहिए; किन्तु सभी कर्म आशुतर-विनाशी अर्थात् तृतीय क्षण में नष्ट होते हैं, क्योंकि सभी पदार्थ प्रथम क्षण में उत्पन्न होते हैं, दूसरे क्षण में स्थित रहते हैं तथा तीसरे क्षण में विनष्ट हो जाते हैं । उसके बाद उत्पन्न होने वाले कर्मों के प्रति इनकी अव्य-वहितपूर्व स्थिति नहीं मानी जा सकती । अतः उनमें साध्यसाधनभाव का

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आशुतरविनाशिनां कर्मणां कालान्तरभाविफलसाधनत्वोपपत्त्यर्थमन्तरा पुण्यपापरूपमपूर्वं कल्प्यते। ततश्च यागादेरपूर्वद्वारा स्वर्गसाधनत्वं, न साक्षात्। तदेव फलापूर्वम्।

सारेण कारणस्य कार्यपूर्वक्षणे स्थितिरावश्यिका। अतोऽयं निरूपित साध्य-साधनभावोऽनुपपन्न इति शंकाकर्तुरभिप्रायः। 'स्वर्गादी'त्यत्रादिपदेन अनिष्टार्थो ग्राह्यः।

समा०—अत्र प्रदर्शितस्य साध्य-साधनभावस्य अनुपपत्तिर्नास्ति। यतो हि शास्त्रविहितानि निषिद्धानि वा कर्माणि, तत्तत्फलसाधनानीति तत्तद्वाक्यैरवबुध्य क्षणिकानां कर्मणां कालान्तरभाविफलसाधनत्वसिद्धयर्थं (कर्म-फलयोः साध्यसाधनभावसंबंधमुपपादयितुं) कर्म-फलयोर्मध्ये पुण्यरूपस्य पापरूपस्य वा अपूर्वस्य कल्पना क्रियते। अपूर्वस्य कल्पनाकरणेन यागादिकर्माणि क्षणिकान्यपि स्व-जन्यापूर्वद्वारा फलसाधनानि भवन्ति, न साक्षात्। तेन साध्य-साधनभावसम्बन्धः सूपपादो भवति। इदमपूर्वमेव फलापूर्वशब्देनोच्यते। पूर्वोत्तराङ्गयुक्तं प्रधानकर्मैव

सम्भव नहीं है। जिस काल में याग का अनुष्ठान होता है, उस काल के तुरन्त बाद स्वर्ग की प्राप्ति नहीं देखी जाती; क्योंकि स्वर्ग तो मरने के बाद मिलना है, तब उस समय याग की स्थिति नहीं है; क्योंकि वह पहले ही विनष्ट हो चुका है। इसलिये स्वर्गादिफल के प्रति अग्निहोत्रादि कारण नहीं बन सकते। अतः पूर्वोक्त साध्यसाधनभाव का प्रतिपादन समुचित नहीं है।

समाधान—ऐसी शङ्का करना समुचित नहीं है। कारण यह है कि वेद-वाक्यों के द्वारा कर्मों का विधान किया गया है अर्थात् तत्तत् फलों के प्रति तत्तत् वेद-वाक्य के द्वारा प्रतिपादित 'कर्म' साधन रूप से ज्ञात होता है। उसकेबाद कालान्तर में होने वाले भावी फलों के प्रति आशुतर विनाशी कर्मों की साधनता की उपपत्ति के लिये साध्य तथा साधन के बीच में पुण्य एवं पापरूप अपूर्व की कल्पना करते हैं। उसके पश्चात् स्वर्गादिफलों के प्रति मध्यवर्त्ती अपूर्व के द्वारा यागादि में

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्करणत्वञ्च प्राच्योदीच्याङ्गविशिष्टस्य प्रधानस्य भवति, न प्रधानमात्रस्य प्रधानमात्रादेव फलापूर्वजनने फलस्यापि

तस्य फलापूर्वस्य करणं (जनकं) भवति। केवल (पूर्वोक्ताङ्गरहितं) प्रधानकर्म, फलापूर्वस्य उत्पादकं (जनकं) न भवितुमर्हति। केवलं प्रधानकर्मैव फलापूर्वजनकं यदि भवेत्, तर्हि फलमपि तस्मादेव संभविष्यति। तदा अंगभूतानि यावन्ति कर्माणि निरर्थकानि स्युः। शास्त्रविहितानि कर्माणि यावन्ति सन्ति, तानि सर्वाणि सप्रयोजनानि, न निरर्थकानि इति शास्त्रडिण्डिमः। अतः सर्वाङ्गयुक्तं प्रधानकर्मैव फलापूर्वजनकं भवति, तत्फलापूर्वद्वारैव क्षणिकान्यपि कर्माणि फलसाधनानि भवन्तीति सिध्यति। यच्चोक्तं कारणेन, कार्यपूर्ववर्तिनाभवितव्यमिति, तथापि तस्य कारणस्य परोक्षत्वे अपरोक्षत्वे वा न कोऽपि नियमः। तत्कारणं साक्षात् परम्परया वापि भवितुमर्हति। यथा घटोत्पत्तिस्थले दण्डेन चक्रम्परिभ्राम्य दण्डे अपसारितेऽपि घटोत्पत्तिर्भवतीति प्रत्यक्षमेव। चक्रभ्रमणेन दण्डस्य यः साक्षात्सम्बन्धः, तं मनसिकृत्वैव 'दण्डः' घटकारणम् इति व्यवह्रियते सर्वैः। तथैवात्रापि विज्ञेयम्। कल्प्यमानमिदमपूर्वं वक्ष्य-

---

साधनता सिद्ध होती है, क्योंकि वह यागादि स्वर्गादि के प्रति साक्षात् साधन नहीं बन सकता। इसी को 'फलापूर्व' कहते हैं। यह 'अपूर्व' अङ्गों के साथ प्रधान के अनुष्ठान से उत्पन्न होता है। वह फल का जनक होने से 'फलापूर्व' कहलाता है। प्रधान याग के पूर्वभावी तथा पश्चाद्भावी अङ्गों से भी अङ्गापूर्व की उत्पत्ति होती है, परन्तु वे स्वयं फल के साधक नहीं होते। वे सभी प्रधानापूर्व के साथ मिलकर ही फल के जनक होते हैं। इसीलिये फल के प्रति प्रधानयाग के अनुष्ठान से पहले (प्राच्य) तथा उसके पश्चात् (उदीच्य) अनुष्ठेय अङ्गों के साथ ही वह प्रधानयाग 'फल' के प्रति कारण होता है, केवल प्रधानयाग नहीं। कारण यह है कि केवल प्रधानयाग से ही फलापूर्व की उत्पत्ति मान लेने पर केवल उसी के 'अपूर्व' से फल की भी सिद्धि हो जायेगी। इस परिस्थिति में प्रकरण-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत एव सिद्धेरङ्गानामानर्थक्यापत्तेः ।

उत्पत्त्यपूर्वकल्पना

(१६) ननु सर्वाङ्गविशिष्टस्य प्रधानस्याऽपूर्वजनकत्व-मुक्तम् । तच्चाशुतरविनाशिनः प्रधानस्याङ्गसाहित्याभावान्न सम्भवतीति चेन्न । प्रधानकर्मणः स्वरूपेणाङ्गसाहित्याभावेऽपि

माणेभ्यः अपूर्वेभ्यो भिन्नमिति ज्ञापयितुं 'इदमपूर्वं' फलापूर्वमिति विशिष्ट संज्ञयाभिधीयते ।

(१६) अत्र शङ्कते—सम्पूर्णाङ्गसहितात् प्रधानकर्मणः सकाशाद पूर्वोत्पत्तिर्भवतीति यदुक्तं, तन्न सम्भवतीत्याह 'नन्विति' । 'अपूर्व-जनकत्वं' फलापूर्वजनकत्वमितियावत् । अयुक्तत्वे हेतुमाह -'तच्चेति'। शीघ्रतरविनाशिनः प्रधानस्य, अङ्गानाञ्च साहित्यमेव न संभवति। अंगकर्मणः प्रधानकर्मणश्च साहित्यं रूप-घटयोः-समवायसम्बन्धेनेव न भवति इत्यर्थः । घटे रूपं नित्यं तिष्ठति, घटातिरिक्तं तद्रूपं दर्शयितुं न शक्यते यथा, तथा अङ्गकर्म, प्रधानकर्मणि न तिष्ठति, यतोहि क्रियाद्वयं परस्परसमवायेन न तिष्ठति । संयोगेनापि तत्साहित्यं न सम्भवति, यतोहि द्वयोः क्रिययोः संयोगः कथं भवितुमर्हति ? संयोगस्तु द्रव्य-द्रव्ययोरेव भवतीति प्रसिद्धम् । अतोऽत्र द्वयोः क्रिययोरेकस्मिन् काले वर्तमानत्वरूप स्वरूपसाहित्यं स्वीकर्तव्यं, परं तदपि न संगतं भवति । यतो हि अंगकर्म प्रधानकर्म चोत्पत्तिसमनन्तरमेव विनश्यति । एवञ्च प्रधानाङ्गकर्मणो

पठित अङ्ग निष्प्रयोजन हो जायेंगे । अतः अङ्गापूर्व के साथ साथ ही प्रधानापूर्व को स्वर्गादि फलों के प्रति कारण माना जाता है ।

(१६) शङ्का—सभी अङ्गों से युक्त प्रधान की अपूर्वजनकता का प्रतिपादन करना ठीक नहीं है, क्योंकि प्रधान कर्म भी शीघ्र ही समाप्त हो जाता है । यहां भी आशुतर विनाशी शब्द का तृतीयक्षणवृत्तिध्वंसप्रति-योगीअर्थ है । प्रधानकर्म के अनुष्ठान से पहले ही कुछ अङ्गों का अनुष्ठान किया जाता है । जब प्रधान का अनुष्ठान होता है, उस समय अङ्गों का अनुष्ठान समाप्त हुआ रहता है । उसी प्रकार कुछ अङ्गों

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उत्पत्त्यपूर्वद्वारा साहित्यसम्भवात्। प्रधानस्य सर्वाङ्गसाहित्य-सिद्धयर्थं प्रधानकर्म-परमापूर्वयोर्मध्ये प्रधानमात्रजन्यमुत्पत्ति-नामकं किञ्चिदपूर्वमस्तीत्यङ्गीकारात्। एवमङ्गानामपि परस्परसहितानामेव प्रधानोपकारकत्वात्तेषां स्वरूपेण साहित्याभावात् तत्रादुत्पत्त्यपूर्वद्वारा साहित्यं बोध्यम्।

साहित्यमसंभवमेवेतिशङ्काकर्तुरभिप्रायः। ध्वस्तानां [1]प्राच्याङ्गानां प्रधान-साहित्यं ध्वस्तस्य प्रधानस्योदीच्या[2]ङ्गसाहित्यं न संभवतीतितात्पर्यम्।

समा०—पूर्वपक्षिणा एवं न मन्तव्यमिति सिद्धान्ती समाधत्ते—प्रधान-कर्मण इति। प्रधानकर्मणा अंगकर्मसाहित्यं यद्यपि स्वरूपतो न लभ्यते, तथापि प्रधानकर्म, उत्पत्त्यपूर्वद्वारा अंगकर्मसाहित्यं लभते। यतो हि अंगकर्मसाहित्यलाभार्थं, प्रधानकर्म–फलापूर्वयोर्मध्ये केवलं प्रधानकर्मणः सकाशादुत्पन्नं 'उत्पत्ति' संज्ञकमपूर्वं (उत्पत्त्यपूर्वम्) भवतीतिमीमांसक-सिद्धान्तः। तद्वत् अंगकर्माण्यपि परस्परं सन्निहितानि भूत्वैव प्रधानकर्मणः उपकारकाणि भवन्ति। किन्तु तान्यपि सर्वाणि अङ्गकर्माणि, एकस्मिन्नेव

अनुष्ठान प्रधान के पश्चात् होता है। इस परिस्थिति में जिस समय अङ्गों का अनुष्ठान होगा, उस समय प्रधान की विद्यमानता नहीं होगी। इसलिये किसी भी अङ्ग के साथ प्रधान का साहित्य (सह भाव) सम्भव नहीं होता है। दोनों के साहित्य का सम्पादन न होने के कारण अङ्गों को प्रधान का सहायक नहीं कह सकते। अतः अङ्गापूर्व की सहायता से 'प्रधानापूर्व' याग के फल का सम्पादक होता है—यह कहना असंगत है।

समाधान—उपर्युक्त शङ्का समुचित नहीं है। यद्यपि प्रधान कर्मों का अंगों के साथ साक्षात् साहित्य नहीं हो पाता है, तथापि याग से उत्पन्न होनेवाले अपूर्व के द्वारा दोनों का साहित्य सम्भव होता है।

---

१. प्रधानहोमतः पूर्वमनुष्ठेयमङ्गम्प्राच्यम्।
२. प्रधानहोमादूर्ध्वमनुष्ठेयमङ्गमुदीच्यम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अङ्गानां प्रधानोपकारकत्वं नाम प्रधानस्य फलापूर्वजनन-सामर्थ्योन्मुखीकरणमेव ।

काले न प्रत्यक्षाणि भवन्ति। अतः तत्तदङ्गकर्मभ्य एकमेकं उत्पत्त्यपूर्वं प्रकल्प्य तदपूर्वद्वारा सर्वेषामङ्गकर्मणां परस्परं प्रधानकर्मणा सह सान्निध्यं भवतीति विज्ञेयम्। 'अङ्गानामिति'। अङ्गकर्मणां प्रधानोपकारकत्वं (प्रधानोपयोगित्वं) नाम प्रधानकर्मणि फलापूर्वनिर्माणसामर्थ्यं विज्ञाप्य तत्सम्मुखीकरणम्। फलापूर्वे उत्पत्त्यपूर्वेचायं भेदः—साङ्गप्रधानकर्मणः सकाशादुत्पद्यमानं यदपूर्वं, तत् फलापूर्वम्। अंगरहितात् प्रधानकर्मणः सकाशात् तदनुष्ठानसमाप्तिसमनन्तरक्षणे एव उत्पद्यमानमपूर्वं 'उत्पत्त्यपूर्वम्' इति। अनेकेषामङ्गानां साहित्यलाभार्थं तत्तदङ्गानुष्ठानसमनन्तरक्षणे तत्तदङ्गानुष्ठानजनितं अपूर्वं 'अङ्गोत्पत्त्यपूर्वम्' इत्युच्यते। प्रधानकर्मणा सह सर्वाङ्गसान्निध्यार्थं प्रधानोत्पत्त्यपूर्वस्य कल्पना क्रियते। सर्वांगसहितस्य प्रधानस्य स्वर्गादिफलसाधनतासिद्धयर्थं फलापूर्वस्य कल्पना क्रियते। इदं फलापूर्वमेव 'परमापूर्वं' शब्देनोच्यते। एवं त्रीणि अपूर्वाणि कल्प्यन्ते। यथा वायुपुत्रे हनुमति सागरोल्लंघनस्य सामर्थ्यं अस्तीति जाम्बवता प्रथमं प्रकटितं, तदा स

याग-जन्य अपूर्व को ही 'उत्पत्त्यपूर्व' कहते हैं। जब अंगापूर्व के साथ प्रधानापूर्व का सम्मेलन हो जाता है, तब वही सम्मिलित अपूर्व 'परमापूर्व' कहलाता है और वही 'फल' का जनक होता है। सभी अंगों के साथ प्रधान के साहित्य की सिद्धि के लिए प्रधानकर्म और परमापूर्व के बीच में केवल प्रधानकर्म से ही "उत्पत्ति" नाम का कोई अपूर्व माना जाता है। उसी अपूर्व के द्वारा दोनों के साहित्य का सम्पादन किया जाता है। इसी प्रकार अंगों में भी परस्पर साहित्य-सम्पन्न होने पर ही वे प्रधान के उपकारक सिद्ध होते हैं। उन सभी अंगों का एक ही समय अनुष्ठान सम्पन्न नहीं होता है। इसलिये अङ्ग भी परस्पर एक दूसरे के साक्षात् सहायक नहीं होते है। वे भी अपने-अपने 'उत्पत्त्यपूर्व' के द्वारा ही साहित्य प्राप्त करते हैं, और फिर सभी 'परमापूर्व' के सहायक होते हैं। 'अङ्ग', उपकारक होते हैं और 'प्रधान', उपकार्य होता है। इसीलिये दोनों में परस्पर

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(१७) दर्शपूर्णमासयोस्तु विशेषः १ 'यदाग्नेयोऽष्टाकपालोऽमावास्यायाञ्च पौर्णमास्याञ्चाच्युतो भवति' इत्याग्नेययागो विहितः, 'ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्ण-

---

हनुमान् सागरमुल्लंघितवान्। तथैव सर्वैरंगैः प्रकाशितं, यत् प्रधानकर्मणि, फलापूर्वोत्पादनसामर्थ्यमस्ति, तदा तत्सामर्थ्यं फलप्रदानाय समर्थं भवति। एवं च फलापूर्वम् (परमापूर्वम्) उत्पत्त्यपूर्वं चेति अपूर्वद्वयं सिद्ध्यति। अनेकषामङ्गानामुत्पत्त्यपूर्वसमूहेन एकं समुदायापूर्वमुत्पद्यते, तथैव अनेकेषां प्रधानानामप्युत्पत्त्यपूर्वसमूहेन एकं समुदायापूर्वं उत्पद्यते। तत्समुदायापूर्वैः एकं 'फलापूर्वम्' उत्पद्यते, तेन च फलं प्रापयितुं सांगं प्रधानं समर्थं भवति। एतदेवांगप्रधानयोः साहित्यमित्युच्यते।

(१७) उपर्युक्तसान्निध्यापेक्षया दर्शपूर्णमासयागे विशेषं [१] प्रतिपादयति—'दर्शपूर्णमासयोस्त्विति'। तत्र 'यदाग्नेय०' इति वाक्येन 'आग्नेय' संज्ञको यागो विधीयते। 'ताभ्यामेत०' इति वाक्येन 'अग्नीषोमीययागो विधीयते। तथा 'उपांशुयाज०' इति वाक्येन 'उपांशु' संज्ञको यागो विधीयते।

'उपकार्योपकारकभाव' सम्बन्ध माना जाता है। प्रधान का फलापूर्वजनन (फल के सम्पादक अपूर्व को उत्पन्न करने) के लिये सामर्थ्य (शक्ति) का उन्मुखीकरण (उन्मुख) करना ही अंगों की प्रधान के प्रति उपकारकता है। अभिप्राय यह है कि प्रधान से उत्पन्न 'अपूर्व' ही फलप्रदायक होता है, परन्तु जब तक 'अंगापूर्व' की सहायता नहीं होती, तब तक वह अकेला फल-प्रदान करने में समर्थ नहीं होता है। जब अंगापूर्व उसके साथ मिल जाता है, तब वह फल-जनन के प्रति समर्थ हो जाता है और फल उत्पन्न करता है—यही उसकी उपकारकता है।

(१७) दर्शपूर्णमास में इसकी अपेक्षा कुछ विशेषता रहती है। इस में तीन-तीन यागों से एक-एक अपूर्व उत्पन्न होता है और उसका वैशिष्ट्य प्रधान में रहता है; क्योंकि तीनों मिलकर एक 'यागकर्म' कहलाता है।

---

१. त्रिकात् त्रिकादेकमपूर्वमुत्पद्यत इति विशेषः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मासे प्रायच्छत्' इत्यग्नीषोमीययागो विहितः, 'उपांशुयाजमन्तरा यजति' इति उपांशुयागः 'तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्' इति वाक्यात् पौर्णमास्यां विहितः । एतानि पौर्णमास्यां प्रधानानि । एषामाग्नेयाग्नीषोमीयोपांशुयागानां तत्तद्वाक्यावगतपौर्णमासीकालसम्बन्धं निमित्तीकृत्य 'य एवं विद्वान् पौर्णमासीं यजते' इति विद्वद्वाक्ये पौर्णमासीपदेन एकवचनान्तेन समुदायरूपेणाऽनुवादः।

तस्य चापांशुयागस्य 'तावब्रूता०' इति वाक्येन पौर्णमास्यां विधान क्रियते । एवं च पौर्णमास्यां तिथौ त्रयः प्रधानयागाः भवन्ति । आग्नेयाग्नीषोमीयोपांशुयाजसंज्ञकानां त्रयाणां यागानां 'यदाग्नेय०' इत्यादितत्तद्वाक्यैरवगतो यः पौर्णमासकालेन सम्बन्धः तमनुलक्ष्य 'य एवम्०' इत्यादिविद्वत्पदघटितवाक्ये प्रयुक्तेन 'पौर्णमासीम्' इत्येकवचनान्तेन पदेन यागत्रयात्मकस्य समुदायस्यानुवादः[1] क्रियते । तेन वेदे यागप्रकरणे यत्र क्वापि प्रयुक्तेन 'पौर्णमासी' पदेन आग्नेयादियागसमुदायस्यैव ग्रहणं वेदितव्यम् । दर्शपूर्णमासयागकर्मणि नवसंख्याकानि अपूर्वाणि भवन्ति, यथा—षट्संख्याकानि उत्पत्त्यपूर्वाणि, द्विसंख्याकानि समुदायापूर्वाणि,

"यदाग्नेयो०" इत्यादि मन्त्र से 'आग्नेय' नामक याग, "ताभ्यामेतौ" इत्यादि से 'अग्नीषोमीय' नामक याग, 'उपांशुयाजम्' इत्यादि से उपांशु याग तथा 'तावब्रूताम्' इत्यादि वाक्य से अग्नीषोमदेवताक आज्यद्रव्यक पूर्णमासकालिक याग का विधान है । पूर्णमासकालिक याग में ये सब प्रधान याग हैं । इन आग्नेय, अग्नीषोमीय तथा उपांशु यागों का उसके विधायक उन-उन वाक्यों से ज्ञात हुए पूर्णमास रूप काल के सम्बन्ध को निमित्त बना करके "य एवं विद्वान्" इस 'विद्वत्' पदघटित वाक्य में "पौर्णमासी" इस एकवचनान्त पद से अनुवाद किया गया है; क्योंकि उस वाक्य में समुदाय रूप से अनुवाद है और समुदाय एक होता है । इसलिये

१. प्रमाणान्तरप्राप्तस्य पुनः कथनमनुवादः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तेन वेदे यत्र यत्र पौर्णमासीशब्दः तत्र तत्राग्नेयादिसमुदायोपस्थितिः ।

यजिपदाश्रवणेऽपि यागविधानम्

(१८) ननु 'यदाग्नेय' इति वाक्ये यागवाचकपदस्याश्रवणात् कथं यागविधायकत्वमिति चेत्, मैवम् । 'अग्निर्देवता अस्य पुरोडाशस्य इत्यर्थे विहितदेवतातद्धितान्त आग्नेयशब्दः । तस्य पुरोडाशपदसामानाधिकरण्याद् द्रव्य-देवतासम्बन्धोऽ-

---

एकसंख्याकं परमापूर्वम् इति मिलित्वा नवसंख्याकानि अपूर्वाणि भवन्ति । 'यदाग्नेय' इति वाक्ये 'यत्' शब्दस्यार्थः अविवक्षितः । 'अग्निः देवताऽस्य' इति व्युत्पत्त्या 'आग्नेय' शब्दो देवतातद्धितप्रत्ययान्तः । अष्टसु कपालेषु संस्कृतः पुरोडाशः 'अष्टाकपाल' शब्देनोच्यते । तथा एकादशकपालेषु संस्कृतः पुरोडाशः एकादशकपाल' शब्देनोच्यते ।

(१८) अत्रैवमाशंकते—'नन्विति' । यदाग्नेय०' इत्यादिवाक्ये यागवाचकपदस्याऽभावात् वाक्यमिदं यागस्य विधानं कथं कुर्यात् ? मैवं शङ्कनीयम् । 'अग्निरस्ति देवता यस्य पुरोडाशस्ये'त्यर्थे विहितो देवतातद्धितो 'ढक्' प्रत्ययो यस्यान्ते, एतादृशोऽयमाग्नेयशब्दोऽस्ति । तस्याग्नेयशब्दस्य 'अष्टाकपालपुरोडाश' शब्देन सह एकार्थावबोधकत्वरूपसामाना-

---

वेद में जहाँ-जहाँ पौर्णमासी शब्द का प्रयोग देखा जाता है, वहाँ-वहाँ आग्नेय आदि यागों के समुदाय की उपस्थिति होती है । पौर्णमासी तथा दर्श शब्द से पूर्णिमा एवं अमावास्या तिथि का ग्रहण होता है । जहाँ कहीं भी पौर्णमासी और दर्श शब्द अभेदसम्बन्ध से यागान्वित पदार्थ के रूप में दृष्ट होता है, वहाँ-वहाँ पौर्णमासी-काल-कर्त्तव्यत्वरूप तथा दर्शकाल-कर्त्तव्यत्वरूप लक्षणावृत्ति के द्वारा आग्नेयादि याग समुदाय की उपस्थिति समझनी चाहिए ॥ १७ ॥

(१८) शङ्का—जिस वाक्य से याग का विधान अभीष्ट होता है, उस वाक्य में 'यज्' धातु का प्रयोग अवश्य किया जाता है । कहा भी गया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गतः । स च यागमन्तरा न सम्भवति, द्रव्यदेवतासम्बन्धस्य यागादन्यत्र क्रियायामसम्भवात्, इति यागक्रियायामेव सम्बन्धो वाच्यः। देवतोद्देशेन द्रव्यत्यागस्य यागरूपत्वाङ्गीकारात् । अतः श्रुतद्रव्यदेवतासम्बन्धानुमितो यागो यजेतेति कल्पितेन पदेन विधीयते—अग्निदैवत्यपुरोडाशद्रव्यकामावास्यादिकालकर्तव्ययागेन इष्टं भावयेदिति । एवं यत्र यत्र

धिकरण्यात् द्रव्य-देवतयोः संबंधावगमो 'यदाग्नेये'ति वाक्येन भवति। सच सम्बन्धो यागं विना न संभवति। द्रव्यदेवतयोः संबंधो यागातिरिक्तायां कस्यामपि क्रियायां न संभवति, तेन स सम्बन्धो यागक्रियायामेव स्वीकर्तव्यः। यतो हि देवतामुद्दिश्य क्रियमाणस्य द्रव्यत्यागस्यैव यागपदार्थत्वात् । अत आग्नेयादिशब्दैरवगतस्य द्रव्यदेवतासम्बन्धस्योपपत्त्यर्थं कल्पितेन 'यजेत' इति पदेन यागो विधीयते। यथा 'अग्निदेवतामुद्दिश्य पुरोडाशद्रव्येण अमावास्यादिकाले कर्तव्येन यागेन इष्टं भावयेत् (सम्पादयेत्)'। एवमेव यत्र-यत्र केवलं द्रव्य-देवतासम्बन्धः श्रुतो भवति तत्र-

है कि "यजतिचोदनाचोदितः याग" इति। याग का यही सामान्य लक्षण है। "यदाग्नेय०" इत्यादि वाक्य में याग-वाचक कोई पद श्रुत नहीं है। इसलिये यह वाक्य याग का विधायक कैसे हो सकता है ?

समाधान—उपर्युक्त शङ्का समुचित नहीं है; क्योंकि 'अग्नि देवता है, इस पुरोडाश की' इस अर्थ में 'साऽस्य देवता' सूत्र से देवता अर्थ में तद्धित-प्रत्यय का विधान करके 'आग्नेय' शब्द की निष्पत्ति की जाती है। उस 'आग्नेय' शब्द का 'पुरोडाश' पद के सामानाधिकरण्य से द्रव्य-देवतारूप सम्बन्ध ज्ञात होता है। वह सम्बन्ध याग के विना सम्भव नहीं है; क्योंकि द्रव्य और देवता का सम्बन्ध याग से भिन्न भोजनादिक्रिया में सम्भव नहीं है। इसलिये 'यागक्रिया' में ही सम्बन्ध का प्रतिपादन करना पड़ेगा। देवता को उद्देश्य करके द्रव्य के त्याग से ही याग का स्वरूप माना गया है। इसलिये श्रुत 'द्रव्य' तथा 'देवता' के सम्बन्ध से

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्रव्य-देवतासम्बन्धमात्रं श्रूयते, 'सौर्यञ्चरुं निर्वपेत्' इत्यादौ, तत्र सूर्यदेवताचरुद्रव्यसम्बन्धानुमितो यागो विधीयते इति न कश्चिद्दोषः ।

लिङ्प्रत्ययाद्यभावेऽपि विधिकल्पना

(१९) ननूपांशुयागवाक्ये यजेः श्रवणेऽपि विधिप्रत्यय-

तत्र द्रव्य-देवतासम्वन्धेनानुमितस्य यागस्य विधिर्ज्ञातव्यः। यथा 'सौर्यं चरुं निर्वपेत्' इत्यत्र सूर्यदेवताचरुद्रव्ययोः सम्वन्धेन यागो विधीयते। अतः 'यदाग्नेय०' इति वाक्ये प्रत्यक्षं यजेरश्रवणेऽपि यागो विधीयते इति न कोऽपि दोषः ।

(१९) शंका—पूर्वपक्षो पुनः शंकते—'उपांशुयाग' वाक्ये प्रत्यक्षं यजतेः विद्यमानत्वेऽपि विधिबोधकलिङादिप्रत्ययस्य प्रयोगाभावात् तेन वाक्येन उपांशुयागस्य विधानं कथं भवितुमर्हति ?

अनुमित याग का 'यजेत' इस कल्पित पद के व्दारा विधान किया जाता है। उस वाक्य का 'अग्निदेवताक प्ररोडाशद्रव्यक अमावास्याकाल में कर्त्तव्य याग के द्वारा इष्ट की भावना करे' अर्थात् इष्ट फल का सम्पादन करे। इसी प्रकार जहाँ-जहाँ 'सौर्यं चरुं निर्वपेत्' इत्यादि वाक्यों में द्रव्य और देवता का सम्बन्ध मात्र सुनाई देता है, उन सभी स्थलों में सूर्य-देवतासम्बन्धा-नुमित याग का विधान होता है। इस प्रकार वैदिक वाक्यों में 'यज्' धातु के श्रवण न होने पर भी यागविधायकत्वाभावरूप कोई दोष नहीं है। 'सौर्यं' पद में भी 'साऽस्य देवता' सूत्र से ही देवता अर्थ में तद्धित-प्रत्यय का विधान करके 'सौर्यं' पद निष्पन्न हुआ है। उसमें 'चरु' द्रव्य का प्रतिपादन है ही। अतः द्रव्य तथा देवता का सम्बन्ध हो जाने पर याग का अनुमान हो जाता है। इसलिये कोई दोष नहीं है ॥ १८ ॥

(१९) शङ्का—'उपांशुयाजमन्तरा यजति' इस उपांशुयाग के विधायक वाक्य में 'यज्' धातु का श्रवण होने पर भी विधायक (विधि-वाचक) तिङादि प्रत्ययों के नहीं रहने के कारण इस वाक्य को याग का विधायक कैसे माना जाय ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लिङादेरभावात् कथं विधायकत्वमिति चेत् मैवम् । यजती-त्यस्य यजेतेति विपरिणामेन विधायकत्वसम्भवात् । एवं यत्र लिङादिर्नश्रूयते 'व्रीहीन् प्रोक्षति' 'समिधो यजति' इत्यादावपि विपरिणामो बोध्यः । केचित्तु यजतीत्यस्य पञ्चमलकारत्वाङ्गीकाराद् विधायकत्वसम्भव इत्याहुः ।

(२०) तथा–'ऐन्द्रं दध्यमावास्यायाम्' 'ऐन्द्रं पयोऽ

समा०—सिद्धान्ती समाधत्ते 'मैवमिति ।' 'यजती'त्यस्य पदस्य 'यजेत' इति विभक्तिविपरिणामं विधाय 'उपांशु०'—इति वाक्यस्य याग-विधायकत्वं सम्भविष्यति । एवमेव 'व्रीहीन् प्रोक्षति', 'समिधो यजति' इत्यादिस्थलेष्वपि विपरिणामो विज्ञेयः । केचनविद्वाँसः 'यजतीत्यादि-स्थलेषु 'यजति' इति रूपं 'लेट्' लकारस्यामनन्ति । तेषां मतेन एता-दृशानां वाक्यानां विधायकत्वे न काचिदपि संशीतिः ।

(२०) [1]पौर्णमासीतिथिसम्बन्धि सर्वं वृत्तमुपपादितम् । अधुना दर्शकाल (तिथि) सम्बन्धि वृत्तम्प्रतिपादयति–'तथेति ।' 'तथे'ति पद 'पौर्णमास्यां

समाधान—उपर्युक्त शङ्का ठीक नहीं है, क्योंकि 'यजति' पद का 'यजेत' ऐसा विपरिणामकर लेनेपर उसका विधायक होना सम्भव हो जायेगा । इसी प्रकार 'व्रीहीन् प्रोक्षति' 'समिधो यजति' इत्यादि वाक्यों में भी विपरिणाम करके उन्हें विधायक बना लेना चाहिए ।

कुछ लोगों का कहना है कि 'यजति' पद 'लेट्' लकार का है और लिङ् के अर्थ में ही उसका विधान किया गया है । लिङ् लकार विधायक होता है । अतः लेट् लकार भी विधायक होगा । इसलिये पद का विपरि-णाम करने की कोई आवश्यकता नहीं है । उसी लेट्लकार को पञ्चम लकार शब्द से भी कहा जाता है; क्योंकि गणना के अनुसार वह पांचवा पड़ता है ॥ १९ ॥

(२०) इसी प्रकार "ऐन्द्रं दधि०" तथा "ऐन्द्रं पयः०" इत्यादि

---

१. इमानि च प्रधानानि तैत्तिरीयेषु हिरण्यकेश्यादीनां सोमेनेष्टवतामनु-ष्ठेयानि बोध्यानि । सोमेनानिष्टवतां तु उक्तसान्नाय्ययागयोः स्थाने

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मावास्यायाम्' इति वाक्यविहितौ सान्नाय्ययागौ, 'यदाग्नेय'० इति वाक्यविहिताग्नेयश्चामावास्यायां प्रधानानि। एषां त्रयाणां 'य एवं विद्वानमावास्यां यजते' इति वाक्ये अमावास्या-मिति नाम्ना द्वितीयैकवचनान्तेन समुदायरूपेणानुवादः।

प्रधानानि' इत्यत्रान्वेति। यथा पौर्णमास्यां तिथौ त्रयः 'प्रधानयागाः प्रतिपादिताः, तथैव 'ऐन्द्रं दधि', 'ऐन्द्रम्पयः', इति वाक्याभ्यां विहितौ द्वौ सान्नाय्ययागौ, अथच 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति' इति वाक्येन विहित आग्नेययागः इति त्रयो यागा अमावास्यां (दर्शे) तिथौ प्रधानाः सन्ति। एतेषां त्रयाणां यागानां समुदायस्य 'य एवम्०' इत्यादि वाक्ये 'अमावास्याम्' इति द्वितीयैक-

---

वाक्यों से सान्नाय्य याग का और "यदाग्नेय०" इस वाक्य से 'आग्नेय' याग का विधान है। ये तीनों याग अमावास्या याग में प्रधान होते हैं। दधि और दूध को 'सान्नाय्य' शब्द से कहते हैं।

ऐन्द्राग्नपुरोडाशयाग एवानुष्ठेयः। उपांशुयागो हिरण्यकेश्यादीनां नास्त्येव। अत एव विष्णुमुपांश्वितरेयिणोऽग्नीषोमीयं पौर्णमास्यां वैष्णवममावास्याया-मेषामेके कञ्चन नैषामप्युपांशूनाम्' इति श्रौतसूत्रे आश्वलायनेन हिरण्यकेश्या-दीनुद्दिश्य 'एक' इति प्रयुञ्जानेन तेषामुपांशुयागाभावः स्पष्टमेवोक्तः। तैत्ति-रीयेषु बौधायनानान्तु पौर्णमासेऽग्नीषोमीयपुरोडाशयागानुष्ठानं नास्ति। अत एव दशमाध्यायेऽष्टमपादेऽन्ति--(१८) माधिकरणे पौर्णमासेऽग्नीषोम-यागाभावे 'उपांशुयाजमन्तरा यजति' इति वाक्येन उभयोः पुरोडाशयोरन्त-राले विहित उपांशुयागः कथमनुष्ठेयः स्यादित्याशङ्क्यान्तरालस्य आग्नेयया-गोपलक्षकत्वमंगीकृत्य तत्र तदनुष्ठानामिति सिद्धान्तितम्। कात्यायनाश्व-लायनादीनां तु आग्नेय, उपांशुयागः, अग्निषोमीयः पुरोडाश इति त्रिकं पौर्णमास्याम्। आग्नेयः, उपांशुयागः, ऐन्द्राग्नश्चेति त्रिकं चामावास्यायाम्। ततश्च कात्यायनादिसम्प्रदायमेव दृष्ट्वा उपांशुयागाभावो दर्शे कथं स्यादिति भ्रमो न कार्यः।

१. फलोद्देशेन विहिता देवता प्रधानदेवता, तदर्थं यागः प्रधानयागः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तेन वेदे यत्र दर्शशब्दोऽमावास्याशब्दो वा श्रुतस्तत्र याग-समुदायोपस्थितिः। त्रिकस्य त्रिकस्यामावास्यापौर्णमासी-शब्दाभ्यां समुदायरूपेण विद्वद्वाक्येऽनुवादस्य प्रयोजनन्तु 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यादौ द्विवचनोप-पत्तिः। अन्यथा षण्णामाग्नेयादियागानां बहुत्वाद् दर्शपूर्ण-मासैरिति बहुवचनं स्यात्। मानान्तरेण प्राप्तार्थस्य पुन:

वचनान्तेन अनुवादः कृतोऽस्ति। 'यदाग्नेय०' इति वाक्ये कालद्वयस्य उल्लेखो वर्तते। किन्त्वेकमेव कर्म वर्तते। आवृत्ति विना कालद्वये तस्य (एकस्यैव कर्मणः) अनुष्ठानं न कर्त्तुं शक्यते। अतः पौर्णमास्यामनुष्ठित-स्याग्नेययागस्य पुनश्चामावास्यायामपि अनुष्ठानं कर्तव्यम्। वेदे यत्र कापि 'दर्श' पदम् 'अमावास्या' पदं वा श्रुतं भवेत्, तत्र त्रयाणां यागानां समुदाय एवोपस्थितो भवति। 'य एवं विद्वान् पौर्णमासीं यजते', 'य एवं विद्वानमावास्यां यजते' इति विद्वत्पदघटितवाक्ये 'पौर्णमासी' 'अमावस्या' इति द्वाभ्यां पदाभ्यां प्रत्येकं (प्रत्येकेन पदेन) एकैकस्य त्रिकस्य (त्रयाणां यगानां समुदायस्य) समुदायरूपेण योऽनुवादः कृतोऽस्ति, तस्य प्रयोजनं दर्शयति–'दर्शपूर्णमासाभ्यामिति।' 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति वाक्यघटकीभूतदर्शपूर्णमासाभ्यामिति द्विवचनोपपत्त्यर्थमयमनुवादः इति विज्ञेयम्। अन्यथा तत्रानुष्ठीयमानानामाग्नेयादिषण्णां यागानाम् अनेकत्वात् 'दर्शपूर्णमासैः' इति बहुवचनेन भाव्यम्। किन्तु भगवती श्रुतिस्तथा न वदति, सा तु 'दर्शपूर्णमासाभ्या' मिति द्विवचनान्तमेव पदं प्रत्युङ्क्ते। अनुवादस्य स्वरूपं प्रदर्शयति–'मानान्तरेणे'ति। केनापि अन्ये

इन तीनो यागों का "य एवं विद्वान् अमावस्यां यजते" इस वाक्य में प्रयुक्त 'अमावास्याम्' इस द्वितीया विभक्ति के एकवचनान्त शब्द के द्वारा समुदायरूप से अनुवाद किया जाता है। इसलिए वेद में जहां-कहीं 'दर्श' या 'अमावास्या' शब्द सुनाई देता है, वहां इस यागसमुदाय की उपस्थिति हो जाती है अर्थात् तीन यागों के समुदाय को एकत्रिक कहा जाता है। 'एवं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रवणमनुवादः ।

तथा फलवदाग्नेयादिसन्निधौ आम्नातानि प्रयाजाज्य-भागानुयाजादीनि षण्णां यागानामङ्गभूतानि ।

प्रमाणेन ज्ञातस्य अर्थस्य पुनः श्रवणमनुवादः । यथा तत्तद्वाक्यैर्विहिता आग्नेयादिषड्यागाः प्राधान्यं भजन्ते, तथा फलवतां प्रधानयागानां सन्निधौ तत्तद्वाक्यैर्विहितानि [1]प्रयाजानुयाजाज्यभागादीनि फलरहितानि यानि कर्माणि, तानि तेषां प्रधानयागानामंगभूतानि[2] ।

त्रिक' अमावास्यायाग तथा 'एकत्रिक' पौर्णमासीयाग में होता है । अमावास्या और पौर्णमासी शब्द के द्वारा समुदायरूप से कहे गये एक-एक त्रिक का 'विद्वत्' पदघटित वाक्य में अनुवाद करने से "दर्शपूर्णमासाभ्याम्०" इस वाक्य में द्विवचन की सङ्गति हो पाती है । अन्यथा 'आग्नेय' आदि छः यागों को बताने के लिये 'दर्शपूर्णमासैः' ऐसा बहुवचन का प्रयोग करना पड़ता । जब दूसरे प्रमाणों से ज्ञात हुए पदार्थों का पुनः श्रवण होता है, तब उसी को 'अनुवाद' कहते हैं । उसी प्रकार फल-युक्त आग्नेय आदि छः यागों के समीप कहे गये प्रयाज, आज्यभाग तथा अनुयाज आदि उनके (छः यागों के) अङ्ग-याग कहलाते हैं ॥ २० ॥

---

१. प्रकर्षेण इज्यन्ते देवता एभिस्ते प्रयाजाः, ते पञ्चयागात्मकाः सन्ति ।

(ख) अनु पश्चात् प्रधानयागानन्तरमिज्यते यैरिति व्युत्पत्त्या होत्रा पठ्यमाना याज्यामन्त्रा अनुयाजाः तत्सम्बंधात् अनुयाजसंज्ञकास्त्रयो यागाः ।

(ग) आज्यं भागो ययोस्तौ आज्यभागौ अग्नीषोमौ, तत्सम्बन्धाद्धोमावपि आज्यभागौ ।

२. प्रयाजाज्यभागादीनां किमपि स्वतंत्रं फलम् नास्ति । स्वर्गादिफल-स्यात्रोपस्थित्यभावात् तत्कल्पनमपि गौरवास्पदं स्यात् । तस्मात् उपस्थिता-नाम् आग्नेयादिषण्णां यागानां प्रयाजादीनि उपकारकाणि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्रिकापूर्वाद्युत्पत्तिः

(२१) एवं स्थिते 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यस्यायमर्थः—दर्शपूर्णमासाभ्यां समुदायाभ्यां परस्परसहिताभ्यां स्वर्गापूर्वं कुर्यादिति। तत्र कथं कालद्वयवर्तिनोः समुदाययोः परस्परसाहित्यमित्याकाङ्क्षायां स्वरूपेण साहित्याभावेऽपि त्रिकात्-त्रिकादेकैकमपूर्वं जायते, तद्द्वारा

---

(२१) एवं स्थिते इति। 'दर्श' पदेन, 'पूर्णमास' पदेन च यागानां त्रिकं-त्रिकं ग्राह्यमिति निश्चिते सति 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति वाक्यस्यायमर्थो निष्पद्यते—परस्परसंयुक्ताभ्यां दर्शसमुदाय-पूर्णमास-समुदायाभ्यामिति द्वाभ्यां समुदायाभ्यां स्वर्गजनकमपूर्वं सम्पादनीयम्।

शंका—भिन्न-भिन्नकालस्थितयोः यागसमुदाययोः परस्परं सान्निध्यं (संयुक्तत्वं) कथं संभवितुमर्हति ?

समा०—तयोः समुदाययोः स्वरूपतः सान्निध्याभावेऽपि एकैकस्मात् यागत्रिकात् एकैकमपूर्वमुत्पद्यते। तदपूर्वद्वारा द्वयोरपि यागसमुदाययोः सान्निध्यमुपपद्यते। त्रयाणां यागानां समूहः एकं त्रिकम् इत्युच्यते।

शंका—एकैकस्मात् त्रिकात् 'त्रिकापूर्वं' कथमुत्पद्यते ?

---

(२१) अभी तक यह बताया गया कि अङ्गापूर्वों के साथ मिलकर 'प्रधानापूर्व' फल देने वाला होता है। दर्श और पूर्णमास ये शब्द तीन-तीन यागों के वाचक होने से 'दर्श' इत्यादि वाक्य का अर्थ इस प्रकार करना चाहिए कि "दर्शसमुदाय और पूर्णमाससमुदाय" इन परस्पर संयुक्त हुए दो समुदायों से स्वर्गजनक 'अपूर्व' का उत्पादन करे"। इस पर प्रश्न होता है कि दो अर्थात् भिन्न-भिन्न कालों में उत्पन्न होने वाले 'अपूर्व' के समुदायों का परस्पर साहित्य कैसे सम्भव होगा ? इसका समाधान यह है कि स्वरूपतः (साक्षात्) साहित्य न होने पर भी एक-एक त्रिक से एक-एक अलग-अलग 'अपूर्व' उत्पन्न होता है। उसी के द्वारा परम्परया दोनों अपूर्व-समुदायों के साहित्य का प्रतिपादन किया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वयोः समुदाययोः साहित्यमित्युच्यते । एकैकस्य त्रिकस्यापि त्रिकापूर्वजनकत्वं कथमित्याकाङ्क्षायां प्रयाजानुयाजादिपूर्वोत्त-राङ्गकलापविशिष्टस्य एकैकस्य त्रिकस्य समुदायापूर्वजनकत्व-मुच्यते । एकैकस्य त्रिकस्य सर्वाङ्गसाहित्यं स्वरूपेण न सम्भवतीति त्रिभिर्यागैस्त्रीण्युत्पत्त्यपूर्वाणि जायन्ते । तद्द्वारा सर्वाङ्ग-साहित्यम् । अङ्गानामपि प्रयाजादीनां स्वरूपेण प्रधानसाहित्याऽ

समा०—प्रधानयागानुष्ठानात् पूर्वमनुष्ठितैः प्रयाजानुयाजाद्यङ्गैः, अथ च प्रधानयागानुष्ठानोत्तरमनुष्ठीयमानैः अंगैः सहितात् एकैकस्मात् यागत्रिकात् **समुदायापूर्वम्** उत्पद्यते । एकैकस्मिन् यागत्रिके सर्वेषामङ्गानां सान्निध्यं न संभवति, तत्संभवार्थं त्रिभ्यो यागेभ्यस्त्रीणि उत्पत्त्यपूर्वाणि-भवन्ति, तद्द्वारा चैकैकं यागत्रिकं, सर्वाङ्गसान्निध्यं लभते । प्रयाजाद्यङ्गा-नामपि स्वरूपतः प्रधानयागसान्निध्याऽसंभवेऽपि तत्तदुत्पत्त्यद्वारैव सान्निध्यं

जाता है । पुनः पूर्वपक्षी शङ्का करता है कि एक-एक त्रिक में भी त्रिकापूर्व-जनकता कैसे रहती है ?

समाधान—प्रधान याग से पहले प्रयाज का अनुष्ठान होता है तथा प्रधान याग के पश्चात् अनुयाज का अनुष्ठान होता है । इस प्रयाज तथा अनुयाजरूप पूर्व एवं पश्चात् काल में अनुष्ठेय अङ्गसमूहों से युक्त एक-एक त्रिक की समुदायापूर्वजनकता का प्रतिपादन किया जाता है । एक-एक त्रिक का सभी अङ्गों के साथ साक्षात् साहित्य सम्भव नहीं है । इसलिए तीन यागों से तीन अपूर्वों की उत्पत्ति मानी जाती है और उनके द्वारा सभी अङ्गों का साहित्य बन जाता है । इसमें कोई आपत्ति नहीं होती है ।

प्रयाज आदि अङ्गों का भी प्रधान के साथ साक्षात् साहित्य न होने पर भी उससे उत्पन्न उत्पत्त्यपूर्व के द्वारा साहित्य सम्पादन करना चाहिए । इस प्रकार प्रधान से उत्पन्न उत्पत्त्यपूर्व के साथ प्रयाजादि से उत्पन्न उत्पत्त्यपूर्वों का, जो साहित्य है, वहां प्रधान का अङ्गविशिष्टत्व

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भावात् तत्तादुत्पत्त्यपूर्वद्वारा साहित्यं वाच्यम्। तथा च प्रधान जन्योत्पत्त्यपूर्वाणां प्रयाजादिजन्योत्पत्त्यपूर्वैः साहित्यं यदस्ति तदेव प्रधानानामङ्गविशिष्टत्वरूपं साङ्गत्वम् ।

(२२) एवञ्च पौर्णमास्यामाग्नेयादिजन्यैस्त्रिभिरपूर्वैः प्रयाजादिजन्योत्पत्त्यपूर्वसचिवैः समुदायापूर्वमेकं जन्यते तथा दर्शेऽपि आग्नेयैन्द्रद्वयजन्यैस्त्रिभिरपूर्वैरङ्गोत्पत्त्यपूर्वैः

वेदितव्यम् । एवञ्च प्रधानयागोत्पन्नस्य उत्पत्त्यपूर्वस्य, प्रयाजाद्यङ्गोत्पन्नै रुत्पत्त्यपूर्वैः सह यत् सान्निध्यं तदेव प्रधानयागानामङ्गविशिष्टत्वरूपं साङ्गत्वं विज्ञेयम् ।

(२२) एवञ्चेति ।उपर्युक्तस्यायं निर्गलितोऽर्थः—पौर्णमास्यामनुष्ठी यमानेभ्यः त्रिभ्य आग्नेयादिप्रधानयागेभ्य उत्पन्नानामपूर्वाणाम् अथ च प्रयाजादिभ्योऽङ्गेभ्य उत्पन्नानामुत्पत्त्यपूर्वाणाञ्च साहित्येन (सम्मेल नेन) एकं समुदाय (त्रिक)–जन्यमपूर्वमुत्पद्यते । तथैव दर्शयागेऽपि त्रिभ्यः (१) आग्नेय,–(२) ऐन्द्रदधि,–(३) ऐन्द्रपयोयागेभ्य उत्पन्नानां त्रयाणामपूर्वाणाम् अथ च तदङ्गेभ्य उत्पन्नानामपूर्वाणां साहित्येन (सम् मेलनेन) एकसमुदाय (त्रिक)–जन्यमपूर्वमुत्पद्यते । आग्नेयादियागा प्रत्येकस्य पृथक् पृथक् उत्पन्नेन एकैकेन उत्पत्त्यपूर्वेण त्रयाणां त्रयाणा पूर्वाणामेकैकः समुदायो भवति । इति त्रिकद्वययोः द्वे त्रिकापूर्वे (द्वे समु

(साङ्गत्व) है । इस तरह पौर्णमासी में आग्नेय आदि से उत्पन्न ती अपूर्वों के द्वारा प्रयाज आदि से उत्पन्न उत्पत्त्यपूर्व के साथ ए समुदायापूर्व उत्पन्न होता है ॥ २१ ॥

(२२) उसी प्रकार दर्श याग में भी आग्नेय तथा इन्द्र देवता दोनों यागों से उत्पन्न तीनों अपूर्वों के और अङ्गों से उत्पन्न उत्पत्त्यपू के साथ एक त्रिकापूर्व उत्पन्न होता है । उन त्रिकापूर्वों के द्वा आग्नेयादि तीनों से उत्पन्न तीनों अपूर्वों से फल को उत्पन्न करने वा फलापूर्व नामक 'महापूर्व' उत्पन्न होता है । फल को उत्पन्न करने वा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चिवैरेकं त्रिकापूर्वं जन्यते, ताभ्यां त्रिकापूर्वाभ्याम् आग्नेयाद्युत्पत्यपूर्वत्रितयद्वयजन्याभ्यां, फलजनकीभूत महापूर्वं फलापूर्वनामकं जन्यते, ततश्च फलमिति । तथा च सर्वाङ्गोपकृताभ्यां दर्शपूर्णमासाभ्यामपूर्वद्वारा स्वर्गं कुर्यादिति फलापूर्वनिष्पत्त्यर्थे साङ्गप्रधानकर्त्तव्यताबोधको विधिः प्रयोगविधिरिति सिद्धम् ।

विधेस्त्रैविध्यम्

(२३) पुनरपि विधिस्त्रिविधः—अपूर्वविधिः, नियम-

यापूर्वे) भवतः । ताभ्यां उभाभ्यां त्रिकापूर्वाभ्यां (समुदायापूर्वाभ्यां) एकं फलापूर्वसंज्ञकं महापूर्वं (परमापूर्वम्) निष्पद्यते । तस्माच्च फलमुत्पद्यते । इदं फलापूर्वं यागकर्तुरात्मनि तावत्तिष्ठति, यावत् फलं न सम्पद्यते । अनेनैव महापूर्वेण यागकर्तुः फललाभो भवति ।

एवञ्च 'समस्तांगसमन्विताभ्यां दर्शपूर्णमासाभ्यामपूर्वद्वारा स्वर्गः सम्पादनीयः ।' एवम्प्रकारकः फलापूर्वनिष्पत्त्यर्थं सर्वांगसहितस्य प्रधानकर्मणः कर्त्तव्यताबोधको यो विधिः स 'प्रयोगविधिरि'ति सिद्ध्यति ।

(२३) 'पुनरपीति' । पूर्वं ब्राह्मणवाक्यानि पञ्चधा विभक्तानि, इह पुनः प्रकारान्तरेण विभागत्रयमाह – विधिस्त्रिविध इति । तिस्रो विधा यस्य सः त्रिविधः । 'विधा' नाम प्रकारविशेषः । 'विधिरित्यन्तम-

---

अपूर्व फलापूर्व कहलाता है । इन सभी प्रक्रियाओं के बाद स्वर्गादि रूप फल उत्पन्न होता है । इस प्रकार सभी अङ्गों से उपकृत दर्श-पूर्णमास से उत्पन्न 'अपूर्व' के द्वारा स्वर्ग का सम्पादन करे । इसी फलापूर्व की निष्पत्ति के लिये अङ्गों के सहित प्रधान की अनुष्ठेयता के बोधक विधि को 'प्रयोगविधि' कहते हैं, यह सिद्ध हुआ ॥ २२ ॥

(२३) पहले ब्राह्मणवाक्यों के पांच भेद बताये गये तथा उत्पत्ति आदि सभी विधियों में प्रधान 'प्रयोगविधि' का निरूपण किया गया । फिर भी ज्ञान-सौन्दर्य तथा स्पष्ट-प्रतिपत्ति के लिए प्रकारान्तर से पुनः विधि को

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विधिः, परिसंख्याविधिश्चेति ।

अपूर्वविधिः

(२४) तत्र यो विधिरत्यन्ताप्राप्तमर्थं प्रापयति सोऽपूर्वविधिः । यथा दर्शपूर्णमासप्रकरणे 'व्रीहीन् प्रोक्षति' इति । एतद्विध्यभावे—दर्शपौर्णमासीयव्रीहिषु प्रोक्षणं कथमपि

प्राप्ते नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते ।' इति वार्तिकानुसारेण विधेः प्रकारत्रयम्प्रदर्शयन् तदुदाहरणानि प्रदर्शयति—(१) अपूर्वविधिः, (२) नियमविधिः, (३) परिसंख्याविधि इति विधेस्त्रयः प्रकाराः ।

(२४) तत्र यः सर्वथा अज्ञातस्य विषयस्य विधानं करोति–सः अपूर्वविधिरित्युच्यते । **यथा**—दर्शपूर्णमासप्रकारणस्थितं 'व्रीहीन् प्रोक्षति' इति प्रोक्षणवाक्यम् । यद्ययं विधिर्न भवति चेत् तर्हि दर्शपूर्णमासयागीयव्रीहीणां प्रोक्षणं केनचिदपि वाक्येन (प्रमाणभूतेन विधिवाक्येन) प्राप्तं नासीत्, किन्तु 'व्रीहीन् प्रोक्षती' ति विधिवाक्ये सति दर्शपूर्णमासयागीय व्रीहीणां प्रोक्षणं प्राप्तं भवति । अतः अत्यन्तमप्राप्तस्य प्रोक्षणस्य विधायकत्वात् अयं विधिः 'अपूर्वविधिरित्युच्यते । लक्षणे तावत् परिसंख्याविधेर्व्यावृत्त्यर्थं 'अप्राप्तमित्यर्थविशेषणम्' । नियमविधेर्व्यावृत्त्यर्थं 'मत्यन्त

बताते हैं । विधि तीन प्रकार की है—१. अपूर्वविधि २. नियमविधि ३. परिसंख्याविधि ॥ २३ ॥

(२४) उन अपूर्व आदि तीनों विधियों में "जो अत्यन्त अप्राप्त (अज्ञात) अर्थ (पदार्थ) का बोधक हो, वह 'अपूर्वविधि' कहलाता है जैसे—दर्शपूर्णमासप्रकरण में "व्रीहीन् प्रोक्षति" वाक्य सुना जाता है इसी विधि से व्रीहिगत प्रोक्षण का ज्ञान होता है । इस विधि के अभाव में दर्शपूर्णमास से सम्बन्धित व्रीहि में किसी भी प्रकार से प्रोक्षण का ज्ञान सम्भव नहीं है । इस विधि के रहने पर ही दर्शपूर्णमास से सम्बन्धित व्रीहि में प्रोक्षण की प्राप्ति अवश्य ही होती है । इसमें कोई विवाद नहीं है

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न प्राप्नोति । एतद्विधिसत्त्वे तु तत्सम्बन्धिव्रीहिषु प्रोक्षणं प्राप्नोत्येव इति अत्यन्ताऽप्राप्तप्रोक्षणप्रापकत्वादयमपूर्वविधिः

नियमविधिः

(२५) यश्च पक्षेऽप्राप्तमर्थं नियमयति स नियमविधिः। यथा तत्रैव 'व्रीहीनवहन्ति, इति। एतद्विध्यभावे दार्शपौर्णमासिकेषु व्रीहिषूत्पत्तिवाक्यावगतपुरोडाशोपयोगितण्डुलनिष्पत्त्यनुकूलवैतुष्यकार्याय अवहननवत् कदाचि-

---

पदनिवेशः। 'कतिपयावयवेषु जलसंयोगानुकूलव्यापारः प्रोक्षणम्' इति प्रोक्षणलक्षणम्।

(२५) विकल्पेन अप्राप्तस्यार्थस्य नियमनं असम्बन्धव्यवच्छेदरूपमवश्यमाचरणम्, येन विधिवाक्येन क्रियते, तद्विधिवाक्यं नियमविधिरि' त्युच्यते। **यथा**—दर्शपूर्णमासप्रकरणे स्थितं 'व्रीहीनवहन्ति' इति अवहननवाक्यम्। इदमवहननविधिवाक्यं न भवति चेत् तर्हि दर्शपूर्णमासयागीयेषु व्रीहिषु 'यदाग्नेय' इत्युत्पत्तिवाक्यावगतपुरोडाशोपयोगितण्डुलनिष्पत्त्यर्थमपेक्षितवैतुष्यकरणार्थमवहननक्रिया भवति, तथैव वैतुष्यकरणार्थं नखविदलनक्रियाऽपि भवितुमर्हति। उभे अपि क्रिये एककालावच्छेदेन युगपन्नैव सम्भवतः। नखविदलनपक्षे अवहननक्रिया अप्राप्ता भवेत्;

इसलिये व्रीहिगत अत्यन्त अज्ञात प्रोक्षण का बोधक होने के कारण यह 'अपूर्वविधि' कहलाता है ॥ २४ ॥

(२५) जो विधि एक पक्ष में अप्राप्त हुए पदार्थ का नियमन करता है, वही 'नियमविधि' है। अभिप्राय यह है कि जहां एक क्रिया के सम्पादक अनेक साधन हैं और एक साधन की प्राप्ति रहने पर भी दूसरे पक्ष के साधन का बोधक विधि हो, वहां नियमविधि माना जाता है। जैसे—दर्शपूर्णमासप्रकरण में "व्रीहीन् अवहन्ति" वाक्य सुना जाता है। यह व्रीहि पर किये जाने वाले अवघात का प्रतिपादक है। वितुषीकरण करना ही अवघात का प्रयोजन है। इस विधि के अभाव में उत्पत्तिवाक्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नखविदलनमपि प्राप्नुयात् इति, तस्मिन् पक्षेऽवहननस्य प्राप्तेरभावात् कार्यान्यथोपपत्तेरवहननस्य पाक्षिकी प्राप्तिः स्यात् । सति त्वस्मिन् विधौ-अवहननेनैव वैतुष्यं कार्यमिति नियमे सति विदलनं सर्वात्मना निवर्तत इति नियमविधिरयम् ।

तथैव अवहननपक्षे नखविदलनमप्राप्तं भवेत् । अतः क्रियाद्वयमपि वैकल्पिकम् नखविदलनपक्षे अवहननस्य अप्राप्तत्वात् अवहननं विनापि वैतुष्यस्य सत्त्वे अवहननस्य पाक्षिकी प्राप्तिः भवेत् । अतः 'अवहननेनैव वैतुष्यं कर्तव्यम्' इति नियमे कृते सति नखविदलनं सर्वथैव निवृत्तं भवति इति नियम विधेः स्वरूपम् ।

से ज्ञात पुरोडाश के उपयोगी तण्डुलनिष्पादनार्थ वैतुष्यरूप कार्य के लिये दर्शपूर्णमास से सम्बन्धित व्रीहियों में कभी अवधात कभी नखविदलनादि अन्य साधन भी प्राप्त हो सकते हैं। 'तुष' शब्द का भूसी या ऊपर का छिलका अर्थ है और उसी भूसी को हटाने की क्रिया को वितुषीकरण कहते हैं । वह अवधात से सम्भव है। वैतुष्य के लिये अनेक साधन वैकल्पिक रूप से प्राप्त हैं। जब नखविदलनादि से ही तण्डुल निष्पन्न कर लिया जायेगा, तब उस पक्ष में अवघात प्राप्त नहीं हो सकेगा। अतः अवघात के बिना भी तण्डुल निष्पादनरूप कार्य उपपन्न हो जायेगा। इसलिए अवधात की पाक्षिक प्राप्ति होगी अर्थात् कभी अवधात के द्वारा तण्डुलनिष्पादन किया जायेगा और कभी नखविदलनादि के द्वारा भी किया जा सकेगा। इस विधि के रहने पर ऐसा नियम किया जाता है कि "अवधात के द्वारा ही वैतुष्य सम्पादन करना चाहिए"। इस प्रकार के नियम को मान लेने पर नख-विदलनादि की अत्यन्त निवृत्ति हो जाती है। उसकी पुनः प्राप्ति की शङ्का भी नहीं की जा सकती है । इसलिए यह नियम विधि कहलाता है ॥ २५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(२६) नच वैतुष्यस्य नखविदलनेनापि सम्भवात् अवहननियमो व्यर्थः प्रयोजनाभावादिति वाच्यम् । अवघातेनैव वैतुष्यकरणे किञ्चिददृष्टं जन्यते इति नियमादृष्टाङ्गीकारात् । नियमेन दृष्टकार्याऽलाभेऽपि अदृष्टस्योत्पत्तेः । तच्चापूर्वं यागोत्पत्त्यपूर्वद्वारा फलाऽपूर्वे उपयुज्यते, तेन

(२६) अत्राशङ्कते--'न च वैतुष्यस्येति' । अत्रैवमाशंका भवितुमर्हति यत् तण्डुलनिष्पत्त्यनुकूला वितुषीकरणक्रिया नखविदलनेनापि यदा सम्भवति, तदा 'अवघातेनैव वितुषीकरणक्रिया कर्त्तव्या' इति नियमकरणं व्यर्थमेव, यतस्तस्य न किमपि प्रयोजनम् । तत्रोत्तरं दीयते--'अवघातेनैवेति' । एवं शंका न कर्तव्या, यतः अवहननक्रिययैव वितुषीकरणे सति एकमदृष्टं निष्पद्यते, इति नियमजन्यमदृष्टं स्वीकृतमस्ति । अवहननस्य नियमकरणेन यद्यपि दृष्टं प्रयोजनं (फलं) किमपि नास्ति, तथापि तादृशेन नियमेन एकमदृष्टमुत्पद्यते । तच्च नियमाऽदृष्टं यागजन्यस्योत्पत्त्यपूर्वस्य सहायकं सत् फलाऽपूर्वोपकारकं भवति । एवं च नियमाऽ-

(२६) शङ्का—अवघात का वैतुष्य ही प्रयोजन है । वह वैतुष्य नख विदलन आदि के द्वारा भी सम्भव है । अतः अवघात का नियम निरर्थक है; क्योंकि उसका कोई प्रयोजन नहीं दीख पड़ता ।

समाधान--अवघात के द्वारा ही वैतुष्य-निष्पादन करने पर उससे कुछ अदृष्ट उत्पन्न होता है । इस प्रकार उस नियम से नियमादृष्ट की उत्पत्ति मानी जाती है । यदि नखविदलनादि अन्य उपायों से तण्डुल का निष्पादन कर लिया जायेगा, तो यह नियमादृष्ट प्राप्त नहीं हो सकेगा । इसलिये नियमादृष्ट की प्राप्ति के लिये अवघात से ही तण्डुल का निष्पादन करना सार्थक है, निरर्थक नहीं । नियम से दृष्ट कार्य का लाभ न होने पर भी अदृष्ट की उत्पत्ति होती है । इस नियमजन्य अपूर्व का याग से उत्पन्न उत्पत्त्यपूर्व के द्वारा फलापूर्व में उपयोग होता है । इसलिए नियमापूर्व के अभाव में फलापूर्व ही उत्पन्न नहीं हो सकेगा; क्योंकि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नियमापूर्वाभावे फलापूर्वमेव नोत्पद्यते इति कल्पनान्नियमापूर्वस्य न वैयर्थ्यम्। एवं सोमक्रयादिनियमेऽपि बोध्यम्।

परिसंख्याविधिः

(२७) द्वयोः समुच्चित्य प्राप्ताबितरन्निवृत्तिफलको विधिः परिसङ्ख्याविधिः। यथा चयनप्रकरणे 'इमामगृभ्णन्

दृष्ट (नियमापूर्व) स्याऽभावे फलाऽपूर्वमेव नोत्पद्येतेति कल्पनया नियमापूर्वं न व्यर्थं भवति। अतो नियमकरणं सप्रयोजनमस्ति, न तद्व्यर्थमिति शंकनीयम्। एवमेव सोमलताक्रयणनियमविषयेऽपि अवगन्तव्यम्।

(२७) **परिसंख्यां** निरूपयति—'द्वयोरि'ति। द्वयोः स्थानयोः एक कार्यसम्पादनार्थं एकस्य पदार्थस्य युगपत्प्राप्तिसम्भवे एकस्मात् स्थानात् तस्य पदार्थस्य निवर्तको विधिः **परिसंख्याविधिः**। परिसंख्याया द्वौ प्रकारौ स्तः—

(१) "तत्र चान्यत्र च प्राप्ते" इति परिसंख्याया लक्षणे सप्तमीद्वयेन सह 'प्राप्ते' इत्यस्य वैयधिकरण्येन सामानाधिकरण्येन च द्विधा अन्वयः संभवति। तत्र वैयधिकरण्येन अन्वये 'तस्मिन् अन्यस्मिश्च' शेषिणि एकः शेषः यदि प्राप्नुयात्, तत्र अन्यतरशेषितः परिसंख्येति **'शेषिपरिसंख्या'** भवति। सामानाधिकरण्येन अन्वये तु 'स च अन्यश्च शेषः, एकस्मिन्

उसके अभाव में याग का वैकल्य हो जायेगा। मीमांसकों की इस प्रकार की कल्पना से नियमापूर्व का वैयर्थ्य सम्भव नहीं है। अतः नियमापूर्व, फलापूर्व का सहायक होता है॥ २६॥

(२७) जब एक ही लक्ष्य में समुदित रूप से दो कार्यों की प्राप्ति होती है, तब उनमें से एक की निवृत्ति-बोधक विधि को परिसंख्याविधि कहते हैं, जैसे—चयनप्रकरण में "इमामगृभ्णन्" इत्यादि मन्त्र श्रुत है। यह अश्व की रशना के ग्रहण का अङ्ग है, अर्थात् अश्वरशना ग्रहण का ही प्रतिपादक है। इस विधि के अभाव में रशना ग्रहण के बोधक मन्त्र रशना के आदान के बोधकता रूप सामर्थ्य (लिङ्ग प्रमाण) से अश्वरशना के

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रशनामृतस्य' इत्यश्वाभिधानीमादत्ते, इत्यश्वरशनाग्रहणाङ्ग-त्वेन मन्त्रविधिः। एतद्विध्यभावे हि-रशनाग्रहणप्रकाशको मन्त्रो रशनाऽऽदानप्रकाशनसामर्थ्यरूपात् लिङ्गात् अश्वरशनाऽऽदाने इव गर्दभरशनादानेऽपि नियमेन प्राप्नुयात्। सत्यस्मिन्

शेषिणि प्राप्नुयात् चेत् अन्यतरस्य शेषस्य परिसंख्या 'शेषपरिसंख्या' भवति। एवञ्च एकस्मिन् अंगे प्रधानद्वय (अंगिद्वय) सम्बन्धे नियतप्राप्ते, एकस्मिंश्च प्रधाने (अंगिनि) अंगद्वयसंबंधे नियतप्राप्ते सति अन्यतर-निवृत्तिफलको विधिः **परिसंख्याविधिरिति** विज्ञेयम्। **इतरेति**। इतरस्मात् निवृत्तिः इतरनिवृत्तिः, सा फलं यस्य सः इतरनिवृत्तिफलकः इति—विग्रहः। ग्रन्थोक्तपरिसंख्यालक्षणस्यायमाशयः—एकस्मिन् शेषिणि द्वयोः शेषयोः (अंगयोः) युगपत्प्राप्तौ सत्यां इतरस्य विधेयात् शेषात् (अंगात्) भिन्नस्य शेषस्य (अंगस्य) निवृत्तिकरणं फलं यस्य सः परिसंख्याविधिः। तत्र शेषिपरिसंख्यायाः उदाहरणं दर्शयति—**चयनेति**'। चयनप्रकरणगतः '**इमामगृभ्णन्०**' इति मन्त्रः, अश्वरशनाग्रहणस्य अंगत्वेन विहितोऽस्ति। 'इत्यश्वाभिधानीमादत्ते' इत्ययं विधिर्न स्याच्चेत् 'इमामगृभ्णन् रशना-मृतस्य' इति मन्त्रगतेन 'रशनाग्रहण' रूपार्थप्रकाशनात्मकेन लिङ्गप्रमाणेन अश्वरशनाग्रहणवत् गर्दभरशनाग्रहणेऽपि उपर्युक्तस्य मंत्रस्य विनियोगो

आदान (ग्रहण) के समान नियमतः गर्दभ के रशना के आदान में भी प्राप्त होगा। इस विधि के रहने पर यह बोध होता है कि मन्त्र के द्वारा गर्दभरशना का ग्रहण न करे। रशना=लगाम। गर्दभरशना का चुपचाप अर्थात् विना मन्त्रोच्चारण के ही ग्रहण किया जाता है। इसलिए गर्दभ-रशना के आदान में मन्त्र की निवृत्ति हो जाती है। इस प्रकार के स्थलों मे दोनों की युगपत् रूप से प्राप्ति रहने पर अन्य की निवृत्ति हो जाना ही उसका फल होने से यह परिसंख्या विधि कहलाती है। इसी प्रकार की परिसंख्याविधि "पञ्च पञ्च नखाः" इत्यादि स्थलों में भी समझनी चाहिए। परि=वर्जन और संख्या=बुद्धि अर्थात् वर्जनबुद्धि ही परिसंख्या है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

विधौ-अनेन मन्त्रेण अश्वरशनामेवाददीत, न तु गर्दभरशनाम्। सा तु तूष्णीमेव ग्राह्येति गर्दभरशनायां मन्त्रनिवृत्तिर्भवतीति द्वयोः समुच्चित्य प्राप्तावितरनिवृत्तिफलकत्वादयं परिसङ्ख्याविधिः। एवं 'पञ्च पञ्चनखा भक्ष्या' इत्यादावपि बोध्यम्।

भवेत्, किन्तु 'इत्यश्वाभिधानीमादत्ते' इति विधिसत्त्वे उपर्युक्तेन 'इमामगृभ्णन्' इति मन्त्रेण अश्वरशनाया एव ग्रहणं कर्तव्यम्, गर्दभरशनाया ग्रहणं न कर्तव्यम्। गर्दभरशनाया ग्रहणममन्त्रकमेव कर्तव्यम्। इत्येवं प्रकारेण (लिंगप्रमाणेन) गर्दभरशनाग्रहणे प्राप्तस्य उपर्युक्तस्य मन्त्रस्य निवृत्तिर्भवति। अतः शेषरूपो मन्त्रात्मक एकः पदार्थः, अश्वरशनाग्रहणे, गर्दभरशनाग्रहणे चेति द्वयोः शेषिणोः स्थाने लिंगप्रमाणेन युगपत्प्राप्तः आसीत्, तदा विधिवचनानुरोधेन एकस्माच्छेषिणः सकाशात् तस्य मन्त्रात्मकस्य शेषस्य निवृत्तिरनेनविधिना प्रतिपादितेति अयं शेषि-परिसंख्याविधिः सिद्धो भवति।

मूले 'गर्दभरशनायां मन्त्रनिवृत्तिर्भवति' इत्यत्र 'गर्दभरशनायाः' इति पञ्चम्यन्तः पाठः साधुरिति प्रतिभाति।

शेषपरिसंख्याया उदाहरणम्—'पञ्च-पञ्चनखेति'।

'पञ्च-पञ्चनखा भक्ष्या ब्रह्मक्षत्रेण राघव।
शशकः शल्लकी गोधा खड्गी कूर्मोऽथ पञ्चमः॥
—(वा० रा० कि० कां० १७।३९)

शङ्का—नियमविधि में अन्य पक्ष की निवृत्ति होती है तथा परिसंख्याविधि में भी अन्य पक्ष की निवृत्ति ही होती है, तब दो विधियों को मानने की क्या आवश्यकता है? किसी एक को ही क्यों न मान लिया जाय?

समाधान—नियमविधि में पदार्थ की पाक्षिक अप्राप्ति रहती है, जैसे—तण्डुल-संपादक अवघात की नखविदलन या अश्म कुट्टन के पक्ष में

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अर्थः—हे राम ! शशकः (खरगोश) शल्लकी, गोधा, खड्गी, कूर्मः इमे नखपञ्चकयुक्ताः पञ्च प्राणिनः ब्राह्मणक्षत्रियाणां भक्षणार्हाः, तदितरेषां पञ्चनखिनां प्राणिनां भक्षणं न कर्तव्यम्। एतदर्थकं वचनं देवलस्मृतौ—

'पञ्च पञ्चनखा भक्ष्या धर्मतः परिकीर्तिताः।

गोधा कूर्मः शशः खड्गी शल्लकश्चेति ते स्मृताः ॥' (देव० स्मृ०)।

तथा याज्ञवल्क्यस्मृतौ—'भक्ष्याः पञ्चनखाः सेधा-गोधा-कच्छप-शल्लकाः।' तथा मनुस्मृतौ—'श्वाविधं शल्लकं गोधां खड्गकूर्मशशांस्तथा। भक्ष्यान् पञ्चनखेष्वाहुः ॥' सर्वत्रैव परिसंख्याविधिरेवाभ्युपगतोऽस्ति। अत्र 'पञ्च पञ्चनखा भक्ष्याः' इत्युदाहरणे श्लोकेषु परिगणिताः ये पञ्चनख-प्राणिनः, तदितरेऽपि पञ्चनखप्राणिनः सन्ति, द्वयोरपि शेषभूतानां (अंगभूतानां) परिगणितानां तदितरेषामपि पञ्चनखिनां रागतः भक्षणीयत्वं प्राप्तं, तदा परिगणितेतरपञ्चनखिनां भक्षणात् निवृत्तिकरणार्थं अयं विधिः (पंच पंचनखा भक्ष्याः) प्रवृत्तोऽस्ति। अतोऽयं परिसंख्याविधिः। रामायणादिस्मृतिवचनः पञ्चनखभक्षणं कर्तव्यमिति न विधीयते, यतः तत्र भक्षणे मांसभक्षणे मनुष्यस्य रागत एव (स्वाभाविकी एव) प्रवृत्तिरस्ति। एवं न तद्भक्षणं तु रागाद् एव प्राप्तम्, तत्र विधेः प्रवृत्तिर्नास्ति। विधिस्तु अप्राप्तं विदधाति। क्षुन्निवारणार्थं परिगणिताऽपरिगणितानां पञ्चनखिनां प्राणिनां रागतो भक्षणे प्राप्ते सति परिगणितेतर-पञ्चनखिनां भक्षणनिवृत्त्यर्थं अयं विधिः (पंच पंचनखा भक्ष्याः) प्रतीयते। अत इयं शेषपरिसंख्या वर्तते। नियमविधौ परिसंख्या विधौ चापि साधनान्तरनिवृत्तेः समानत्वात् उभयोः को भेदः ? इति प्रश्ने सति समाधानमिदम् – नियमस्थले वचनस्य न निवृत्तौ तात्पर्यम्, किन्तु

अप्राप्त रहती है। तुष-युक्त धान में ही उसकी प्रवृत्ति होती है। परिसंख्या स्थल में दो पदार्थों की युगपत् प्राप्ति होती है, जैसे—"इमामगृभ्णन्" इत्यादि स्थलों में रशना-ग्रहण के बोधक लिङ्ग-प्रमाण से अश्वरशना तथा गर्दभ-रशना दोनों का आदान युगपत् प्राप्त है।

किन्तु परिसंख्या के द्वारा गर्दभ-रशना के आदान की निवृत्ति की जाती है। इसीलिये "इतरनिवृत्तिफलकत्वं परिसंख्यात्वम् लक्षण भी सुसङ्गत

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ द्वितीयं प्रकरणम्

श्रुत्यादिषट्प्रमाणानि

(२८) पूर्वं दर्शपूर्णमासाङ्गत्वं प्रयाजादीनामुक्तम्। तत्राङ्गत्वबोधकप्रमाणानि श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्याभेदेन षट्।

श्रुतिप्रमाणनिरूपणम्

(२९) तत्र 'दध्ना जुहुयात्' इत्यत्राग्निहोत्रवाक्यप्राप्तं

अप्राप्तांशपूरणे। परिसंख्यायां तु निवृत्तौ एव शब्दतात्पर्यम्। एवं च नियमविधिर्भावविषयकः, परिसंख्याविधिश्च अभावविषयकः इति उभयोर्भेदः।

(२८) पूर्वं तावत् दर्शपूर्णमासकर्मणः प्रयाजानुयाजादीनि अंगानीत्युक्तम्। तत्र (१) श्रुतिः, (२) लिङ्गम्, (३) वाक्यम्, (४) प्रकरणम्, (५) स्थानम्, (६) समाख्या इति षट्संख्याकानि अंगत्वबोधकप्रमाणानि भवन्ति।

(२९) 'तत्रेति। तत्र षट्सु प्रमाणेषु श्रुतिप्रमाणेन अंगत्वबोधनम्—'दध्ना जुहुयाद्' इत्यत्र 'अग्निहोत्रं जुहोती' ति अग्निहोत्रहोमविधायकेन

होता है। दोनों विधियों में परस्पर यही भेद है। इसीलिये दोनों विधियों को अपने-अपने लक्ष्य की सिद्धि के लिये मानना अत्यन्त आवश्यक है।

(२८) प्रयाज आदि दर्शपूर्णमास के अङ्ग हैं—यह पहले बताया जा चुका है। किसी प्रमाण के बिना अङ्गाङ्गिभाव का ज्ञान नहीं हो सकता। अतः अङ्गता-बोधक प्रमाणों का निरूपण करते हैं। वे छः प्रमाण हैं—श्रुति, लिङ्ग, वाक्य, प्रकरण, स्थान तथा समाख्या। इन्हीं प्रमाणों के द्वारा अङ्गता का बोध कराया जाता है। आगे सभी प्रमाणों का स्वरूप तथा उदाहरण आदि बताये जा रहे हैं।

(२९) उपर्युक्त छः प्रमाणों में सबसे ज्येष्ठ तथा श्रेष्ठ होने के कारण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

होमं जुहुयादित्यनेनोद्दिश्य तत्करणत्वेन तृतीयाश्रुत्या दधि विधीयते इति श्रुत्या दध्नोऽङ्गत्वम् ।

लिङ्गप्रमाण-निरूपणम्

(३०) लिङ्गं नाम सामर्थ्यम् । तच्च द्विविधम्-अर्थगतं शब्दगतञ्चेति । आद्यं यथा—'स्रुवेणावद्यति' इत्य-

---

वाक्येन प्राप्तं होमं 'जुहुयात्' इत्यनेन पदेन उद्दिश्य, तत्करणत्वेन रूपेण 'दध्ना' इति तृतीया श्रुत्या 'दधि' विधीयते। अतः तृतीयाश्रुतिप्रमाणेन दध्नः होमाङ्गत्वं निश्चीयते ।

(३०) लिङ्गं नाम सामर्थ्यम् । सामर्थ्यं शक्तिरितियावत् । तच्च

श्रुति-प्रमाण का पहले निरूपण करते हैं। ग्रन्थकार ने श्रुति का लक्षण प्रस्तुत नहीं किया है। केवल उदाहरण देकर समझाने का प्रयास किया है । मीमांसान्यायप्रकाश आदि में लक्षण प्रदर्शित किया गया है। उसके अनुसार 'निरपेक्ष रव' को श्रुति कहते हैं। 'रव' का अर्थ शब्द है अर्थात् प्रमाणान्तर की अपेक्षा न रखने वाला शब्द-समूह श्रुति है। श्रुति की प्रामाणिकता के लिये अन्य किसी प्रमाण की अपेक्षा नहीं होती। वह विधात्री, अभिधात्री तथा विनियोक्त्री भेद से तीन प्रकार की होती है। उसमें विनियोक्त्री भी तीन प्रकार की होती है—विभक्तिरूपा, एकाभिधानरूपा तथा एकपदरूपा उनमें से विभक्ति रूपा का "व्रीहिभिर्यजेत" "दध्ना जुहुयात्" इत्यादि उदाहरण हैं। अग्निहोत्रं जुहोति' इस अग्निहोत्र के विधायक वाक्य से ज्ञात हुए होम को उद्देश्य करके उसके करण रूप में 'दधि' द्रव्य का विधान किया गया है; क्योंकि उस में तृतीया विभक्ति श्रुत है। उसी तृतीया के द्वारा यह ज्ञात होता है कि 'दधि' होम का अङ्ग है। इसी प्रकार तृतीयाश्रुति के बल से ही 'व्रीहिभिर्यजेत' इत्यादि में विभक्तिरूपा श्रुति से व्रीहि में याग के अङ्गत्व का बोध होता है। इसका साङ्गोपाङ्ग तथा विस्तृत विवेचन मीमांसान्यायप्रकाश आदि ग्रन्थों में किया गया है।

(३०) श्रुतिप्रमाण का निरूपण करने के पश्चात् क्रम प्राप्त होने के कारण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वदानसामान्यशेषत्वावगमेऽपि स्रुवस्य सामर्थ्यरूपात् लिङ्गात् आज्यसान्नाय्यादिद्रवद्रव्यस्यावदानविशेषाङ्गत्वम्। स्रुवेण पुरोडाशाद्यवदानस्य कर्तुमशक्यत्वात्।

शब्दगतं तु लिङ्गमर्थप्रकाशनसामर्थ्यम्। यथा—'अग्नये त्वा जुष्टं निर्वपामि' इति मन्त्रस्य निर्वापप्रकाशनसामर्थ्य-

---

सामर्थ्यं द्विप्रकारकम्, तत्र एकमर्थगतं द्वितीयं शब्दगतम्। तत्र प्रथमस्य उदाहरणम्—'स्रुवेण अवद्यति' इति वाक्ये 'अवद्यति' पदं दृष्ट्वा स्रुवस्य अवदानमात्राङ्गत्व यद्यपि ज्ञायते, तथापि अर्थगतसामर्थ्यरूपेण लिंगप्रमाणेन आज्य-सान्नाय्यादिद्रवद्रव्याणामवदाने एव स्रुवः अंगं भवति। यतः स्रुवाख्येन यज्ञीयपात्रेण पुरोडाशादिकठिनद्रव्यावदानं—नैव शक्यम्। अधुना द्वितीयं लक्षयति शब्दगतं त्विति। शब्दगतं तु लिङ्गम् अर्थप्रकाशन-सामर्थ्यम्। शब्दः स्वनिष्ठसामर्थ्येन अर्थं बोधयति। अतः शब्दगतं लिङ्ग

लिङ्गप्रमाण का निरूपण करते हैं। सामर्थ्य को लिङ्ग कहते हैं। आपदेव ने भी यही लक्षण उपस्थित किया है। लौगाक्षिभास्कर का कहना है कि सामर्थ्य मात्र को लक्षण मानने पर बीज आदि में अतिव्याप्ति हो जायेगी; क्योंकि उसमें भी अङ्कुरोत्पादन का सामर्थ्य देखा जाता है। अतः उस अतिव्याप्ति को दूर करने के लिये लक्षण में 'शब्द' पद का उपादान आवश्यक माना है। इसलिये उन्होंने 'शब्द-सामर्थ्यं लिङ्गम्' लक्षण प्रस्तुत किया है। शब्द में जो अर्थ-प्रकाशन करने का सामर्थ्य, है उसी को लिङ्ग माना है। ग्रन्थकार ने सामर्थ्य को लिङ्ग माना है। सामर्थ्य= शक्ति। वह दो प्रकार का होता है—अर्थगत और शब्दगत। अर्थगत लिङ्ग का उदाहरण प्रस्तुत करते हैं—'स्रुवेण अवद्यति' इत्यादि। यहाँ अवदान का खण्डन अर्थ है; क्योंकि 'दो' धातु अवखण्डनार्थक है। उपर्युक्त मन्त्र से प्रतीत होता है कि यह स्रुव, अवदान-सामान्य अर्थात् अवदानमात्र का अङ्ग है, तथापि स्रुव में रहनेवाले सामर्थ्य रूप लिङ्ग से प्रतीत होता है कि वह (स्रुव) आज्य, सान्नाय्य आदि द्रव पदार्थों के

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रूपात् लिङ्गान्निर्वापाङ्गत्वम् । यस्य मन्त्रस्य यत्प्रकाशन-सामर्थ्यं तस्य तदङ्गत्वम् ।

वाक्यनिरूपणम्

(३१) पदान्तरसमभिव्याहारो वाक्यम् । यथा—'इषे त्वेति छिनत्ति' इति । अत्र छेदनांगत्वेन 'इषे त्वा' इति

नाम अर्थप्रकाशनशक्तिः । यथा शब्दगतलिंगस्य उदाहरणम्—'अग्नये त्वा जुष्टं निर्वपामि'' इति मंत्रे 'निर्वपामि' शब्दः निर्वापक्रियां प्रकाशयितुं समर्थोऽस्ति । अतः अर्थप्रकाशनसामर्थ्यरूपेण लिंगप्रमाणेन 'अग्नये त्वा जुष्टं निर्वपामि' इति मन्त्रः, निर्वापक्रियायामङ्गं भवति । यो मन्त्रः यां क्रियां प्रकाशयति, स मन्त्रः तस्यां क्रियायामंगं भवति । यथा—'बर्हिर्देवसदनं दामि' इति मन्त्रः, कुशच्छेदनात्मकमर्थं प्रकाशयितुं समर्थोऽस्ति । अतः शब्दसामर्थ्यरूपेण लिंगेनाख्यं मंत्रः कुशच्छेदनक्रियायामङ्गं भवति ।

(३१) 'अर्थप्रकाशनयोग्यानां पदानां अव्यवधानेन उच्चारणं' इति 'वाक्य' प्रमाणस्य लक्षणम् । यथा—'इषेत्वा इति छिनत्ति' अत्र छेदन-

---

अवदान-विशेष का ही अङ्ग, है, अवदान-सामान्य का नहीं । कारण यह है कि स्रुव के द्वारा पुरोडाश आदि का अवदान नहीं किया जा सकता; क्योंकि पुरोडाश के अवदान का उसमें सामर्थ्य नहीं है ।

अर्थप्रकाशन के सामर्थ्य को शब्दगत 'लिङ्ग' कहते हैं । उदाहरण-'अग्नये त्वा जुष्टम्०' इत्यादि । यह मन्त्र निर्वापरूप 'अर्थ' प्रकाशन के सामर्थ्यरूप लिङ्ग से 'निर्वाप' का अङ्ग प्रतीत होता है । जिस मन्त्र में जिस अर्थ के प्रकाशन का सामर्थ्य रहता है, वह 'मन्त्र' उसी का अङ्ग होता है । यहाँ पर 'अग्नये त्वा' इत्यादि मन्त्र में निर्वापरूप अर्थ-प्रकाशन करने का सामर्थ्य है । अतः यह मन्त्र 'निर्वाप' का अङ्ग होता है । आपदेव ने सम्बन्धसामान्यबोधकप्रमाणान्तरानपेक्ष और सम्बन्धसामान्यबोधक-प्रमाणान्तरसापेक्ष रूप दो भेदों को दिखलाया है । इसकी विशेष जानकारी उन्हीं के ग्रन्थ से करनी चाहिए ।

(३१) अन्य पदों के समभिव्याहार को 'वाक्यप्रमाण' कहते हैं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मन्त्रो वाक्येन विधीयते। यद्वा 'अग्नये जुष्टम्' इत्यत्रैव अग्नये जुष्टमित्यादिपदानां निर्वपामीत्यनेनैकवाक्यतापन्न-त्वान्निर्वापाङ्गत्वम्।

प्रकरणनिरूपणम्

(३२) प्रकरणं नाम परस्पराकांक्षा। यथा—'दर्श-

क्रियाया अंगत्वेन रूपेण 'इषेत्वा' इति मन्त्रस्य विधानं वाक्यप्रमाणे क्रियते। 'यद्वे' त्यनेनापरमपि उदाहरणं दीयते--'अर्थैकत्वादेकं वाक साकांक्षं चेद् विभागे स्यात्' इति एकवाक्यत्वलक्षणानुसारेण 'अग्न त्वा जुष्टं निर्वपामि' अत्र 'अग्नये' 'त्वा' 'जुष्टम्' इत्येषां पदानां 'निर्वपा इत्यनेन पदेन सह एकवाक्यतया अयं मन्त्रः निर्वापक्रियायामङ्ग भवति

(३२) 'परस्परमङ्गाङ्गिनोरुभयोराकांक्षा प्रकरणम्' इति 'प्रकरण प्रमाणस्य लक्षणम्। यथा–'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्य

आपदेव तथा लौगाक्षिभास्कर ने 'पदान्तर' विशेष न देते हुए केव समभिव्याहार को ही लक्षण माना है। अङ्ग तथा अङ्गी का एक सा उच्चारण करना ही समभिव्याहार कहलाता है। उदाहरण—'इषे त्वा इस मन्त्र से छेदन किया जाता है। यहाँ वाक्यप्रमाण से यह ज्ञात हो है कि 'इषे त्वा' यह मन्त्र छेदन के अङ्गरूप से विहित है। इसलिये 'छेद अङ्गी और 'मन्त्र' अङ्ग हुआ। इन दोनों का एक साथ उच्चारण कर ही वाक्यप्रमाण है। अथवा 'अग्नये जुष्टम्०' इस वाक्य में ही 'अग्न जुष्टम्' इत्यादि पदों की 'निर्वपामि' इस पद के साथ एकवाक्य होती है। अतः एकवाक्यता होने के कारण यह मन्त्र निर्वाप का अ सिद्ध होता है।

(३२) जहाँ परस्पर दोनों को आकांक्षा हो, उसीको प्रकरणप्रमा कहते हैं। उदाहरण—'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' अर्थात् द पूर्णमास के द्वारा स्वर्गजनक 'अपूर्व' की भावना (उत्पादन) करे। अर्थ को जानने पर यह आकांक्षा होती है कि दर्शपूर्णमास से स्वर्ग

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पूर्णमासाभ्यां स्वर्गकामो यजेत इति दर्शपूर्णमासाभ्यां स्वर्गापूर्वंकुर्य्यादित्युक्ते भवत्याकाङ्क्षा कथमाभ्यां स्वर्गापूर्वं कर्त्तव्यमिति। तथा फलवदाग्नेयादिसन्निधौ 'समिधो यजति', 'तनूनपातं यजति', 'आज्यभागौ यजति'इत्यादिभिः प्रयाजादयः फलरहिताः श्रुताः, तेषां स्ववाक्येषु फलाश्रवणात् भवति प्रयोजनाकाङ्क्षा, किमेतेषां प्रयोजनमिति। ततश्च प्रयाजादीनां प्रयोजनाकाङ्क्षायां दर्शपौर्णमासयोः कथम्भा-

---

'दर्शपूर्णमासाभ्यां स्वर्गापूर्वमुत्पादयेत्' इत्युक्ते ताभ्यां (दर्शपूर्णमासाभ्यां) स्वर्गापूर्वं कथमुत्पादयेत् ? इत्याकारिका आकांक्षा उत्पद्यते। तथा स्वर्गादिफलसाधनत्वेन अवगतानां आग्नेयादिवाक्यानां समीपे एव 'समिधो यजति' इत्यादिवाक्यैः फलरहितानि प्रयाजादीनि श्रुतानि सन्ति। प्रयाजादीनां तद्बोधक (तद्विधायक) वाक्येषु फलं न श्रुतमस्ति। तस्मात् प्रयाजादीनां किं फल (प्रयोजन) मिति आकांक्षा उत्पद्यते। एवंच प्रयाजादीनां यागानां, फला (प्रयोजना) कांक्षा यथा भवति, तथा दर्शपूर्णमासयोः इतिकर्तव्यताकांक्षा उत्पद्यते। तेन उभयाकांक्षारूपेण प्रकरणप्रमाणेन फलरहितानां सर्वेषां प्रयाजादीनां दर्शपूर्णमासांगता

का सम्पादन कैसे करें। इसी प्रकार फलयुक्त आग्नेय आदि यागों के समीप 'समिधो यजति' इत्यादि 'प्रयाज' भी पठित हैं। जिनका कोई फल श्रुत नहीं है। अतः स्ववाक्य में फल-श्रवण न होने पर तद्विषयक प्रयोजन की आकांक्षा होती है कि इन प्रयाजों का क्या प्रयोजन है ? इस प्रकार प्रयाजादि को 'प्रयोजन' की आकांक्षा है तथा दर्शपूर्णमास को—'इति कर्त्तव्यता' की आकांक्षा है। दोनों एक दूसरे के प्रति साकांक्ष हैं। इसलिये परस्पराकांक्षा-लक्षण प्रकरणप्रमाण से प्रयाज आदि सभी, दर्शपूर्णमास के अङ्ग निश्चित होते हैं। मीमांसकों ने इसी को—'प्रकरण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाकाङ्क्षालक्षणेन प्रकरणेन प्रयाजादीनां सर्वेषां दर्शपौर्णमासाङ्गत्वं निश्चीयते ।

स्थानप्रमाणनिरूपणम्

(३३) स्थानं नाम सन्निधिः । यथा सान्नाय्यपात्रसन्निधौ 'शुन्धध्वम्' इतिमन्त्रस्य पाठात् सन्निधानात् सान्नाय्यपात्रप्रोक्षणाङ्गत्वम् ।

निश्चीयते । अतः प्रयाजादयः दर्शपूर्णमासकर्मणि अङ्गमिति प्रकरणप्रमाणेन ज्ञायते ।

(३३) स्थानं नाम सान्निध्यम् । यथा—सान्नाय्य-पात्रसन्निधौ 'शुन्धध्वं दैव्याय कर्मणे देवयज्यायै' अयं मन्त्रः पठितोऽस्ति । तेन स्थानप्रमाणेन सन्निधिपाठवशात् अयं मंत्रः, सान्नाय्य-पात्रप्रोक्षणे अंगं भवति ।

प्रमाण' कहा है । यह दो प्रकार का होता है—महाप्रकरण और अवान्तर प्रकरण । इस प्रयाजादि को अङ्गता महाप्रकरण के द्वारा होती है ।

(३३) प्रकरणप्रमाणनिरूपण के पश्चात् क्रमप्राप्त 'स्थानप्रमाण' का निरूपण करते हैं । सन्निधि को स्थान कहते हैं । आपदेव तथा लौगाक्षिभास्कर ने देशासामान्य को स्थान-प्रमाण माना है । उदाहरण—सान्नाय्यपात्र के सन्निधि में 'शुन्धध्वं दैव्याय कर्मणे देवयज्यायै' इस मन्त्र का पाठ है । अतः सान्नाय्यपात्र के प्रोक्षण का उसे अङ्ग माना जाता है । यह अङ्गता स्थान-प्रमाण से ज्ञात होती है । लौगाक्षिभास्करप्रभृति आचार्यों ने इसके दो भेद भी प्रदर्शित किये हैं—पाठसादेश्य और अनुष्ठानसादेश्य । उसमें पाठासादेश्य के भी दो भेद हैं—यथासंख्यपाठ और सन्निधिपाठ । ये स्थान और क्रम को एकार्थक मानते हैं । उपर्युक्त अङ्गता सन्निधि—पाठ के अनुसार मानी गयी है । सम्भवतः इसी कारण से ग्रन्थकार ने स्थान को सन्निधिरूप माना है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समाख्याप्रमाणनिरूपणम्

(३४) समाख्या संज्ञा। यथा अध्वर्युकाण्डप्रतिपादिते कर्मजाते आध्वर्यवसमाख्यावशात् अध्वर्योः कर्तृत्वेनाङ्गत्वम्, तथा 'ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः' इत्यादिषु काम्येष्टिसमाख्यातेषु ऐन्द्राग्नादियागेषु काम्येष्टियाज्यानुवाक्याकाण्डसमाख्यावशात् 'उभा वामिन्द्राग्नी' इत्यादीनां याज्यानुवाक्यत्वेन विनियोगः। विनियोगो नाम अङ्गत्वेनान्वयः।

---

(३४) 'समाख्या' नाम यौगिकपदस्यं अवयवार्थवशाज्जायमाना संज्ञा। यथा --अध्वर्युकाण्डे प्रतिपादितस्य अग्न्यन्वाधानादिकर्मसमुदायस्य 'आध्वर्यवम्' इति समाख्या (संज्ञा) अस्ति। अतः तत्कर्मणि तत्कर्तृत्वरूपेण अध्वर्युः अंगं भवति। तथैव 'ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः' इत्यादिवाक्यैर्विहितानाम्-'उभावामिन्द्राग्नी' त्यादीनां मंत्राणां काम्येष्टियाज्यानुवाक्याकाण्डे' ति समाख्या (संज्ञा) वशात् याज्यानुवाक्यारूपेण 'एन्द्राग्नादिकाम्येष्टियागेषु विनियोगः कृतोऽस्ति। विनियोगो नाम अंगरूपेण अन्वयः।

---

(३४) संज्ञा को 'समाख्या' कहते है। उदाहरण—अध्वर्युकाण्ड में कर्मसमूहों का प्रतिपादन किया गया है। उसकी 'आध्वर्यव' समाख्या के कारण कर्त्ता के रूप से 'अध्वर्यु' उसका अङ्ग होता है। इसको अङ्गता में समाख्या ही कारण है। इसी प्रकार 'ऐन्द्राग्नमेकादशकपालम्॰' इत्यादि में काम्येष्टिरूप से प्रतिपादित ऐन्द्राग्नादि यागों में काम्येष्टियाज्यानुवाक्याकाण्ड-समाख्या के कारण 'उभा वामिन्द्राग्नी' इत्यादि का याज्यानुवाक्या के रूप से विनियोग होता है। अङ्गरूप से अन्वय के होने को ही विनियोग कहते हैं। लौगाक्षिभास्कर आदि ने 'यौगिक' शब्द-को समाख्या कहा है तथा उसके दो भेद भी बताये हैं—वैदिकी और लौकिकी।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रुतिप्राबल्यनिरूपणम्

(३५) श्रुत्यादीनामेकत्र समावेशे पूर्वपूर्वस्य प्राबल्यम्, उत्तरोत्तरस्य दौर्बल्यम् । यथा—'कदाचन स्तरीरसि इत्यैन्द्रचा गार्हपत्यमुपतिष्ठते' इत्यग्निहोत्रप्रकरणे श्रूयते । तत्र मन्त्रस्य इन्द्रप्रकाशनसामर्थ्यरूपात् लिङ्गात् इन्द्रोपस्थानाङ्गत्वे प्राप्ते, ऐन्द्रचा इति तृतीयाश्रुत्या गार्हपत्यमिति द्वितीयाश्रुत्या च गार्हपत्योपस्थानाङ्गत्वेन विधानात् लैङ्गिक इन्द्रोपस्थाने

---

(३५) उपर्युक्तानां श्रुत्यादिप्रमाणानां एकस्मिन्नेव स्थले प्राप्तं सत्यां पूर्व-पूर्वप्रमाणस्य प्राबल्यम्, उत्तरोत्तरस्य प्रमाणस्य दौर्बल्यम् तेन प्रबलेन प्रमाणेन, दुर्बलस्य प्रमाणस्य बाधो भवति । तत्र श्रुतिप्राब ल्यस्य उदाहरणम् । यथेति—चयनयागप्रकरणे 'कदाचनस्तरीरसि नेन्द्र सश्चसि दाशुषे' इति ऐन्द्रया ऋचा, गार्हपत्यमुपतिष्ठते' इत्युक्तमस्ति अत्र इन्द्रदेवतात्मकस्यार्थस्य प्रकाशनसामर्थ्यरूपेण लिङ्गप्रमाणेन ऐन्द्र्य ऋचः (ऐन्द्रमंत्रस्य) इंद्रोपस्थानाङ्गत्वं प्राप्तमस्ति । अर्थात् ऐन्द्रे मंत्रेण इन्द्रदेवताया उपस्थानं कर्तव्यमिति लिङ्गप्रमाणेन ज्ञायते । तत्र 'ऐन्द्रचा गार्हपत्युमुपष्ठिते' इत्यत्र 'ऐन्द्रचा' इति तृतीयाश्रुत्या 'गार्हपत्यम्' इति द्वितीयाश्रुत्या च तस्यैव ऐन्द्रमंत्रस्य, गार्हपत्योपस्थानाङ्गत्वम् प्राप्तमस्ति । अर्थात् ऐन्द्रचा ऋचा (ऐन्द्रेण मंत्रेण) गार्हपत्यस्य उ

---

(३५) अङ्गत्व-बाधक श्रुति आदि छः प्रमाणों का निरूपण किया गया । उन सब का किसी एक लक्ष्य में समावेश (प्राप्ति) होने पर पूर्व-पूर्व प्रमाण प्रबल होता है और क्रमशः पश्चात्-पश्चात् का प्रमाण दुर्बल होता है । महर्षि जैमिनि ने भी कहा है कि श्रुति आदि प्रमाणों में क्रमशः पश्चाद्भावी प्रमाणों का दौर्बल्य होता है, क्योंकि पश्चाद्भावी प्रमाणों की प्राप्ति क्रमशः विप्रकृष्ट (दूर) होती जाती है । तात्पर्य यह है कि पश्चाद्वर्त्ती प्रमाण जब तक अङ्गत्व का बोध कराना चाहता है तब तक उसके पहले वाला प्रमाण शीघ्र ही प्रवृत्त हो जाता है । अ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

विनियोगो बाध्यते। श्रुतिर्हि स्वतो विनियोजिका। लिङ्गन्त्विन्द्रप्रकाशनसामर्थ्यमालोच्य 'ऐन्द्र्यचेन्द्रमुपतिष्ठते' इति

स्थानं कर्तव्यमिति श्रुतिप्रमाणेन ज्ञायते। तत्र किं कर्तव्यमिति सन्देहे सति श्रुति-लिङ्गयोः प्रमाणयोः प्राबल्य-दौर्बल्य निरीक्षणेन निर्णयः क्रियते। श्रुत्या अर्थात् श्रुतिप्रमाणेन ऐन्द्रमंत्रस्य, गार्हपत्योपस्थानाङ्गत्वेन विधानात्, लिंगप्रमाणप्राप्तस्य इन्द्रोपस्थाने मंत्रविनियोगस्य तथा बाधो भवति। लिगप्रमाणापेक्षया पूर्वप्रमाणं 'श्रुतिः' अस्ति, अतः सा, तदपेक्षया प्रबला। अतः श्रुतिः स्वयमेव अंगत्वेन विनियोगं करोति। लिंगप्रमाणं तु श्रुतिं (ऐन्द्र्या गार्हपत्यमुपतिष्ठते इति श्रुतिं) कल्पयित्वा विनियों

पश्चाद्वर्त्ती प्रमाणों की दुर्बलता अवश्यम्भावी है। उदाहरण—चयन प्रकरण में 'कदाचनस्तरीरसीत्यैन्द्र्या गार्हपत्यमुपतिष्ठते' इत्यादि सुना जाता है। मन्त्र में 'इन्द्र' पद आया है। यह शब्द 'इन्द्र' देवतारूप अर्थ का प्रकाशन करता है। अतः इन्द्रदेवतारूप अर्थप्रकाशनसामर्थ्यरूप लिंगप्रमाण के अनुसार 'कदाचन स्तरीरसि' मन्त्र में इन्द्रोपस्थानाङ्गत्व प्राप्त होने पर 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इस ब्राह्मणवाक्य में 'इन्द्र का यह' इस अर्थ में 'तस्येदम्' सूत्र से तद्धितप्रत्यय का विधान किया गया है तथा स्त्रीत्व की विवक्षा के कारण ङीप् प्रत्यय किया गया है। 'ऐन्द्र्या' पद में तृतीयाविभक्ति 'गार्हपत्यम्' पद में द्वितीया विभक्ति रूप श्रुति से गार्हपत्योपस्थान के अंगरूप में मन्त्र का विनियोग होने से लिङ्ग प्रमाण से प्राप्त इन्द्रोपस्थानांगत्व का बाध हो जाता है। क्योंकि श्रुति प्रमाण सबसे प्रबल प्रमाण है। 'श्रुति' प्रमाण स्वतः विनियोजक होता है। विनियोग करने के लिये उसे अन्य प्रमाण की अपेक्षा नहीं होती है। 'लिङ्ग' प्रमाण इन्द्र-प्रकाशन रूप अपनी शक्ति को समझ कर 'ऐन्द्र्यचेन्द्रमुपतिष्ठते' अर्थात् 'ऐन्द्री' पदघटित मन्त्र से इन्द्र का उपस्थान करे' इस प्रकार की श्रुति की कल्पना के द्वारा विनियोजक होता है—ऐसा कहना पड़ेगा; किन्तु इस स्थल में यह सम्भव नहीं है; क्योंकि प्रथम क्षण में उपस्थित श्रुति से द्वितीयक्षणोपस्थित लिङ्ग का बाध हो जाता है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रुतिकल्पनाद्वारा विनियोजकमिति वाच्यम् । तच्चात्र सम्भवति ।

यत्र श्रुतिविनियोगो नास्ति 'अग्नये त्वा जुष्टं निर्वपामि' इत्यादौ, तत्र मन्त्रस्य निर्वापप्रकाशनसामर्थ्यमालोच्य 'अनेन मन्त्रेण निर्वापं कुर्यात्' इति श्रुतिकल्पनाद्वारा लिङ्गं विनियोजकं भवत्येव । श्रुतिकल्पनाप्रतिबन्धकाभावात् ।

लिङ्गादिप्राबल्यविचारः

(३६) तथा 'स्योनन्ते सदनं कृणोमि' 'तस्मिन् सीद

कर्तुम् (अंगत्वेन बोधयितुं) समर्था भवति । इतिकृत्वा लिंगं, श्रुत्यपेक्षया दुर्बलं भवति, परापेक्षत्वात् । यत्र श्रुत्या प्रत्यक्षविनियोगो न भवति, तत्र 'अग्नये त्वा जुष्टं निर्वपामि' इत्यादिस्थले मंत्रस्य निर्वापात्मकार्थप्रकाशनसामर्थ्यमालोच्य 'अनेन मंत्रेण निर्वापं कुर्यात्' इत्याकारां श्रुतिं कल्पयित्वा लिंगप्रमाणं विनियोजकं भवति । यतः अत्र लिंगप्रमाणकल्पितायाः श्रुतेः किमपि बाधकं नास्ति ।

(३६) लिङ्गप्राबल्यस्योदाहरणं दीयते—'स्योनमिति' । 'स्योनं ते सदनं कृणोमि', 'तस्मिन् सीद' । इत्यत्र 'तस्मिन्' पदगतः 'तत्' शब्दः पूर्ववाक्यार्थमपेक्षते, तेनास्य वाक्यस्य पूर्ववाक्येन सह एकवाक्यताया

'अग्नये जुष्टम्०' इत्यादि स्थलों में जहाँ श्रुति के द्वारा विनियोग सम्भव नहीं है, उन मन्त्रों में निर्वाप रूप अर्थ के बोधन रूप सामर्थ्य को समझ कर 'इस मन्त्र के द्वारा निर्वाप करे' इस प्रकार श्रुति की कल्पना के द्वारा 'लिङ्ग' प्रमाण विनियोजक होता ही है; क्योंकि श्रुति की कल्पना करने में कोई प्रतिबन्धक नहीं है ।

(३६) 'स्योनं ते सदनं कृणोमि, घृतस्य धारया सुषेवं कल्पयामि तस्मिन्त्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमानः' यह सम्पूर्ण मन्त्र है । हे पुरोडाश ! ते=तव, स्योनं=समीचीनं, सदनं स्थानं, कृणोमि=

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्यत्र तस्मिन्निति तच्छब्दस्य पूर्ववाक्यार्थसापेक्षतया एकवाक्यत्वभानात् वाक्यप्रमाणेन द्वयोरेकमन्त्रत्वं भाति, लिङ्गेन भिन्नमन्त्रत्वं भाति। आद्यस्य सदनप्रकाशनसामर्थ्यात्, 'तस्मिन् सीद' इत्यस्य सादनप्रकाशकत्वात्। तत्र वाक्यापेक्षया लिङ्गस्य प्राबल्यात् वाक्यं बाधित्वा

अवगमात् वाक्यप्रमाणेन 'स्योनम्०', 'तस्मिन्०' इत्युभयोः एकमन्त्रत्वं प्रतिभाति, किन्तु लिङ्गप्रमाणेन इमौ द्वौ मंत्रौ स्तः इति ज्ञायते। यतः 'स्योनम्०' इति प्रथमं वाक्यं सदनरूपमर्थं प्रकाशयति, द्वितीयं 'तस्मिन्०' इति वाक्यं सादनरूपमर्थं प्रकाशयति। एवं स्थितौ वाक्यप्रमाणात् लिंगप्रमाणस्य प्रबलत्वात् लिंगप्रमाणेन वाक्यप्रमाणं बाध्यते। अतः लिंग-

---

करोमि। तच्च स्थानं घृतस्य धारया सुषेवं - सुष्ठु सेवितुं योग्यं कल्पयामि। भो व्रीहाणां मेध ! सारभूत ! त्वं सुमनस्यमानः = समाहितचित्तः सन्, तस्मिन् अमृते=सदने सीद=उपविश, प्रतितिष्ठ=स्थितो भव'।

इस मंत्र से यजमान पुरोडाश की प्रार्थना करता है कि हे पुरोडाश ! तुम्हारे लिये समीचीन स्थान का निर्माण करता हूँ। उस स्थान को घृत की धारा से अच्छी तरह सेवन करने के योग्य बनाता हूँ। हे व्रीहि के सारभूत पुरोडाश ! तुम समाहितचित्त होकर उस स्थान पर बैठो, और स्थिर हो जाओ। उपर्युक्त मन्त्र में 'स्योनं ते सदनं कृणोमि' तथा 'तस्मिन् सीद'---ये दो वाक्य हैं। 'तस्मिन्' शब्द का मूलप्रातिपदिक 'तद्' है। 'तद्' शब्द पूर्व का परामर्शी होता है। उसे पूर्ववाक्यार्थ की अपेक्षा होने के कारण उससे एकवाक्यता का बोध होता है। इसलिये वाक्य-प्रमाण से दोनों की एकमन्त्रता प्रतीत होती है तथा लिङ्ग-प्रमाण से भिन्न-मन्त्रता होती है। कारण यह है कि प्रथम वाक्य में 'सदन' रूप अर्थ के प्रकाशन (बोधन) का सामर्थ्य है तथा दूसरा वाक्य 'सादन' रूप अर्थ का बोधक है। उसमें वाक्यप्रमाण की अपेक्षा लिङ्ग-प्रमाण का प्राबल्य होने के कारण वाक्य-प्रमाण का बाध करके लिङ्ग-प्रमाण से प्रथमवाक्य सदन का अङ्ग है और दूसरा वाक्य सादन का अङ्ग है—यह निर्णीत अर्थ है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लिङ्गेन 'स्योनन्ते' इत्यस्य सदनाङ्गत्वम्, 'तस्मिन् सीद' इत्यस्य सादनाङ्गत्वमिति निर्णयः।

'स्योनं त' इत्यस्य 'तस्मिन् सीद' इत्यनेनैकवाक्यत्वबलात् यथाकथञ्चित् सादनसामर्थ्यरूपं लिङ्गं कल्पयित्वा 'अनेन विशिष्टमन्त्रेण सादनं कुर्याद्' इति श्रुतिः कल्पनीया। सदनप्रकाशनरूपप्रत्यक्षलिङ्गेन कल्पितया 'स्योनं त इत्यनेन सदनं कुर्याद्' इति श्रुत्या 'स्योनन्ते' इत्यस्य शीघ्रं सदने विनियोगे सति तेनैव मन्त्रस्य नैराकाङ्क्ष्यात् वाक्यप्रमाणात्

प्रमाणेन 'स्योनं ते०' इत्ययं मंत्रः 'सदनक्रियायाम् अंगं भवति, 'तस्मिन् सीद' इत्ययं मंत्रश्च सादनक्रियायाम् अंगं भवति, इति निर्णीयते। 'स्योनं ते०'--'तस्मिन्०' इत्युभयोर्मन्त्रयोरेकवाक्यतया कथञ्चित् सादनात्मकार्थप्रकाशनसामर्थ्यरूपं लिङ्गं कल्पयित्वा पश्चात् 'अनेन विशिष्टेन मन्त्रेण (सम्मिलितेन मंत्रद्वयेन) सादनं कुर्यात्' इत्याकारा श्रुतिः कल्पनीया भवति। किन्तु 'स्योनं ते०' इति मंत्रगतेन सदनार्थप्रकाशनरूपेण प्रत्यक्षलिङ्गेन कल्पितया 'स्योनं ते०' इति मन्त्रेण सदनं कुर्यात् इति श्रुत्या 'स्योनं ते०' इत्यस्य मंत्रस्य सदनकरणे शीघ्रं विनियोगो भवति। तेन मंत्रः शान्ताकांक्षो भवति। अतः वाक्यप्रमाणद्वारा लिंगप्रमाणं कल्पयित्वा यत् श्रुतिकल्पनं, तत् निरुद्धं भवति। यतः प्रथमं वाक्येन लिंगकल्पनं ततो लिंगेन श्रुतिकल्पने विलम्बो भवति। अतः प्रत्यक्षलिंगप्रमाणेन

उपर्युक्त दोनों वाक्यों की एकवाक्यता होने के कारण सादनसामर्थ्य रूप लिङ्ग--प्रमाण की कल्पना करके 'इस विशिष्ट मन्त्र के द्वारा सादन करे' इस प्रकार श्रुति की कल्पना करनी चाहिए। सदन-प्रकाशन रूप प्रत्यक्ष लिङ्ग-प्रमाण के द्वारा कल्पित 'स्योनं ते' इससे सदन करे' इस श्रुति से 'स्योनं ते०' इस मन्त्र का शीघ्र हो सदन अर्थ में विनियोग हो जायेगा, विनियोग हो जाने पर उसी से मन्त्र निराकांक्ष हो जायेगा। इसलिए

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लिङ्गं कल्पयित्वा श्रुतिकल्पना प्रतिबध्यते विलम्बितत्वादिति लिङ्गेन वाक्यस्य बाधः।

अङ्गताबोधकप्रमाणोपसंहारः

(३७) एवं वाक्येन प्रकरणस्य, प्रकरणात् क्रमस्य, क्रमात्समाख्याया बाधो वेदितव्यः। तथा श्रुत्या वाक्यादेरपि बाधः। तदेवमङ्गताबोधकप्रमाणानि श्रुत्यादीनि निरूपितानि।

श्रुतिकल्पनायाः शीघ्रतरत्वात् वाक्येन श्रुतिकल्पनमवरुद्धं भवति। तेन लिंगेन वाक्यप्रमाणं बाध्यते।

(३७) अनयैव रीत्या वाक्यप्रमाणेन प्रकरणप्रमाणस्य, प्रकरणप्रमाणन क्रमप्रमाणस्य, क्रमप्रमाणेन समाख्याप्रमाणस्य बाधो वेदितव्यः। तथैव श्रुतिप्रमाणेन लिंगप्रमाणबाध इव वाक्यादिप्रमाणानामपि बाधो भवति।

वाक्येन प्रकरणस्य बाधः

सूक्तवाके 'इन्द्राग्नी इदं हविरजुषेतां महोज्यायोऽक्राताम्' इति मन्त्र आम्नातः। तत्र वाक्यप्रमाणेन 'इन्द्राग्नी०' मंत्रः, दर्शकर्मणः अंगमिति सिध्यति, 'इन्द्राग्नी० ति पदसामर्थ्येन दर्शसमवेतोऽयमिति लिंगादवगम्यते, तेन सह 'इदं हविः' इत्यादेः समभिव्याहारो दृश्यते, प्रकरणं च दर्शपूर्णमासयोः। प्रकरणप्रमाणात् दर्श-पूर्णमासोभयार्थत्वं ज्ञायतेऽस्य मंत्रस्य, किन्तु समभिव्याहारात्मकवाक्यात् दर्शाङ्गत्वमस्य मंत्रस्य, इन्द्राग्नी पदेन एकवाक्यत्वात्। अतः प्रकरणप्रमाणेन अयं मंत्रः पूर्णमासकर्मणः अंगं न भवति। यतः वाक्येन प्रकरणं बाध्यते।

वाक्य-प्रमाण से लिङ्ग की कल्पना करके पुनः श्रुतिकल्पना का अवरोध हो जाता है; क्योंकि विलम्बोपस्थित होने के कारण वाक्य-प्रमाण का लिङ्ग-प्रमाण से बाध हो जायेगा।

(३७) इसी प्रकार 'वाक्य' से 'प्रकरण,' 'प्रकरण से 'क्रम', अर्थात् 'स्थान-प्रमाण', और 'क्रम से 'समाख्या' का बाध समझना चाहिए।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अङ्गलक्षणप्रदर्शनम्

(३८) तच्चाङ्गत्वं शेषत्वं—पारार्थ्यमिति यावत् ।

प्रकरणेन क्रमस्य बाधः

यथा—राजसूय-यज्ञप्रकरणे अभिषेचनीयाख्यः कश्चन सोमयागः। तत्सन्निधौ विहिताः 'अक्षैर्दीव्यति' इत्यादयः पाठिता धर्माः। एतेषां धर्माणां किं प्रकरणात् राजसूयांगत्वं अथवा क्रमाख्य (स्थानाख्य) प्रमाणात् अभिषेचनीयांगत्वमिति सन्देहे प्रकरणप्रमाणस्य प्रबलत्वात् अभिषेचनीयसन्निधौ पठिता अपि धर्माः राजसूययागस्यैव अंगभूता भवन्ति, दुर्बलेन क्रमापरपर्यायस्थानप्रमाणेन अभिषेचनीयाख्यस्य सोमयागस्य सन्निधौ पठिता अपि विदेवनादयो धर्मा अभिषेचनीयस्य अंगभूता न भवन्ति।

स्थान (क्रम) प्रमाणेन समाख्याप्रमाणस्य बाधः

स्थान (क्रम) प्रमाणं, समाख्याप्रमाणात् प्रबलं भवति। अत एव 'शुन्धध्वं दैवाय कर्मणे' इति शुन्धन—मंत्रः सान्नाय्यपात्राणां सन्निधौ पठितत्वात् सान्नाय्यपात्राणामेव अंगं भवति। न खलु 'पौरोडाशिक' मिति समाख्यया पुरोडाश-सम्बन्धि पात्राणामंगं भवति। इत्थं पूर्व-पूर्व—प्रमाणैः उत्तरोत्तरप्रमाणानां बाधो निरूपितः। एवं अंगत्वबोधकानि श्रुत्यादीनि षट् प्रमाणानि अभिहितानि।

(३८) अंगत्वं नाम शेषत्वं पारार्थ्यमित्यर्थः, परस्मै इदं परार्थं, तस्य भावः पारार्थ्यम्। प्रधानकर्म उद्दिश्य प्रवृत्तस्य पुरुषस्य हस्तेन अनुष्ठितः पदार्थः परार्थ इत्युच्यते। परार्थस्य पदार्थस्य धर्मः पारार्थ्यशब्देन

'स्थान' को 'क्रम' भी कहते हैं। इसी तरह 'श्रुति' से 'वाक्य' आदि प्रमाणों का भी बाध हो जाता है। इस प्रकार श्रुति आदि अङ्गत्व-बोधक प्रमाणों का निरूण किया गया है।

(३८) पहले अङ्त्व-बोधक प्रमाणों का निरूपण किया गया था। अङ्गत्व-बोधक प्रमाणों के ज्ञान में घटकीभूत अङ्त्व-ज्ञान है। अतः अब अङ्गत्व-ज्ञान के लिये अङ्ग का लक्षण प्रस्तुत करते हैं; क्योंकि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परोद्देशेन प्रवृत्तकृतिव्याप्यत्वं पारार्थ्यम्। प्रयाजादीनां दर्शपूर्णमासोद्देशेन प्रवृत्तपुरुषकृतिव्याप्यत्वात् लक्षणसङ्गतिः। दर्शादेः प्रयाजाद्युद्देशेन प्रवृत्तकृतिविषयत्वाभावान्नातिव्याप्तिः। केवलप्रयाजादीनुद्दिश्य कस्यचिदपि पुरुषस्याप्रवृत्तेः।

व्यवह्रियते। कृतिव्याप्यत्वं नाम कृतिसिद्धत्वमित्यर्थः। यथा—दर्शपूर्णमासाख्यस्य प्रधानकर्मण उद्देश्येन प्रवृत्तस्य पुरुषस्य कृत्या (अनुष्ठान क्रियया) प्रयाजाद्याः क्रियाः सिद्धा भवन्तीति लक्षणसमन्वयात् प्रयाजादीनां दर्शपूर्णमासांगत्वं सिध्यति। प्रयाजादिकर्मणामुद्देश्येन प्रवृत्तस्य पुरुषस्य कृत्या (अनुष्ठानक्रियया) दर्शादिप्रधानकर्माणि सिद्धानि (अनुष्ठितानि) न भवन्तीति दर्शादिप्रधानकर्मणि अंगत्वलक्षणस्य नातिव्याप्तिः। केवलं प्रयाजादीनुद्दिश्य न कोऽपि पुरुषः प्रवर्तते, अतः प्रयाजादीनाम्परार्थत्वमेव। तस्मात् प्रयाजादीनां दर्शपूर्णमासांगत्वमेव।

इतर पदार्थों से व्यावृत्ति तथा व्यवहार-सम्पादन करना ही लक्षण का प्रयोजन माना जाता है। अङ्गत्व और शेषत्व दोनों एक ही अर्थ के वाचक हैं। 'पारार्थ्यम्'—'अङ्गत्वम्', यह फलितार्थ-कथन है। उसका लक्षण प्रस्तुत करते हैं कि पर=दूसरा अर्थात् प्रधान के उद्देश्य से प्रवृत्त पुरुष की कृति (प्रयत्न) से व्याप्य (साध्य) ही पारार्थ्य है। यही अङ्ग का लक्षण है, उससे पर (भिन्न) प्रधान ही होगा; क्योंकि सम्बन्धी शब्द का ही आक्षेप किया जाता है। प्रयाज आदि अङ्ग हैं और दर्शपूर्णमास आदि अङ्गी हैं। दर्शपूर्णमास को उद्देश्य करके प्रवृत्त-पुरुष के प्रयत्न से साध्य 'प्रयाज' होते हैं। अतः उन प्रयाजों में अङ्ग-लक्षण की सङ्गति हो जाती है। प्रयाज आदि का उद्देश्य करके प्रवृत्त-पुरुष के व्यापार से साध्य 'दर्शादि' नहीं होते। इसलिये लक्षण की अति व्याप्ति नहीं होती; क्योंकि कोई भी पुरुष केवल 'प्रयाज' को उद्देश्य करके प्रवृत्त नहीं होता है। अतः उपर्युक्त लक्षण में कोई दोष नहीं है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अङ्गद्वैविध्यम्

(३९) तान्यङ्गानि द्विविधानि—सन्निपत्योपकारकाणि, आरादुपकारकाणि चेति ।

सन्निपत्योपकारकाङ्गनिरूपणम्

यान्यङ्गानि साक्षात्परम्परया वा प्रधानयागशरीरं निष्पाद्य तद्द्वारा तदुत्पत्त्यपूर्वोपयोगीनि तानि सन्निपत्योपकारकाणि । यथा—व्रीह्यादिद्रव्याणि, तत्संयुक्तावहननप्रोक्षणादीनि, अग्न्यादिदेवतातत्संयुक्तयाज्यानुवाक्यावचनादीनि च । अत्र प्रोक्षणादेर्व्रीहिगतातिशयद्वारा, अवहनना-

---

अङ्गद्वैविध्यम्

(३९) उपर्युक्तमङ्गं द्विविधं (१) सन्निपत्योपकारकम्, (२) आरादुपकारकं चेति । सन्निपत्य यदुपकारकं तत् सन्निपत्योपकारकम् । यदङ्गं साक्षात् (प्रत्यक्ष) सम्बंधेन परम्परासम्बंधेन वा प्रधानकर्मणः (प्रधानयागस्य) स्वरूपं निष्पाद्य तदुत्पत्त्यपूर्वस्य जनकं भवति, तत् सन्निपत्योपकारकमङ्गमित्युच्यते । यथा—व्रीहयः अन्यान्यपि हविर्द्रव्याणि, तत्र क्रियमाणानि अवहननप्रोक्षणादीनि संस्काराणि, अग्न्यादिदेवताः, तत्सम्बंधिनो याज्यानुवाक्यादयो मंत्राः । अत्र प्रोक्षणादयः संस्काराः व्रीह्यादिद्रव्येषु अदृष्टमतिशयमुत्पादयन्ति । तथा अवहननादयः संस्काराः व्रीह्यावरकतुषविमोक-

---

(३९) अङ्ग दो प्रकार के हैं—सन्निपत्योपकारक और आरादुपकारक । जो साक्षात् या परम्परा सम्बन्ध से प्रधान याग के स्वरूप का सम्पादन करके उसी प्रधान-याग के स्वरूप-निष्पादन के द्वारा प्रधान-याग-जन्य उत्पत्त्यपूर्व के सम्पादन के उपयोगी होते हैं, वे सन्निपत्योपकारक अङ्ग कहलाते हैं । यहाँ द्रव्य, क्रिया, देवता तथा मन्त्र के चार भेद उदाहरण द्वारा प्रस्तुत किये जाते हैं । व्रीहि आदि द्रव्य; व्रीहि आदि द्रव्यों से संयुक्त अवहनन, प्रोक्षण आदि क्रिया, अग्नि आदि देवता तथा उन देवताओं से संयुक्त याज्या एवं अनुवाक्या आदि मन्त्र ये सभी सन्निपत्योप-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

देस्तुषविमोकादिरूपदृष्टद्वारा, व्रीह्यादीनां पिष्टद्वारा पुरोडाशनिष्पादकत्वं, तद्द्वारा यागशरीरतदुत्पत्त्यपूर्वोपयोगित्वञ्च। याज्यानुवाक्यादेर्देवतासंस्कारद्वारा देवतायाश्च साक्षाद्यागशरीरनिर्वर्तकत्वं, तद्द्वारा यागशरीरतदुत्पत्त्यपूर्वोपयोगित्वञ्च। याज्यानुवाक्यादेर्देवतासंस्कारद्वारा देवतायाश्च साक्षाद्यागशरीरनिर्वर्तकत्वं तद्द्वारा तदुत्पत्त्यपूर्वोपयोगित्वञ्च। यागस्य देवतोद्देशेन द्रव्यत्यागरूपत्वात्। 'द्रव्यदेवते

रूपं दृष्टमुत्पादयंति। व्रीह्यादीनि हविर्द्रव्याणि पिष्टद्वारा पुरोडाशं निष्पादयन्ति। पुरोडाशेन च यागस्य स्वरूपं (शरीरं) सिद्धं भवति। इत्थं निष्पन्नात् यागशरीरात् उत्पत्त्यपूर्वं उत्पद्यते। एवंच सन्निपत्त्योपकारकाणामंगानां यागोत्पत्त्यपूर्वजनकत्वं भवति। अनया रीत्या क्वचित् साक्षात् (प्रत्यक्षतया) क्वचिच्च परम्परया इमानि सन्निपत्त्योपकारकाणि अंगानि प्रधानकर्मणः सकाशात् उत्पत्त्यपूर्वनिर्माणे उपयोगीनि भवन्ति। यज्ञीयदेवतासु तत्स्मरणरूपसंस्कारकरणे याज्यानुवाक्यादिमंत्राणां उपयोगो भवति। देवतायाः यागस्वरूपनिर्माणे उपयोगो भवति। इत्थं निर्मितात् यागस्वरूपात् तदुत्पत्त्यपूर्वनिष्पादने देवतोपयोगो भवति। यतः देवतामुद्दिश्य क्रियमाणो द्रव्यत्याग एव 'याग' शब्देनोच्यते। द्रव्यं देवता चैव यागस्य स्वरूपमिति सिद्धान्तः। इमानि सन्निपत्त्योपकारकाणि अंगानि एव

कारक अङ्ग कहलाते हैं। इनमें प्रोक्षण आदि की व्रीहिगत-अतिशय-सम्पादन द्वारा, अवघात आदि की वैतुष्य आदि दृष्ट फल के द्वारा, व्रीहि आदि की पिष्ट-पुरोडाश-निष्पादकता द्वारा एवं उसी के द्वारा याग-स्वरूप तथा उससे उत्पन्न अपूर्व के द्वारा उपयोगिता होती है। याज्या तथा अनुवाक्या आदि का, देवता के संस्कार-द्वारा और देवता का साक्षात् याग-स्वरूप-निष्पादकता और उस के द्वारा तज्जन्य उत्पत्त्यपूर्व में उपयोगी होता है; क्योंकि देवता को उद्देश्य करके द्रव्य का त्याग

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हि यागस्वरूपम्' इति सिद्धान्ताच्च । एतान्येव सामवायिकानीत्युच्यन्ते ।

आराद्उपकारकाङ्गनिरूपणम्

(४०) आत्मसमवेतापूर्वजनकान्याराद्उपकारकाणि । यथा—प्रयाजाज्यभागानुयाजादीनि । एतानि द्रव्यगतं देवतागतं वा संस्कारं न जनयन्ति, किन्त्वात्मगतमदृष्टं जनयन्तीत्याराद्उपकारकाणि ।

'सामवायिक' शब्देन उच्यन्ते । द्रव्यादिषु सन्निपत्य सम्बध्य यानि अंगानि उपकुर्वन्ति तानि सन्निपत्योपकारकाणि ।

(४०) यानि अंगानि जीवात्मनि अपूर्वमुत्पाद्य स्थापयन्ति तानि आराद्उपकारकाणि अंगानीत्युच्यन्ते । यथा—प्रयाजाः, आज्यभागौ, अनूयाजाः इत्यादीनि अंगानि । इमानि प्रयाजाद्यङ्गानि द्रव्येषु देवतासु वा संस्कारं नोत्पादयन्ति । अपितु यागानुष्ठातुरात्मनि अदृष्टमुत्पादयन्ति । अतः इमानि अंगानि आराद्उपकारकाणीत्युच्यन्ते । सर्वाङ्गसहितयागानुष्ठानानन्तरं स्वर्गादिफलजनकं यजमानात्मनि जायमानमपूर्वम्, तदुत्पत्तौ उपयोगः आराद्उपकारकाणामङ्गानाम् । अत एव 'आरात्' शब्दस्यात्र दूरमित्यर्थः । अर्थात् आराद्उपकारकाणामंगानां परमापूर्वोत्पत्तौ एवोपयोगः सन्निपत्योपकारकाणामंगानान्तु प्रोक्षणाऽवहनन-स्मरणादिसंस्कारद्वारा यागस्वरूपनिष्पत्तावप्युपयोग इति उभयोर्विवेकः ।

ही 'याग' कहलाता है । मीमांसकों का यही सिद्धान्त है कि द्रव्य और देवता ही याग का स्वरूप है । इन्हीं को 'सामवायिक' भी कहते हैं ।

(४०) आत्मा में रहने वाले अपूर्व को 'आराद्उपकारक' कहते हैं जैसे—प्रयाज, आज्यभाग तथा अनुयाज आदि । ये सब द्रव्य अथवा देवता में संस्कार उत्पन्न नहीं करते हैं, अपि तु आत्मा में अदृष्ट को उत्पन्न करते हैं । ये आराद्उपकारक अङ्ग कहलाते हैं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कर्मभेदविचारः

(४१) तत्र सामान्यतः कर्म द्विविधम्—अर्थकर्म, गुणकर्म चेति ।

(४२) तत्रात्मगतापूर्वजनकं कर्म अर्थकर्म । यथा—अग्निहोत्रदर्शपूर्णमासप्रयाजादिकम् ।

---

(४१) कर्तव्यताबोधकब्राह्मणवाक्यानां भेदमुक्त्वा सम्प्रति तत्प्रतिपाद्यानां कर्मणां भेदमाह—'तत्रे'ति । 'कर्म' शब्देन ब्राह्मणवाक्यबोध्यं कर्म विज्ञेयम् । 'सामान्यतइति' । सामान्यतः कर्मत्वजातिरूपेणेत्यर्थः ।

सामान्यतया अंग-प्रधानरूपस्य कर्मणः प्रकारद्वयम्—(१) अर्थकर्म, (२) गुणकर्म चेति । वैदिक-लौकिकभेदेन कर्म द्विविधं भवति । तत्र वैदिककर्मणः क्रत्वर्थं—पुरुषार्थाविति द्वौ भेदौ । फलेच्छया अनुष्ठीयमानं कर्म—पुरुषार्थकर्मेत्युच्यते, तद्भिन्नं क्रत्वर्थकर्मेत्युच्यते । तत्र क्रत्वर्थकर्मण आरादुपकारक-सन्निपत्योपकारकभेदेन द्वौ भेदौ । इमे कर्मणी अंगभूते इति पूर्वमुक्तमेव ।

(४२) अधुना पुनः सन्निपत्योपकारकं विशेषतया निरूपयितुं वैदिककर्मणो विभागं दर्शयति तत्रेति । आत्मनि अपूर्वजनकं कर्म—अर्थकर्म । यथा अग्निहोत्रहोमः, दर्शपूर्णमासाख्यं कर्म, प्रयाजादयश्च ।

---

(४१) पहले कर्त्तव्यता-बोधक ब्राह्मण-वाक्यों के भेदों का निरूपण किया गया है । अब उन वाक्यों के प्रतिपाद्य कर्मों का भेद बताते हैं । ब्राह्मण-वाक्य के बोध्य कर्म दो प्रकार के हैं—अर्थकर्म और गुणकर्म । उनमें भी आत्मा में रहने वाले अपूर्व के जनक कर्म को 'अर्थमंक' कहते हैं ।

(४२) इन सब से उत्पन्न हुआ अपूर्व यजमान की आत्मा में तब तक विद्यमान रहता है, जब तक यजमान को वाञ्छित स्वर्गादि फल नहीं मिल जाता है । इसलिये इनको अर्थकर्म कहते हैं । जैसे—अग्निहोत्र, दर्शपूर्णमास तथा प्रयाज आदि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(४३) गुणकर्म्म संस्कारजनकम् । तच्च द्विविधम्--उपयुक्तसंस्कारकम्, उपयोक्ष्यमाणसंस्कारकञ्चेति ।

(४४) तत्र उपयुक्तसंस्कारकं प्रतिपत्तिकर्म । उपयुक्तस्य आकीर्णकरस्य द्रव्यस्य विहितदेशे प्रक्षेपः प्रतिपत्तिरिति

---

(४३) संस्कारोत्पादकं कर्म, गुणकर्म। उपयुक्तसंस्कारकं उपयोक्ष्यमाणसंस्कारकं चेति द्वौ भेदौ तस्य ।

(४४) तत्रेति । यागे यस्य द्रव्यस्य उपयोगो जातः, तस्योपयुक्तस्य द्रव्यस्य संस्कारकं कर्म, 'प्रतिपत्तिकर्म' इत्युच्यते, कृतप्रयोजनस्य द्रव्यस्य यागदेशे आकीर्णकरत्वात् विहितदेशे तस्य प्रक्षेपणमिति प्रतिपत्तिलक्षणात्। तथा च **शास्त्रदीपिका**--'कृतार्थमपि तु द्रव्यमाकीर्णकरमुच्यते' । द्रव्यस्य आकीर्णकरत्वं नाम तस्य प्रयोगनिवर्तनोत्तरं किञ्चिदकुर्वतोऽन्तरावस्थितस्य कार्यकर्तॄणां सञ्चारादौ अन्तरायकर्तृत्वमेव। यथा--दर्शपूर्णमासकर्मणि इडाभक्षणम्, ज्योतिष्टोमयागे कृष्णविषाणाप्रासनम्, दर्शपूर्णमासयागकर्मण्येव चतुरवत्तहोमादिकम् । हुतशेषं हविर्द्रव्यं भक्षणार्थं यस्मिन् पात्रविशेषे स्थाप्यते तत् 'इडा' शब्देनोच्यते । किन्त्वत्र 'इडा' शब्देन पात्रगतं पुरोडाशखण्डरूपं द्रव्यं विवक्षितमस्ति । 'कृष्णविषाणया कण्डूयते' इति वाक्येन यजमानस्य कण्डूयनाङ्गत्वेन विहितस्य कृष्णमृगशृङ्गस्य नीतासु

---

(४३) संस्कार के उत्पादक कर्म को 'गुणकर्म' कहते हैं । वह उपयुक्तसंस्कारक और उपयोक्ष्यमाणसंस्कारक के भेद से दो प्रकार का है ।

(४४) उनमें प्रतिपत्ति कर्म को उपयुक्तसंस्कारक कहते हैं; क्योंकि जिन द्रव्यों का उपयोग हो चुका है; परन्तु वेदी में आकीर्णकर (फैले हुए) हैं, उनका विहित प्रदेश में प्रक्षेप करना ही प्रतिपत्ति कर्म कहलाता है, मीमांसकों ने यही इसका लक्षण माना है। जैसे--इडाभक्षण, कृष्णविषाणप्रासन (प्रक्षेपण) चतुरवत्त होम आदि। 'इडा' पात्र में रखे हुए पुरोडाश को भी 'इडा' कहते हैं। प्रयोग सम्पन्न हो जाने के बाद अनुपयोगी द्रव्यों की मध्य में स्थिति रहने पर ऋत्विजों के सञ्चरण में विघ्न होता है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लक्षणात् । यथा—इडाभक्षणकृष्णविषाणप्रासन-चतुरवत्त-होमादिकम् ।

प्रतिपत्तिकर्मस्वरूपम्

(४५) नन्विडाभक्षणस्य प्रधानयागोपयुक्ताकीर्णकर-पुरोडाशद्रव्यप्रक्षेपात्मकत्वात् प्रतिपत्तित्वं युक्तम् । होमस्य तु यागोपयुक्तद्रव्यसंस्कारत्वाभावात् कथम्प्रतिपत्तित्वम् ? होमस्य

'दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यति' इति वाक्यविहितं प्रासनं (प्रक्षेपः) 'कृष्णविषाणाप्रासन' शब्देनोच्यते ।

(४५) अत्र शङ्कते 'नन्विति' । आग्नेयादिप्रधानयागेषु उपयुक्तत्वात् आकीर्णकरस्य पुरोडाशद्रव्यस्य प्रक्षेपरूपमिडाभक्षणम्प्रतिपत्तिकर्मेति कथनमुचितमेव । यागोपयुक्तस्य द्रव्यस्य संस्करणं प्रतिपत्तिरिति प्रतिपत्तेर्लक्षणम् । तच्च लक्षणं चतुरवत्तहोमे, न संघटते, यतः चतुरवत्तहोमः यागोपयुक्तस्य द्रव्यस्य न संस्कारकः । अतः चतुरवत्तहोमस्य प्रतिपत्तिकर्मत्वं कथम् ? यतः चतुरवत्तहोमस्य यागस्य च कालः समान एव । अयमभिप्रायः—यागे द्रव्यस्योपयोगे कृते सति क्रियमाणः प्रक्षेपात्मकः संस्कारः चतुरवत्ते न कर्तुं शक्यः । यतो हि चतुरवत्तस्य होमो नाम चतुर्भिरवदानैः संस्कृतस्य पुरोडाशस्य अग्नौ प्रक्षेपः । स च प्रक्षेपः यागकाले अर्थात् यागसमानकाले एव कर्तव्योऽस्ति । एवं च यागसमानकाले एव चतुरवत्तस्य पुरोडाशात्मकस्य द्रव्यस्य होमानुष्ठानं भवति, तेन चतुरवत्तादि द्रव्यं

अतः उन द्रव्यों को 'आकिर्णकर' कहते हैं । यजमान के शिर-खर्जन में उपयुक्त हुए कृष्णमृग के सींग को चात्वाल नामक गर्त्त में डालना ही 'कृष्णविषाणप्रासन कहलाता है ।

(४५) शङ्का—प्रधान याग में इडा-भक्षण के द्वारा उपयुक्त हुए आकीर्णकर पुरोडाश-द्रव्य के प्रक्षेप को प्रतिपत्ति कहना समुचित है; परन्तु याग में उपयुक्त द्रव्य का संस्कारक न होने के कारण वह होम,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यागसमानकालीनत्वेन होमसंस्कार्य्यस्य चतुरवत्तादेरुपयुक्त-त्वाभावादिति चेत् ।

(४६) अत्राहुः—उपयुक्तसंस्कारमात्रं प्रतिपत्तिः, न तु प्रधानयागोपयुक्तत्वम् । तथा सति पशोर्विशसनानन्त

उपयुक्तमिति न वक्तुं शक्यते, यतः तेन होमेन चतुरवत्तादि द्रव्यं अद्याि संस्कार्यं अस्ति । अर्थात् उपयुज्यमानमस्ति ।

(४६) **समाधानम्**—कृतायाः शंकायाः समाधानं क्रियते '**अत्राहु**' रिति यागक्रियायां कुत्रापि उपयुक्तस्य द्रव्यस्य यः संस्कारः, स एव 'प्रतिपत्ति' शब्देनोच्यते । प्रतिपत्तिशब्दव्यवहारार्थं प्रधानयागे एव तदुपयोगो नाव श्यकः । प्रधानयागे उपयुक्तस्यैवेत्याग्रहे अनिष्टप्रसंगः स्यादित्याह '**तथास** ती'ति । ज्योतिष्टोमांगभूते पशुयागे पशोर्विदारणानन्तरं वपा-हृदय जिह्वाद्यङ्गेषु उद्ध्रियमाणेषु तद्विष्ठायाः रुधिरस्य चपि निरसनं कर्तव्यमस्ति तदा प्रधानयागोपयुक्तस्यैव प्रतिपत्तित्वे उक्तं 'निरसनं' प्रतिपत्तिशब्देन वक्तुं शक्येत । यतः विष्ठायाः रुधिरस्य च नोपयोगः प्रधानपशुयागे । तेन प्रधानोपयुक्तस्य संस्काररूपायाः प्रतिपत्तेर्लक्षणं 'निरसने' न घटते । अय मभिप्रायः—आदौ पशोर्विशसनं (विदारणं) भवति, ततः तदीय-वपा-हृदय जिह्वादीनां उद्धरणं भवति, ततः तेषामंगानां भर्जनं भवति, ततः तैर्याग कर्तव्यो भवति । वपा हृदयाद्यंगानामुद्धरणसमये कस्यापि द्रव्यस्य यागो पयुक्तत्वं नास्ति । तेन प्रधानयागोपयुक्तस्य द्रव्यस्य प्रक्षेपः प्रतिपत्तिरि लक्षणं लोहित-शकृदादिनिरसने; न घटते । प्रधानपशुयागे उपयुज्यमान

प्रतिपत्ति कैसे हो सकता है? क्योंकि होमसंस्कार यागसमानकाली अर्थात् याग के अनुष्ठान के समय ही अनुष्ठेय होने के कारण संस्का चतुरवत्तादि होम में उपयुक्त ही नहीं है ।

(४६) **समाधान**–उपयुक्त द्रव्य का संस्कारमात्र ही प्रतिपत्ति है, प्रधा याग में उपयुक्तत्व ही प्रतिपत्तित्व नहीं है । अन्यथा पशु के विश (हिंसा) के पश्चात् वपा तथा हृदयादि के निःसारण के समय अनुष्ठेय र

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वपाहृदयाद्युद्धरणकालकर्त्तव्यस्य लोहितशकृन्निरसनस्य प्रतिपत्तित्वाभावप्रसङ्गात्, यागोपयुक्तद्रव्यप्रक्षेपरूपत्वाभावात् ।

(४७) तथा कृष्णविषाणाप्रासनस्यापि प्रतिपत्तित्वं न स्यात्, 'यागाङ्गभूतकण्डूयनोपयुक्तत्वेऽपि यागोपयुक्तत्वाभावात् । अतो यत्र क्वचनोपयोगमात्रं विवक्षितम् । यत्र

वपा-हृदयादिद्रव्याणामंशभूतं यल्लोहित-शकृदादि, तन्निरसनं यागानन्तरं कर्तव्यं नास्ति । अतः प्रतिपत्तेर्लक्षणं तव तत्र न घटते इत्यभिप्रायः ।

(४७) किञ्च—'तथे'ति । ज्योतिष्टोमे कृष्णमृगस्य शरीरावयवभूतं यत् शृंगं, तस्य 'चात्वाल' संज्ञके गर्ते त्यागः कर्तव्यः । किन्त्विदानीं अस्य त्यागस्यापि प्रतिपत्तित्वं न भवेद् । यतः ज्योतिष्टोमयागांगभूते कण्डूयने तद्विषाणं (शृंगं) उपयुक्तमपि प्रधानकर्मभूते ज्योतिष्टोमे तच्छृंगं द्रव्यरूपेण नोपयुक्तम् । तेन प्रधानयागे एवोपयुक्तमिति न विवक्ष्यते । अयमभिप्रायः—ज्योतिष्टोमे "कृष्णविषाणया कण्डूयति नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यति" इति श्रूयते । अस्यार्थ-यजमानेन दत्तां दक्षिणामादाय गतेषु ऋत्विक्षु स्वहस्तधृतं शिरः—कण्डूयनोपयुक्तं कृष्णमृगशृङ्गं द्रव्यं चात्वालनामके गर्ते प्रक्षेप्तव्यम् । एवं स्थिते यागाङ्गभूते कण्डूयने उपयुक्तत्वेऽपि साक्षात् प्रधानयागे उपयुक्तत्वाभावात् कृष्णविषाणप्रासनस्यापि प्रतिपत्तित्वं न स्यात् । अतो न साक्षात् यागोपयुक्तत्वं विवक्षितम् ।

और शकृत् के निरसन (त्याग) रूप कार्य में प्रतिपत्तित्व की प्रसक्ति नहीं हो सकती; क्योंकि वह याग में उपयुक्त द्रव्य प्रक्षेपरूप नहीं है ।

(४७) इसी प्रकार कृष्णविषाण के प्रक्षेपण का भी प्रतिपत्तित्व समुचित नहीं होगा; क्योंकि याग के अङ्गभूत कण्डूयन (खर्जन) में वह उपयुक्त होने पर भी याग में उपयुक्त नहीं हुआ है । इसलिये उपयोग शब्द का 'जहाँ कहीं भी उपयोगमात्र' अर्थ विवक्षित है । जहाँ कहीं उपयोग तो इसमें भी है; क्योंकि वपा तथा हृदयादि के निःसारण रूप क्रिया के द्वारा उपयुक्त-पशुसम्बन्धी आकीर्णकर शकृत् एवं लोहित को प्रतिपत्ति की

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्वचिदुपयोगस्तत्राप्यस्ति, । वपाहृदयाद्युद्धरणेनोपयुक्तस्य पशोःसम्बन्धिनः शकृल्लोहितस्य आकीर्णकरस्य प्रतिपत्त्य-पेक्षत्वात् । एवं यथाकथञ्चिदुपयोगो होमस्थलेऽप्यस्ति ।

प्रतिपत्तिभेदाः

(४८) तथाहि, प्रतिपत्तिस्त्रिधा—प्रधानोत्तरकाला प्रधानसमकाला, प्रधानपूर्वकाला चेति । तत्र आद्या--इडा भक्षणादिका । द्वितीया--होमादिका । तथाहि--दर्शपूर्णमास

अतः यागे क्वापि उपयुक्तस्येत्येव विवक्षणीयम् । इति विवक्षमाणे ताद् उपयोगो लोहित-शकृदादीनां निरसनस्यापि अस्ति । वपा-हृदयादीनामुद्ध णेन उपयुक्तस्य पशोः सम्बन्धि खलु लोहित-शकृदादिकम् । तच्चाकी करमपि वर्तते, तस्य प्रतिपत्तेरावश्यकता अस्त्येव । एवमेव चतुरवत्तहोम स्यापि यथाकथंचिदुपयोगः अस्त्येव । अर्थात् प्रतिपत्तिलक्षणे 'प्रधानयागो पयुक्तस्य' इति अविवक्षणेन चतुरवत्तहोमेऽपि प्रतिपत्तिलक्षणं घटते ।

(४८) तथाहीति । प्रतिपत्तिकर्म त्रिविधं भवति । तत्र प्रथमःप्रकारः (प्रधानयागसमाप्त्यनन्तरं क्रियमाणा, (२) प्रधानयागसमकालीना क्रियमाण (३) प्रधानयागात् पुर्वं क्रियमाणाचेति । तत्र प्रथमायाः प्रतिपत्तेरुदाह रणम्—इडाभक्षणम्, चतुर्धाकरणम्, शंयुवाककालभक्षः इत्यादि । द्विती यायाः प्रतिपत्तेरुदाहरणम्—चतुरवत्तहोम इत्यादि । सकृदुपस्तरणं, द्वि वदानम्, सकृदभिधारणम् इति समुदितमेतच्चतुष्टयं चतुरवत्तमुच्यते

अपेक्षा है । इसी प्रकार यथाकथञ्चित् उपयोग होम-स्थल में भी है अतः किसी प्रकार के दोष की सम्भावना नहीं है ।

(४८) प्रतिपत्ति कर्म के स्वरूप का निरुपण करने के बाद उस भेदों का प्रदर्शन करते हैं । प्रतिपत्ति कर्म के तीन भेद हैं—प्रधानोत्त काला, प्रधानसमकाला तथा प्रधानपूर्वकाला । उनमें पहले का उदाह

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकरणे श्रूयते--'सकृदुपस्तृणाति' 'द्विर्हविषोऽवद्यति' 'सकृदभिघारयति' 'चतुरवत्तञ्जुहोति'। तत्र चतुरवत्तवाक्ये होमानुवादेन चतुरवत्तद्रव्यं तत्साधनत्वेन न विधीयते, होमस्या-

---

'चतुरवत्त' शब्दार्थं स्पष्टयितुं कतिपयानि वाक्यानि प्रदर्शयति ग्रन्थकारः 'तथाही' ति। दर्शपूर्णमासप्रकरणे तानि वाक्यानि एवं विधानि—(१) 'सकृदुपस्तृणाति', (२) 'द्विर्हविषोऽवद्यति', (३) 'सकृदभिघारयति', (४) चतुरवत्तं जुहोति' इति चत्वारि वाक्यानि पठितानि सन्ति। तत्र (१) होमपात्रस्य घृतेन लेपनम् 'उपस्तरणम्' इत्युच्यते। (२) हविर्द्रव्यात् द्विवारं विभज्य ग्रहणम् 'हविषो द्विरवदानम्' इत्युच्यते। (३) हविर्द्रव्ये घृतेन सेचनम् 'अभिघार' इत्युच्यते। (४) 'चतुरवत्तं जुहोति' इति वाक्ये 'चतुरवत्त' शब्देन 'संस्कृतः-पुराडाश' एवोच्यते। स च संस्कारः (१) उपस्तरणेन, (२) अभिधारणेन, द्विवारं (३) विभागेन च क्रियते। 'तत्रे'ति। तथासति यागहोमयोर्भिन्नत्वादित्यर्थः। चतुरवत्त-

---

प्रस्तुत करते हैं—जो प्रधान याग के सम्पादन के बाद अनुष्ठित होता है, वह प्रधानोत्तरकाला प्रतिपत्ति कहलाती है, जैसे—इड़ाभक्षण तथा पुरोडाश-संस्कार आदि।

दूसरे का उदाहरण—जब प्रधान याग के अनुष्ठान के समय ही उसका भी अनुष्ठान होता है, तब प्रधान समकाला प्रतिपत्ति कहलाती है, जैसे—होम आदि। प्रधान के अनुष्ठान के समय ही इसका भी अनुष्ठान होता है। दर्शपूर्णमासप्रकरण में सुना जाता है कि "सकृदुपस्तृणाति' 'द्विर्हविषोऽवद्यति' 'सकृदभिघारयति' तथा 'चतुरवत्तं जुहोति'। इस चतुरवत्त वाक्य से होम का अनुवाद करके चतुरवत्त द्रव्य का उसके साधन रूप से विधान नहीं किया जाता है; क्योंकि होम दूसरे किसी वाक्य से अज्ञात होने के कारण उसका अनुवाद सम्भव नहीं है। अनुवाद

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्राप्तत्वेनानुवादासम्भवात् ।

यागहोमशब्दविचारः

(४९) न च यदाग्नेयवाक्याद्धोमप्राप्तिः, तद्वाक्यस्य यागविधायकत्वात् । न च यागहोमयोरभेद इति वाच्यम्, देवतोद्देशेन द्रव्यत्यागस्य यागशब्दार्थत्वात् । प्रक्षेपविशिष्टस्य

वाक्ये 'जुहोति' पदेन होममनूद्य तत्साधनत्वेन चतुरवत्तद्रव्यं विधातुं न शक्यते । यतो हि पूर्वं होमः अप्राप्तः, तेन तस्यानुवादो न शक्यः ।

(४९) शंका—अत्र पूर्वपक्षी शङ्कते—'यदाग्नेय' इति वाक्येन अत्र होमस्य प्राप्तिः स्यात् । तत्रोत्तरं 'न चेति' । अत्र होमस्य प्राप्तिर्न च भवितुमर्हति । यतो हि 'यदाग्नेय' इति—वाक्यं 'यागस्य' विधायकमस्ति । यागहोमयोरैक्यं (तादात्म्यं) अपि वक्तुं न शक्यते । यतो हि देवतामुद्दिश्य क्रियमाणो मानसिको द्रव्यत्यागः 'याग' शब्दार्थः । देवतामुद्दिश्य च क्रियमाणो द्रव्यप्रक्षेप-विशिष्टो यागः 'होम' शब्दार्थः । 'आग्नेयचोदनयेति' । 'यदाग्नेय' इति आग्नेययागविधायकेन वाक्येन प्राप्तेऽपि यागे, तत्रवाक्ये होमबोधकस्य 'जुहोति' शब्दस्य अभावेन 'चतुरवत्तं जुहोति' इति वाक्ये

तो पूर्वप्रतिपादित पदार्थ का पुनः कथनरूप होता है । प्रधानपूर्वकाला का निरूपण आगे किया जायेगा ।

(४९) अब क्रमशः प्रधानपूर्वकाला प्रतिपत्ति का निरूपण प्राप्त था, परन्तु याग तथा होम शब्द का प्रसङ्गतः निरूपण प्राप्त हुआ है । इसलिये पहले उसके अर्थों का विचार प्रस्तुत करते हैं—

'यदाग्नेयोऽष्टाकपाल०' इत्यादि मन्त्र से होम का ज्ञान सम्भव नहीं है; क्योंकि वह वाक्य याग का विधायक है । याग और होम में अभेद अर्थात् दोनों की एकता का प्रतिपादन नही किया जा सकता है । कारण यह है कि देवता को उद्देश्य करके द्रव्य के त्याग को याग कहते हैं । यही याग शब्द का अर्थ है । प्रक्षेप से युक्त याग को होम कहते हैं अर्थात्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यागस्य होमशब्दार्थत्वात् । तत्राग्नेयचोदनया यागस्य प्राप्तत्वेऽपि प्रक्षेपांशस्य शक्त्याऽप्राप्तत्वेनानुवादासम्भवात् । किन्तूपस्तरणद्विरवदानाभिधारणवाक्यैः प्राप्तं चतुरवत्तमुद्दिश्य तत्संस्कारत्वेन प्रक्षेपो जुहोतीत्यनेन विधीयते । स च संस्कारः प्रतिपत्तिरूप एव । 'अग्नये जुष्टमभिधारयामि'

'जुहोति' शब्देन 'होमस्य' अनुवादो न भवितुमर्हति । किन्तु (१) 'उपस्तरण–(२) द्विरवदान (४)–अभिधारण' बोधकवाक्यैः प्राप्तं चतुरवत्तं द्रव्यं उद्दिश्य (अनूद्य) 'जुहोति' इति पदेन तत्संस्काररूपः प्रक्षेपः (होमः) विधीयते । अयं प्रक्षेपात्मकः संस्कारः प्रतिपत्तिरूप एव । यतः 'अग्नये जुष्टमभिघारयामि' इत्यादिभिर्निर्देशैः यागाङ्गभूतानां अग्न्यादि देवतानां कृते यथाकथञ्चिदभिधारणादिक्रियायामुपयुक्तः पुरोडाशः प्रतिपत्तिमपेक्षते, अतस्तत्पुरोडाशावयवभूतं यत् द्व्यवदानं तत्, यस्यां प्रक्षेपक्रियायां कर्म अस्ति तादृशी प्रक्षेपक्रिया, प्रतिपत्ति—संस्कारात्मिकैवेत्यभ्युपगन्तव्यम् । 'तदवयवद्व्यवदानकर्मकप्रक्षेपस्य' तस्य पुरोडाशस्य अवयवः तदवयवः । द्वे अवदाने यस्य तत् द्व्यवदानम् । तदवयवश्च तत् द्व्यवदानं च तदवयवद्व्यवदानम् । तत् कर्म यस्य स तदवयवद्व्यवदानकर्मकः । स चासौ प्रक्षेपश्च, तस्येति विग्रहः । पुरोडाशावयवभूतं यद् द्व्यवदानं तत्क-

---

जिस याग में प्रक्षेप भी किया जाता है, वही होम कहलाता है । उपर्युक्त आग्नेय-पद-घटित विधि-वाक्य से याग का ज्ञान हो जाने पर भी शक्तिवृत्ति से प्रक्षेप का ज्ञान न होने के कारण अनुवाद की सम्भावना नहीं की जा सकती है, अपितु उपस्तरण, द्विरवदान और अभिघारण के प्रतिपादक वाक्यों के द्वारा ज्ञात चतुरवत्त को उद्देश्य करके उसके संस्कार रूप से 'जुहोति' पद के द्वारा प्रक्षेप का विधान किया जाता है । वह संस्कार भी प्रतिपत्ति रूप ही है । 'अग्नये जुष्टमभिधारयामि' इत्यादि निर्देशों से याग के अङ्गभूत अग्नि आदि देवताओं के प्रयोजनरूप से जिस किसी भी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्यादिनिर्देशैर्यागाङ्गभूताग्न्यादिदेवतार्थतया यथाकथञ्चिद्दुपयुक्तस्य पुरोडाशस्य प्रतिपत्त्यपेक्षतया तदवयवद्व्यवदानकर्मकप्रक्षेपस्य प्रतिपत्तिकर्मत्वौचित्यात् ।

(५०) स च संस्कारः प्रधानसमकालः । होमो हि 'वषट्कृते जुहोति' इति विधानात्—वषट्कारोत्तरक्षणे अध्वर्युणा कर्त्तव्यः । यागोऽपि तस्मिन्नेव क्षणे, यागस्य स्मरणार्थेन

मंकप्रक्षेपस्येत्यर्थः । अत्र अवदानपदमङ्गुष्ठपर्वपरिमितावदेयभागपरम् । तत्र कल्पसूत्रम्—'आग्नेयस्य पुरोडाशस्य मध्यादङ्गुष्ठपर्वद्वयमात्रमवदानम्, तिरश्चीनमवद्यति । तस्मादङ्गुष्ठपर्वद्वयमात्रं खण्डयित्वा त्यक्तव्यमित्यर्थः ।

(५०) सचेति । 'स प्रक्षेपाख्यः प्रतिपत्तिसंस्कारः' प्रधानयागानुष्ठानकाले एव कर्तव्यो भवति । तथाहि—'वषट्कृते जुहोति' इत्यनेन वाक्येन विधीयमानो होमः, वषट्कारोच्चारणसमनन्तरमेव अध्वर्युणा कर्तव्योऽस्ति, तदानीमेव च यागस्य स्मरणार्थं विहितेन वषट्कारेण स्मारितो (स्मृतिपथं प्रापितः) यागो यजमानेन अनुष्ठेयो भवति । अनया रीत्या होम–यागयोश्च एकस्मिन्नेव काले अनुष्ठानं भवति । सर्वोऽप्ययं विषयः सर्वप्रदानाधिकरण (जै. मी. दर्श. अध्या. ३,पा. ४, अधि. १८, सू. ४३) वार्तिके विस्तरेण प्रतिपादितः । 'होमो' नाम प्रक्षेपः । 'वषट्कारो' नाम 'होतृ' संज्ञकेन ऋत्विजा क्रियमाणः 'वौऽषट्' शब्दोच्चारः । तयोर्यौगपद्यसम्भवात् इति । अध्वर्युसंज्ञकः ऋत्विक्

प्रकार उपयुक्त पुरोडाश की प्रतिपत्ति की अपेक्षा उसके अवयवभूत द्व्यवदानकर्मक प्रक्षेप को प्रतिपत्ति कर्म मानना ही उचित है ।

(५०) वह संस्कार भी प्रधान के समकालिक हो है । 'वषट्कृते जुहोति' इस विधि-वाक्य से होम का विधान है । इसलिये वषट्कार के पश्चाद्भावी समय में होम अध्वर्यु के द्वारा अनुष्ठेय है । याग भी उसी समय में अनुष्ठेय है; क्योंकि वह स्मरण-प्रयोजक वषट्कार के द्वारा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वषट्कारेण स्मारितः सन् यजमानेनानुष्ठेय इति तयोर्यौगपद्यसम्भवात्। तदिदं सर्वप्रदानाधिकरणवार्त्तिके स्थितम्। (पू० मी० अ० ३ पा० ४ अधि० १८ सू० ३४)।

(५१) प्रधानपूर्वकाला प्रतिपत्तिः यथा---'शकृत्सम्प्रविध्यति', 'लोहितं निरस्यति' इति शकृत्सम्प्रवेधन---लोहित-

---

प्रक्षेपं करोति, अतः प्रक्षेपकर्ता अध्वर्युः। यजमानश्च त्यागं करोति, अतः त्यागकर्ता यजमानः। तस्मात् प्रक्षेप–त्यागयोर्भिन्नकर्तृकत्वात् समसामयिकमनुष्ठानं संभवति। यागहोमयोरनुष्ठानस्य तुल्यकालिकत्वात् सः प्रतिपत्त्याख्यः संस्कारः प्रधानसमकालोऽस्ति। मूलस्थितेन 'स च संस्कारः प्रधानसमकालः' इति वाक्येन सह 'यौगपद्यसंभवात्' इति पञ्चम्यन्तस्य पदस्यान्वयः।

(५१) प्रधानपूर्वकालेति। प्रधानयागात्पूर्वं क्रियमाणायाः प्रतिपत्तेरुदाहरणम् 'शकृत्सम्प्रविध्यति', 'लोहितं निरस्यति' इत्युभाभ्यां वाक्याभ्यां विष्ठाया बहिर्निःसारणं रुधिरस्य च निरसनमिति यथाक्रमं विहितमस्ति। विषयोऽयमपि 'पशावनालंभाल्लोहितशकृतोरकर्मत्वम्' इत्यधिकरणे (पू० मी. अध्या. ४, पा. १, अधि. १२, सू. २७) प्रतिपादितोऽस्ति। 'शकृत्सम्प्रवेधन–लोहितनिरसने' इति। शकृत्सम्प्रवेधनं च लोहितनिरसनं च इति शकृत्सम्प्रवेधन–लोहितनिरसने। 'पशावनालम्भा'दिति। लोहित-शकृन्निरासोद्देशेन अनालम्भात् संज्ञपनाभावात्। उत्पत्तिवाक्ये पशोर्यागार्थत्वेन

स्मृतिविषयीभूत होते हुए यजमान के द्वारा अनुष्ठेय है। इस प्रकार दोनों का एककालानुष्ठेयत्व सम्भव है। वार्त्तिककार ने वार्त्तिकग्रन्थ के सर्वप्रदानाधिकरण में इन सभी बातों का स्पष्ट प्रतिपादन किया है।

(५१) पहले प्रतिपत्ति के तीन भेदों में से दो का प्रतिपादन हो चुका है। अब अवशिष्ट तीसरे भेद का निरूपण किया जा रहा है। जिसका प्रधान याग के अनुष्ठान से पहले अनुष्ठान किया जाता है, वह 'प्रधाग-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निरसने। इदमपि 'पश्वालम्भात् लोहितशकृतोरकर्मत्वम्' इत्यधिकरणे (पू० मी० अ० ४ पा० १ अधि० १२ सू० २७) स्थितम्।

विधानात्। अतः पशुयागे लोहितशकृन्निरासयोः अकर्मत्वम् अप्रयोजकत्वमिति सूत्रार्थः। अयमभिप्रायः—पशुयागस्य उत्पत्तिवाक्ये यागार्थं पशोर्विधानमस्ति। ततः 'पशुं विशास्ति' इति वाक्ये पशोर्मारणात्मकस्य विशसनस्य विधानमस्ति। तेन प्रत्यक्षः पशुः यागे नोपयुज्यते, किन्तु तस्य पशोरङ्गानि यागे उपयुज्यन्ते। पशोः संज्ञपनानन्तरं तस्य एकादश अङ्गानि हविष्ट्वेन स्वीकर्तव्यानि भवन्ति। अतस्तानि एकादश अङ्गानि एव यागोपयोगीनि भवन्ति। तानि एकादश अङ्गानि—'हृदयं, जिह्वां, क्रोडं, सव्य-सक्थिपूर्वं नडकं, पार्श्वे, यकृद्वृक्कौ, गुदमध्यं, दक्षिणाश्रोणिः, दक्षिण-सक्थिपूर्वं नडकं, गुदतृतीयाणिष्ठं, सव्याश्रोणिः' इति कात्यायनः। तदंगोपादानार्थमेव पशोरालंभः। नान्यत्प्रयोजनम्। पशोः संज्ञपनानन्तरं तच्छरीरात्प्रवहमानस्य रुधिरस्य कृते अथवा तच्छरीरान्निःस्रियमाणाया विष्ठायाः कृतेऽयं पश्वालंभो नास्ति।

'पूर्वकाला' प्रतिपत्ति कहलाती है, जैसे—'शकृत्सम्प्रविध्यति' 'लोहितं निरस्यति' से शकृत् का सम्प्रवेधन तथा लोहित का निरसन प्रतिपादित है। प्रधान याग के अनुष्ठान से पहले ही इन दोनों कार्यों का अनुष्ठान प्राप्त होता है। तात्पर्य यह है कि पहले पशु का विशसन होता है और उसी समय ये दोनों कार्य प्राप्त होते हैं। जब विशसन के बाद उससे हविष् का निष्पादन होता है, तब प्रधान याग का अनुष्ठान सम्पन्न होता है। इसलिये इन दोनों कार्यों को प्रधानपूर्वकाला प्रतिपत्ति मानना उचित ही है। मीमांसादर्शन के ४-१-१२-२७ में ये सभी बातें स्पष्ट प्रतिपादित हैं।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उपयोक्ष्यमाणसंस्कारभेदाः

(५२) उपयोक्ष्यमाणसंस्कारोऽप्यनेकविधः—१ साक्षाद्विनियुक्तसंस्कारः, २ साक्षाद्विनियुक्तस्य यदुपकारकं तत्सं-

---

(५२) उपयोक्ष्यमाणसंस्कारस्यापि अनेके प्रकाराः सन्ति। साक्षाद्विनियुक्तसंस्कारः इति । (१) प्रधानार्थमेव यः पदार्थो विहितः तस्य संस्कारः। (२) प्रधानार्थमेव विहितस्य पदार्थस्य य उपकारकः तस्य संस्कारः। (३) यस्य पदार्थस्य विनियोगः अग्रे कर्तव्यः,

---

(५२) उपयुक्त संस्कारक गुणकर्म का साङ्गोपाङ्ग निरूपण करने के बाद अवसर-प्राप्त होने के कारण उपयोक्ष्यमाणसंस्कारकगुणकर्म का प्रतिपादन करते हैं। जिन द्रव्यों का भविष्य में उपयोग होने वाला है, उनके संकार के विधायक वाक्यों को उपयोक्ष्यमाणसंस्कारक और संस्कार को उपयोक्ष्यमाणसंस्कार कहते हैं।

वह भी अनेक प्रकार का है, जैसे—

(१) साक्षाद्विनियुक्त का संस्कार। (२) साक्षात् विनियुक्त का जो उपकारक पदार्थ, उसका संस्कार। (३) विनियोक्ष्यमाण का संस्कार।

प्रथम का उदाहरण—जिसमें कोई अवान्तर संस्कारक न हो, अपि तु साक्षात् उसी के संस्कार का विधान हो, वह 'साक्षात् विनियुक्तसंस्कार'' कहलाता है, जैसे—'व्रीहीनवहन्ति' इत्यादि।' व्रीहिभिर्यजेत' इस वाक्य से विनियुक्त व्रीहि का ही 'व्रीहीनवहन्ति' विधि से अवहनन-जन्य संस्कार का विधान किया जाता है।

दूसरे का उदाहरण—जिसमें साक्षात् विनियुक्त पदार्थ के अवान्तर उपकारक के संस्कार का विधान हो, उसे ही साक्षात् विनियुक्त के उपकारक का संस्कार कहते हैं, जैसे—;वत्समालभेत' इत्यादि। दोहनरूप क्रिया का साक्षात् अङ्गरूप से गोद्रव्य का विनियोग होता है और उस के दोहन का उपकारक वत्स होता है। इस वाक्य से उस वत्स का

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्कारः, ३ त्रिनियोक्ष्यमाणसंस्कारश्चेति।

(५३) तत्र आद्यो यथा—'व्रीहीनवहन्ति' इत्यादौ 'व्रीहिभिर्यजेत' इत्यादिवाक्येन साक्षाद्विनियुक्तव्रीहीणामवहननसंस्कारोऽवघातादिरूपः। द्वितीयो यथा—'वत्समालभेत' इति दोहाङ्गत्वेन साक्षाद्विनियुक्तस्य गोद्रव्यस्य उपकारको यो वत्सः तत्संस्कारकमिदमालम्भनम्। तृतीयो यथा—'तप्ते पयसि दध्यानयति' इति। अत्र 'सा वैश्वदेव्यामिक्षा'

तस्य संस्कारः।

(५३) तत्रेति। तत्र त्रिविधेषु उपयोक्ष्यमाणसंस्कारेषु (१) आद्यस्य उदाहरणम्—'व्रीहीनवहन्ति' इत्यादिस्थलेषु 'व्रीहिभिर्यजेत'। इत्यनेन वाक्येन यागमुद्दिश्यैव विहितानां व्रीहीणां 'व्रीहीन् अवहन्ति' इति वाक्येन अवहननात्मकः संस्कारः अभिहितः।

(२) द्वितीयस्य उदाहरणम्—'वत्समालभेत' अत्र आलम्भनं नाम स्पर्शः। वत्सालम्भः वत्सस्य स्पर्शः। 'गां दोग्धि' इति वाक्येन साक्षाद् विहितस्य गोदोहनस्य उपकारको यो वत्सः तस्य स्पर्शरूपः संस्कारः।

(३) तृतीयस्य उदाहरणम्—'तप्ते पयसि दध्यानयति' अर्थात् तप्ते दुग्धे दध्नः प्रक्षेपणम्। वाक्यमिदं चातुर्मास्ययागीये वैश्वदेवाख्ये पर्वणि उपलभ्यते। अत्र 'सा वैश्वदेव्यामिक्षा' इति वाक्ये स्थितः 'तत्' (सा)

आलम्भन विहित है। अतः दोहन के उपकारक वत्स का संस्कारक यह आलम्भन हुआ।

(५३) तीसरे भेद को बताते हैं, जैसे "तप्ते पयसि०" इत्यादि। 'तप्ते पयसि दध्यानयति, सा वैश्वदेव्यामिक्षा' यह सम्पूर्ण मन्त्र है। गरम दूध में दधि डालने पर दूध दो भागों में बँट जाता है। उनमें एक घनीभूत द्रव्य होता है और दूसरा जलमात्र। घनीभूत द्रव्य को 'आमिक्षा' तथा जलमय द्रव्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति वाक्येन तच्छब्देन निर्दिश्य वैश्वदेवयागाङ्गत्वेन विनियोक्ष्यमाणं यत् पयः, तत्संस्कारकत्वाद्विनियोक्ष्यमाण-संस्कारकं दध्यानयनम् ।

(५४) पशुपुरोडाशयागस्तूपयुक्तोपयोक्ष्यमाणदेवता-संस्कारार्थः, त्यागांशे अदृष्टार्थश्च । अत्र तत्संस्कार्याग्नीषोम-

---

शब्दः 'तप्ते पयसि' इति वाक्येन प्रतिपादितं दुग्धं निर्दिशति, अन्येद्युः (द्वितीयस्मिन् दिने) वैश्वदेवयागांगत्वेन विनियोक्ष्यमाणस्य (उपयोक्ष्य माणस्य) तस्य दुग्धस्य (पयसः) संस्कारकमिदं दध्यानयनम् । तस्मादिदं दध्यानयनं विनियोक्ष्यमाणसंस्कारकमित्युच्यते । अनेन प्रकारेण (१) केवलोपयुक्तस्य संस्कारः, (२) केवलोपयोक्ष्यमाणस्य संस्कारः इति प्रकारद्वयेन गुणकर्मणो रूपं निरूपितमेतावता ।

(५४) पशुपुरोडाशयाग इति—पूर्वमुपयोक्ष्यमाणसंस्कारोऽप्यनेकविध इति अभिहितम्, तस्य प्रकारत्रयमपि वर्णितम् । गुणकर्मणः पूर्वोक्त-द्विविधप्रकार इव उपयुक्तोपयोक्ष्यमाणप्रकारोऽपि वर्तते इति प्रतिपादयति ग्रन्थकारः—'पशुपुरोडाशयागस्त्विति' । पशुपुरोडाशस्य यागस्तु उपयुक्ताया उपयोक्ष्यमाणायाश्च देवतायाः संस्कारार्थः । तथैव त्यागांशे अदृष्टसम्पादनार्थोऽपि । तथाहि—अत्र यागेन संस्कार्या या अग्नीषोमाख्या देवता, सा वपायागे उपयुक्ता वर्तते । हृदयाद्यङ्गयागेषु च सा उपयोक्ष्यमाणा वर्तते । 'उपयुक्तोपयोक्ष्यमाणदेवतासंस्कारार्थः—' उपयुक्ता च सा उपयोक्ष्यमाणा च उपयुक्तोपयोक्ष्यमाणा, उपयुक्तोपयोक्ष्यमाणा च सा देवता

को 'वाजिन' कहते हैं । उस आमिक्षा का 'विश्वदेव' देवता हैं । 'सा वैश्वदेव्यामिक्षा' इस वाक्य में प्रयुक्त 'तत्' शब्द से उसका निर्देश किया गया है । 'वैश्वदेव' याग के अङ्ग रूप से दध्यानयन विहित है । वही 'विनियोक्ष्यमाण संस्कारक' कहलाता है ।

(५४) पशुपुरोडाश याग, उपयुक्त तथा उपयोक्ष्यमाण देवता का संस्कार-सम्पादक है और त्यागांश से अदृष्ट (अपूर्व) का भी उत्पादक

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

देवताया वपायागे उपयुक्तत्वात्। हृदयाद्यङ्गयागेषु उपयोक्ष्यमाणत्वाच्च।

(५५) स्विष्टकृद्यागो द्रव्यांशे देवतांशे चोपयुक्तसंस्कारार्थः, त्यागांशे अदृष्टार्थश्च। सूक्तवाकसाधनं प्रह-

---

च उपयुक्तोपयोक्ष्यमाणदेवता—तस्याः संस्कारः, तस्मै इति विग्रहः। अयमभिप्रायः—दीक्षागतामग्नीषोमदेवतामुद्दिश्य कर्तव्ये पशुयागे पशोर्विदारणानन्तरं तस्य वपां निष्कास्य प्रथमतः अग्नाषोमाख्यदेवतोद्देशेन वपायागः अनुष्ठातव्योऽस्ति। ततः पशुयागस्य अङ्गभूतः पुरोडाशयागः तामेव देवताम् (अग्नीषोमाख्यां) उद्दिश्य अनुष्ठातव्योऽस्ति। तदनन्तरं पशोः हृदय-जिह्वा-वक्षःप्रभृत्यवयवान् आदाय अग्नीषोमदेवतामेवोद्दिश्य यागः कर्तव्यो भवति। देवतामुद्दिश्य द्रव्यत्याग एव याग इत्युच्यते। तदा यागगतो द्रव्यत्यागात्मकोंशः देवतासंस्कारकः कथं भवेदिति चेत् समाधत्ते—'त्यागांशे अदृष्टार्थश्चेति। यागे तावत् (१) देवतोद्देशः, (२) द्रव्यत्यागः, (३) द्रव्यप्रक्षपश्चेति त्रयोंशा भवन्ति।

(५५) स्विष्टकृद्याग इति। 'स्विष्टकृत्' यागो हि द्रव्यांशेन देवतांशेन च उपयुक्तस्य संस्कारार्थो भवति। त्यागांशेन पुनरदृष्टार्थोऽपि भवति। अयमभिप्रायः—दर्शपूर्णमासयागे प्रधानयागानुष्ठानानन्तरं 'शेषात् स्विष्टकृते समवद्यति', 'उत्तरार्धात् स्विष्टकृते समवद्यति' इत्यादिवाक्यानुरोधेन प्रधानयागे उपयुक्तस्य पुरोडाशस्य एको भागः स्विष्टकृद्यागार्थं गृह्यते, तेन स्विष्टकृद्यागस्य यः प्रक्षेपांशः सः उपयुक्तसंस्कारार्थ इत्युच्यते।

है, क्योंकि इन स्थलों में उससे संस्कार्य अग्नीषोमदेवता, वपा याग में उपयुक्त है और हृदयादि अङ्ग-सम्पादक यागों में उपयोक्ष्यमाण भी है।

(५५) स्विष्टकृत् याग द्रव्यांश तथा देवतांश दोनों में उपयुक्त-संस्कारार्थ और त्यागांश में अदृष्टार्थ भी है। उसी प्रकार सूक्तवाकमन्त्र-करणक भी द्रव्यांश तथा देवतांश दोनों में उपयुक्तसंस्कारक और त्यागांश में अदृष्टसम्पादक है। "स्वाहाकारं यजति' इस वाक्य से विहित

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रणमपि तथैव। उत्तमप्रयाजो यक्ष्यमणदेवतासंस्कार-त्वात्तादशे उपयोक्ष्यमाणसंस्कारः, इतरांशे (यागांशे)

सूक्तवाकमन्त्रोच्चारणद्वारा क्रियमाणं प्रहरणमपि तथैवावगन्तव्यम्। अन्तिमः प्रयाजः, अग्रे क्रियमाणे यागे उद्देश्यभूताया देवतायाः स्मारकः, अर्थात् देवतास्मरणात्मकसंस्कारार्थः। तेन देवतांशे स उपयोक्ष्यमाणस्य संस्कारार्थं इत्यभिप्रायः। त्यागात्मक इतरांशश्च अदृष्टार्थोऽस्ति। अयं निष्कर्षः——दर्शपूर्णमासाख्ये यागे 'सूक्तवाकेन प्रस्तरं प्रहरति' इति वाक्यानुरोधेन सूक्तवाकमन्त्रमुच्चार्य प्रस्तरद्रव्येण अनुष्ठीयमानो यागो विधीयते। प्रधानयागे अंगयागे च याः देवताः उपयुक्ताः ता एव देवताः पुनः प्रस्तर-होमेऽपि विहिताः सन्ति। अयं प्रस्तरहोमश्च, प्रधानयागानुष्ठानानन्तरम् अंगयागानुष्ठानानन्तरंच कर्तव्यो भवति। अतस्तत्पूर्वमेव तदीयानां देवतानामुपयुक्तत्वात् अथच प्रस्तरहोमीय-प्रस्तराख्ये द्रव्ये पूर्वं हविर्द्रव्यस्य स्थापितत्वात् तद्द्रव्यमपि उपयुक्तमस्ति। तेनायं प्रस्तरहोमः उद्देशांशेन प्रधानयागे अंगयागे च उपयुक्तानां देवतानां संस्कारं करोति। प्रक्षेपांशेन च पूर्वं हविर्द्रव्यधारणे उपयुक्तं प्रस्तरसंज्ञकं कुशमुष्टिं संस्करोति। अर्थात् प्रस्तरस्य संस्कारं करोति। अतः अंशद्वयेऽपि यागोऽयं दृष्टार्थं एव भवति। एवंच द्रव्यांशे देवतांशेऽपि उपयुक्तसंस्कारार्थोऽयमितियावत्। अध्वर्युप्रेषितो होता यं मंत्रं पठति स सूक्तवाकइत्युच्यते।

एवं (१) पशुपुरोडाशयागः (२) स्विष्टकृद्यागः (३) प्रस्तरहोमः इति त्रीणि उदाहरणानि प्रदर्शितानि। तथापि बुद्धिवैशद्यार्थं किञ्चिदिव भिन्नानि तादृशान्येव उदाहरणानि पुनः प्रदर्श्यन्ते 'उत्तमप्रयाज' इति। उत्तमः अन्तिम इत्यर्थः। उत्तमप्रयाजोनाम 'स्वाहाकारं जयति' इति वाक्येन विहितः प्रयाजः। एतत्सम्बन्धिनाम् अग्न्यादिदेवतानां अनुष्ठास्यमाने

उत्तम (अन्तिम) प्रयाज यक्ष्यमाण देवता का संस्कारक तथा इतरांश में (यागांश में) अदृष्ट-प्रतिपादक है। इसी प्रकार हृदयादि हविर्याग से

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अदृष्टार्थः। हृदयादिहविर्यागात्पूर्वं क्रियमाणो वसाहोमोऽपि वसांशे प्रतिपत्तिरितरांशे अदृष्टार्थं इत्याद्यूह्यम्।

मतान्तरेण प्रतिपत्तिलक्षणम्

(५६) केचित्तु—उपयोक्ष्यमाणसंस्कारभिन्नसंस्कार कर्मत्वं प्रतिपत्तिकर्मत्वम्। चतुरवत्तद्रव्यस्य होमेन भस्मी

प्रधानयागे उपयोक्ष्यमाणत्वात् देवतात्मके उद्देशांशे अस्य दृष्टार्थत्वम्। पू निर्दिष्टेषु प्रथमोदाहरणे देवताया उपयुक्तत्वमुपयोक्ष्यमाणत्वं चेति द्वैविध्य मासीत्। किन्त्वस्मिन्नुदाहरणे केवलमुपयोक्ष्यमाणैवास्ति, इति द्वयोरुदाहरण योर्विशेषः। इतरांशे अर्थात् त्यागांशे प्रक्षेपांशे चेत्यवगन्तव्यम्। अन्यविधमु दाहरणम्प्रदर्शयति 'हृदयादी'ति। 'वसा' नाम पशुमांसपाचनपात्रे वर्त मानो यः पश्वंगरसः। तया वसया (तेन अंगरसेन) अनुष्ठीयमानो होम 'वसाहोम' इत्युच्यते। यागात्पूर्वं क्रियामाणस्य लोहित-शकृन्निरसनस्य यथा प्रतिपत्तित्वं स्वीकृतं, तथैव हृदयाद्यवयवानां पाकः वसायाः पश्चाद् भवति, तेन हृदयादिहविर्यागात्पूर्वं क्रियमाणस्य वसाहोमस्यापि प्रति पत्तित्वं भवितुमर्हति। पाकार्थं वसाया उपयुक्तत्वात् वसाहोमः प्रक्षेपांशे दृष्टार्थः। पूर्वोदाहृतेषु द्वितीयोदाहरणे द्रव्यं प्रधानयागे प्रत्यक्षतया उप युक्तम्। प्रकृते च वसा तादृशी प्रत्यक्षतया नोपयुक्ता, इति द्वयोर्विशेषः। 'इतरांशे' इति त्यागांशे-देवतांशे चेत्यर्थः। 'इत्याद्यूह्यम्' अत्रत्यादिशब्देन दर्शपूर्णमासीयपिष्टलेप-फलीकरणहोमोविज्ञेयः। अयं निष्कर्षः—हृदया दिहविर्द्रव्यस्य यागात्पूर्वं क्रियमाणो वसाहोमोऽपि वसात्मकद्रव्यांशे प्रति पत्तिरूपः। त्यागात्मके इतरांशे च अदृष्टार्थः इति बोद्धव्यम्।

(५६) केचित्त्विति। केचन मीमांसकाः उपयोक्ष्यमाणसंस्कारा भिन्नसंस्कारकं कर्म-प्रतिपत्तिकर्म इत्याहुः। हवनेन चतुरवत्तद्रव्य

पहले सम्पाद्यमान 'वसाहोम' भी वसा अंश में प्रतिपत्ति कर्म और उससे भिन्न अंश में अदृष्ट-निष्पादक है।

(५६) कुछ विद्वान् प्रतिपत्ति कर्म का दूसरे रूप से लक्षण प्रस्तुत

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भूतस्य होमेउपयोक्ष्यमाणत्वाभावात् तद्भिन्नत्वं होमेऽस्तीति लक्षणसङ्गतिरित्याहुः।

अर्थ-गुणकर्मणोः प्राधान्यविचारः

(५७) अत्रायं विशेषः--अर्थकर्मणि द्रव्यापेक्षया कर्मणः प्राधान्यम्, कर्मणि द्रव्यस्य गुणत्वम्। यथा अग्निहोत्रादौ द्रव्यादेर्गुणत्वम्। गुणकर्मणि द्रव्यस्य प्राधान्यं, द्रव्ये च कर्मणो

भस्मीभूतं भवति। भस्मीभूतत्वात्तस्य अग्रे कोऽपि उपयोगो नास्ति। अतः तस्य द्रव्यस्य क्वापि उपयोक्ष्यमाणता नास्ति। तेन अयं चतुरवत्तहोमः उपयोक्ष्यमाणसंस्काराद् भिन्न इतिकृत्वा प्रतिपत्तिलक्षणं तत्र (चतुरवत्तहोमे) संघटते।

(५७) अत्रायमिति। कर्मणो गुणकर्मार्थकर्मभेदेन यद् द्वैविध्यं पूर्वमुक्तं तत्र विशेषं प्रतिपादयितुं 'अत्रायमि'ति। अर्थकर्मणि द्रव्यापेक्षया कर्मणः प्राधान्यं, कर्मापेक्षया च द्रव्यस्य गुणत्वं भवति। यथा--अग्निहोत्रादौ कर्मणि दध्यादिद्रव्यस्य गुणत्वम्। गुणकर्मणि च कर्मापेक्षया द्रव्यस्य प्राधान्यं भवति, द्रव्यापेक्षया कर्मणो गुणत्वं भवति। यथा--'व्रीहीन् प्रोक्षति',--'व्रीहीन् अवहन्ति' इत्यादौ व्रीहिगतद्वितीयाविभक्त्या व्रीहिषु प्रोक्षणक्रियायाः साध्यत्वं प्रतीयते। अतः प्रोक्षणक्रियापेक्षया व्रीह्यात्मक

करते हैं। उनका कहना है कि उपयोक्ष्यमाण संस्कार से भिन्न संस्कार के सम्पादक कर्म को प्रतिपत्ति कर्म कहते हैं। होम के द्वारा भस्मीभूत चतुरवत्त द्रव्य में होम के अनुष्ठान के पश्चात् उपयोक्ष्यमाणत्व न रहने के कारण उस होम में तद्भिन्नत्व रहता है। इस प्रकार लक्ष्य में लक्षण की सङ्गति हो जाती है।

(५७) 'अर्थकर्म' और 'गुणकर्म' में परस्पर भेद यह यह है कि अर्थकर्म में द्रव्य की अपेक्षा कर्म की प्रधानता होती है। कर्म के प्रति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गुणत्वम् । व्रीहीन् प्रोक्षति, अवहन्तीत्यादौ द्वितीयया व्रीहीणां क्रियासाध्यत्वप्रतीतेः क्रियापेक्षया द्रव्यस्य प्राधान्यं प्रोक्षणादि क्रियायास्तदपेक्षया गुणत्वमिति ।

गुणकर्मणश्चातुर्विध्यम्

(५८) पुनरपि गुणकर्म चतुर्विधम्--उत्पत्त्याप्तिविकृति संस्कृतिभेदात् ।

(५९) तत्रोत्पत्तिसंस्कारो यथा—'अग्नीनादधीत' इति

द्रव्यं प्रति प्राधान्यं प्रतीयते । व्रीहिद्रव्यापेक्षया च प्रोक्षणादिक्रियाया गौणत्वं प्रतीयते ।

(५८) पुनरपीति । पुनरपि गुणकर्मचतुर्विधम्—उत्पत्ति-आप्ति वकृति—संस्कृति भेदात् । (१) उत्पत्ति,—(२) आप्ति,—(३) विकृति-(४) संस्कृति भेदेन गुणकर्मण एव पुनः चत्वारः प्रकाराः प्रदर्श्यन्ते ।

(५९) तत्रेति । तत्र उत्पत्तिसंस्काराख्यस्य गुणकर्मण उदाहरणम्-वसन्ते ब्राह्मणोऽग्नीनादधीत'–इति कतिपयमन्त्रविशेषैः संभारेषु अग्नयः स्थाप्यन्ते

'द्रव्य' गुण होता है। गुणकर्म में 'द्रव्य' की प्रधानता होती है। 'द्रव्य' के प्रति 'कर्म' गौण होता है। कारण यह है कि 'व्रीहिन् प्रोक्षति' 'व्रीहिन् अवहन्ति' इत्यादि में प्रयुक्त द्वितीया विभक्ति के द्वारा व्रीहि की क्रिया-साध्यता प्रतीत होती है। क्रिया की अपेक्षा 'द्रव्य' की प्रधानता और उसके अपेक्षा 'प्रोक्षण' आदि क्रियाओं की गौणता होती है। यही इन दोनों में भेद है।

(५८) पहले गुणकर्म के दो भेद बताये। पुनः प्रकारान्तर से उसी के चार भेद बताते हैं। वह गुण कर्म उत्पत्ति, आप्ति, विकृति, और संस्कृति के भेद से चार प्रकार का होता है। क्रमशः उनके उदाहरण प्रस्तुत किये हैं।

(५९) उत्पत्ति संस्कार का उदाहरण–'अग्नीनादधीत' इत्यादि इसमें

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मन्त्रविशेषैः सम्भारेषु निधापिता अप्याहवनीयादय उत्पद्यन्त इत्याहवनीयाद्युत्पत्तिहेतुभूतसंस्कारजनकत्वात् आधानस्य-उत्पत्तिसंस्कारत्वम् । आप्तिसंस्कारो यथा—'स्वाध्यायोऽध्येतव्य' इति । अध्ययनेन स्वाध्याय आप्यत इत्याप्तिसंस्कारोऽयम् । विकृतिर्यथा—'व्रीहीन् अवहन्ति' इति व्रीहिगतवैतुष्यरूपविकृतिजनकत्वादवहननं विकृतिसंस्कारः । संस्कृतिर्यथा 'व्रीहीन् प्रोक्षति' इति । अत्र प्रोक्षणस्य व्रीहिगतातिशय-

---

स्थापितेष्वग्निषु आहवनीयाद्यग्नय उत्पद्यन्ते। तेन हेतुना आहवनीयाद्यग्न्युत्पत्तौ हेतुभूतः यः 'आधाना'ख्यः संस्कारः, स 'उत्पत्ति' संस्कारशब्देन उच्यते। संभारो नाम यत्राग्निर्निधीयते स पार्थिवो वनस्पतिजन्यः पदार्थः। आप्तिसंस्कारस्य उदाहरणम्—'स्वाध्यायोऽध्येतव्यः' अनेन विधिना स्वाध्यायस्य 'आप्तिः' प्राप्तिः, लाभो भवति। अतोऽयमाप्ति संस्कारः। विकृतिसंस्कारस्य उदाहरणम्—'व्रीहीन् अवहन्ति' अवहनन संस्कारेण व्रीहीणां वैतुष्यरूपा विकृतिः भवति, तेनाऽयं विकृतिसंस्कारः। विकृतिर्नाम पूर्वस्वरूपस्य परिवर्तनम्। संस्कृतिसंस्कारस्य उदाहरणम्—'व्रीहीन् प्रोक्षति' अनेन प्रोक्षणद्वारा व्रीहिषु अतिशयाख्यः कश्चन अदृष्टः संस्कार उत्पाद्यते। तेनायं 'संस्कृतिसंस्कार' इत्युच्यते। अतः प्रोक्षणस्य

उदाहरण हैं। मन्त्रविशेष के द्वारा सम्भार (जिन पर अग्नि रखते हैं, उन पार्थिव और वनस्पति, जन्य पदार्थ) पर रखे हुए अग्नि में आहवनीयादि अग्नियों की उत्पत्ति होती है। इस प्रकार आहवनीयादि अग्नियों की उत्पत्ति के हेतुभूत आधान-संस्कार को 'उत्पत्ति संस्कार' कहते हैं अर्थात् उसमें 'उत्पत्ति' नामक संस्कार होता है।

आप्तिसंस्कार का उदाहरण—'स्वाध्यायोऽध्येतव्यः' इस विधि से अध्ययन के द्वारा स्वाध्याय का लाभ होता है। इसलिये यह 'आप्ति-संस्कार' है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रूपसंस्कृतिजनकत्वात् संस्कृतिरूपगुणकर्मत्वम् । अत्राधान-मध्ययनञ्च स्वतन्त्रं गुणकर्म न तु क्रत्वङ्गम् । प्रोक्षणादिकं सर्वं क्रत्वङ्गं गुणकर्मेति ध्येयम् ॥

अर्थकर्म्मणस्त्रैविध्यम्

(६०) अर्थकर्म त्रिविधम्—नित्य-नैमित्तिक-काम्य-भेदात् । तत्र—'यावज्जीवमग्निहोत्रं जुहोति', 'सायं जुहोति'

संस्कृतिरूपं (संस्कृतिसंस्काररूपं) गुणकर्मत्वं बोद्धव्यम् । उपरि निर्दिष्टेषू-दाहरणेषु—आधानाऽध्ययने स्वतन्त्रे गुणकर्मणी स्तः । कस्यापि क्रतोः अंगभूते न स्तः, किन्तु प्रोक्षणावहनने क्रतोरङ्गभूते गुणकर्मणी स्तः

(६०) अर्थकर्मेति । (१) नित्य,–(२) नैमित्तिक,–(३) काम्य-भेदेन अर्थकर्म त्रिविधमस्ति । तत्र 'यावज्जीवमग्निहोत्रं जुहोति', 'सायं जुहोति', 'प्रातर्जुहोति' इत्यादिभिर्वाक्यैः यावज्जीवनकालमामरणान्तं सायम्प्रातः नियमेन कर्तव्यतया विहितं अग्निहोत्रादिकर्म नित्यकर्मेत्यु-च्यते ।

विकृति संस्कार का उदाहरण—'व्रीहीनवहन्ति' इत्यादि से 'विकृति' नामक संस्कार का सम्पादन किया जाता है; क्योंकि अवघात व्रीहिगत वैतुष्य (वितुषीकरण) रूप विकृति का जनक होता है । इसीलिये इसको 'विकृति' संस्कार कहते हैं ।

संस्कृति संस्कार का उदाहरण—'व्रीहीन् प्रोक्षति' इत्यादि से 'संस्कृति' नाम के संस्कार का निष्पादन किया जाता है; क्योंकि प्रोक्षण करने से व्रीहि में एक संस्कारमात्र उत्पन्न होता है। यहाँ आधान और अध्ययन दोनों स्वतन्त्र गुणकर्म हैं। ये क्रतु (याग) के अङ्ग नहीं हैं। प्रोक्षण आदि सभी क्रतु के अङ्गभूत गुणकर्म हैं। यही दोनों में परस्पर भेद है।

(६०) अर्थ कर्म और गुण-कर्म के भेद से कर्म के दो प्रकारों को दिखलाकर गुणकर्म का सम्यक् प्रतिपादन किया। अब अर्थकर्म के भेद का प्रतिपादन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

'प्रातर्जुहोति' इति जीवता पुरुषेण सायंप्रातःकालयोर्नियमेन कर्त्तव्यतया अवगतमग्निहोत्रादिकं नित्यम्। 'अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत्' इति दर्शपूर्णमासातिपत्तिनिमित्तकपथिकृदिष्टयादिकं नैमित्तिकम्।

(६१) नित्यनैमित्तिकयोरकरणे प्रत्यवाय एव, कृते फलं नास्तीति केचित्। अन्ये तु दुरितनिवृत्तिः, फलमस्ति—

'नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्'।

विहितसमये दर्शपूर्णमासादिकर्मणः अननुष्ठानात्मकं निमित्तमुद्दिश्य 'अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत्' इत्यादिवाक्येन प्रतिपादिताः 'पथिकृत्' इत्याद्या इष्टिविशेषाः नैमित्तिककर्मशब्देन उच्यन्ते। 'पथिकृत्' इति अग्नेः संज्ञाविशेषः।

(६१) नित्यनैमित्तिकयोरिति। नित्य-नैमित्तिककर्मणोरननुष्ठाने सति प्रत्यवायो (अपराधः, दोषः) भवति। कृते च अनुष्ठाने फलं

करते हैं; क्योंकि स्वरूप का प्रदर्शन पहले हो चुका है। नित्य, नैमित्तिक और काम्य के भेद से अर्थकर्म तीन प्रकार का होता है। 'यावज्जीवमग्निहोत्रं जुहोति', जीवन-पर्यन्त अग्निहोत्र करे। इसी प्रकार 'सायं जुहोति' एवं 'प्रातर्जुहोति' इत्यादि से जीवित पुरुष के द्वारा सायंकाल तथा प्रातः काल के समय में नियमपूर्वक अनुष्ठेय रूप से अग्निहोत्रादि का ज्ञान होता है। जिन में किसी फल का निर्देश नहीं है, उनको नित्य कर्म कहते हैं। 'अग्नये पथिकृते' इत्यादि से दर्शपूर्णमास की निष्पत्तिनिमित्तक 'पथिकृत्' नाम के इष्ट्यादि का विधान है। 'पथिकृत्' अग्नि-विशेष का नाम है। यहाँ दर्शपूर्णमास की निष्पत्ति-निमित्तक इष्टि का विधान होने के कारण इसको नैमित्तिक कहते हैं।

(६१) कुछ लोगों का कहना है कि नित्य और नैमित्तिक कर्मों के अनुष्ठान न करने से प्रत्यवाय होता है और उसके अनुष्ठान से भी कोई फल-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्यादिवाक्यैः प्रत्यवायनिवृत्तेः फलत्वेन श्रूयमाणत्वात्। नचैवं तयोरपि काम्यत्वापत्तिः फलवत्त्वादिति वाच्यम्। फलकामनापूर्वकानुष्ठानाभावात्, तत्तद्विधिवाक्ये फलाकाममुद्दिश्य तदर्थसाधनत्वेन विधानाभावाच्च काम्यत्वानुपपत्तिः।

किमपि नेति प्राभाकरमीमांसकाः। भाट्टास्तु नित्य-नैमित्तिककर्मणो दुरितनिवृत्तिरेव फलम्, यतोहि 'नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्' इत्यादिवाक्यैर्दुरितक्षयात्मकं फलमवगम्यते। अत्रेयमाशंका समुदेति— नित्य-नैमित्तिककर्मणोरपि फलमस्तीत्यभ्युपगम्यमाने नित्य-नैमित्तिककर्मण्यपि 'काम्यकर्माणि' इति अभ्युपगन्तव्यानि भवेयुः, तेषां फलवत्त्वात्। अस्याः शंकाया उत्तरमिदम्—'फलकामनेति'। नित्य-नैमित्तिककर्मणां फलवत्त्वे सत्यपि फलप्राप्तिमुद्दिश्य तेषामनुष्ठानं न क्रियते। किञ्च— नित्य-नैमित्तिककर्मविधायकवाक्यैः विवक्षितफलकामिनं पुरुषमुद्दिश्य तत्तत्फलप्राप्तये तत्तत्कर्मणां (नित्य-नैमित्तिककर्मणां) विधानं न क्रियते। तेन नित्य-नैमित्तिककर्माणि काम्यकर्माणीति वक्तुं न शक्यते।

विशेष की प्राप्ति नहीं होती। कुछ लोग पापक्षय रूप फल को मानते हैं, क्योंकि कहा गया है कि नित्य तथा नैमित्तिक कर्मों के अनुष्ठान से दुरित (पाप) का क्षय (विनाश) होता है। इन वाक्यों के द्वारा प्रत्यवाय-निवृत्ति ही फल रूप से श्रूयमाण है। यदि कहा जाय कि ऐसा मानने पर फल-युक्त कर्म होने के कारण ये सभी काम्य कर्म हो जायेंगे, क्योंकि काम्यकर्म में ही फल का श्रवण होता है। परन्तु यह कहना ठीक नहीं है। कारण यह है कि इन कर्मों का कामनापूर्वक अनुष्ठान नहीं होता है। प्रत्येक विधि-वाक्यों में फलकाम अर्थात् फल की इच्छा से युक्त पुरुष को उद्देश्यकरके उस वाक्य से प्रतिपादित फल के साधन रूप से विधान नहीं किया गया है। अतः नित्य तथा नैमित्तक कर्मों में काम्यत्व की प्राप्ति नहीं हो सकती।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

काम्यकर्मणस्त्रैविध्यम्।

(६२) काम्यमपि कर्म त्रिविधम्—केवलम् ऐहिक-फलकम्, आमुष्मिकफलकम्, ऐहिकामुष्मिकफलकञ्चेति ।

(६३) तत्राद्यं यथा—कारीर्यादि । तत्तत्समयवर्ति-शुष्यत्सस्यसञ्जीवनहेतुवृष्टिकामिना क्रियते, न कालान्तर-भाविवृष्टिकामेन, जन्मान्तरीयवृष्टिकामेन वा ।

---

(६२) **काम्यमिति**। फलमुद्दिश्य यत् कर्म विहितं भवति, तत् '**काम्यकर्म**' इत्युच्यते । यथा 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्यादि । तत् काम्यं कर्म त्रिविधमस्ति । (१) केवलमस्मिन् जन्मनि फलदायकम् । (२) केवलं अन्यजन्मनि फलदायकम् । (३) अस्मिन् जन्मनि अन्यस्मिन् जन्मनि च फलदायकमिति । अमुष्मिन् भवति इति आमुष्मिकम् । अदसो विप्रकृष्टार्थप्रतिपादकत्वात् परलोकार्थप्रतीतिः । इदमादिसर्वनाम्नामर्थबोधिकाः कारिकाः—

इदमस्तु सन्निकृष्टं (इदमः समक्षरूपं) समीपतरवर्ति चैतदोरूपम् ।
अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात् ॥

(६३) **तत्रेति**। तत्र प्रथमस्य उदाहरणम्—'कारीरी'इष्टिः इत्यादि । शुष्कतामिवप्राप्तं धान्यक्षेत्रं पुनः सञ्जीवयितुमिच्छता इयं 'कारीरी'

---

(६२) नित्य और नैमित्तिक कर्म का स्वरूप बताने के बाद काम्य-कर्म के स्वरूप तथा भेद बताये जा रहे हैं। जब किसी प्रकार की कामना की पूर्त्ति के लिये किसी कर्म का अनुष्ठान किया जाता है, उसे काम्य कर्म कहते हैं। उसके विध्यात्मक वाक्य में फल का निर्देश अवश्य रहता है। वह काम्य कर्म तीन प्रकार का होता है—केवल ऐहिकफलक, आमुष्मिकफलक तथा ऐहिकामुष्मिकफलक ।

(६३) जिस कर्म का फल केवल इसी लोक में भोगने के योग्य होता है, परलोक में उसका कोई फल नहीं होता, उसे केवल

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

केवलामुष्मिकफलकं, यथा—स्वर्गाद्यर्थं दर्शपूर्णमासादिकम् । स्वर्गस्य इहलोकभोग्यत्वाभावात् ।

ऐहिकामुष्मिकसाधारणफलकं यथा—'वायव्यं श्वेतमालभेत भूतिकामः' इति भूत्यादिफलकमित्यन्यत्र विस्तरः।

वेदस्यालौकिकार्थबोधकत्वम् ।

इष्टिः अनुष्ठीयते । कालान्तरे वृष्टिः भवतु अथवा जन्मान्तरे वृष्टिर्भवतु इतीच्छया इयं 'कारीरी' इष्टिः न केनापि अनुष्ठीयते । (२) जन्मान्तरे फलदायकस्य काम्यकर्मणः उदाहरणम्—स्वर्गफलप्राप्तीच्छया अनुष्ठीयमानो 'दर्शपूर्णमासयागः इत्यादि । अस्य यागस्य यत् स्वर्गरूपं फलं, तत् इहजन्मनि अस्मिन् लोके न लभ्यते केनापि । (३) इहजन्मनि (अस्मिन्नेव जन्मनि) परजन्मनि वा यत् फलं संभवितुमर्हति, तादृशस्य काम्यकर्मणः उदाहरणम्—'वायव्यं श्वेतमालभेत भूतिकामः' इत्यादिवाक्येन विहितं यत् ऐश्वर्यादिजनकं कर्म तत् । एतद्विषयस्य विवेचनं ग्रन्थान्तरेषु विस्तरेण उपलभ्यते ।

ऐहिकफलक कर्म कहते हैं, जैसे—कारीरी इष्टि आदि । इस इष्टि का तत्तत् समय में सूखती हुई फसलों को जिलाने के लिये वृष्टि के इच्छुक के द्वारा उनुष्ठान किया जाता है, कालान्तर में होने वाली वृष्टि की इच्छा अथवा जन्मान्तर (दूसरे जन्म) में होने वाली वृष्टि की इच्छा से नहीं ।

जो कर्म केवल परलोक में ही फल देने वाले होते हैं, इस लोक में कोई फल दिखाई नहीं देता, उसे केवलामुष्मिकफल कर्म कहते हैं, जैसे—स्वर्ग आदि फल को देनेवाले दर्शपूर्णमासादि याग । उनका फल स्वर्ग है और उस स्वर्ग का इस लोक में भोग नहीं किया जा सकता । वह एकमात्र परलोक-भोग्य ही है । इसलिये इसको 'केवलामुष्मिक' कर्म कहते हैं ।

जो कर्म इस लोक तथा परलोक में होने वाले फलों के सम्पादक

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(६४) ननु दर्शपूर्णमासादिकर्मणां व्रीह्यादिद्रव्याणाञ्च प्रत्यक्षत्वेन लौकिकत्वात् कथं वेदस्यालौकिकार्थबोधकत्वमिति चेन्न। कर्मणां प्रत्यक्षत्वेऽपि तेषां स्वर्गादिफलसाधनत्वमप्रत्यक्षमिति 'तत्फलसाधनतया तत् कर्म कर्तव्यम्' इत्येवं फलसाधनतया कर्मकर्त्तव्यताबोधकस्य वेदस्या-

---

(६४) नन्विति। प्रत्यक्षादिप्रमाणैर्ज्ञातुमशक्ययोः अतएव अलौकिकयोर्धर्माधर्मयोर्विषये वेदाः प्रमाणमिति पूर्वं प्रतिपादितम्। तत्र एवं शंका उत्पद्यते—दर्शपूर्णमासादिकर्माणि व्रीह्यादिद्रव्याणि च सर्वेषां प्रत्यक्षत्वात्, तानि लौकिकान्येव। तथा सति तेषाम्प्रतिपादको वेदः अलौकिकार्थस्य प्रतिपादकः (बोधकः) इति कथं वक्तुं शक्यते ? तत्रोत्तरमिदं दीयते—यद्यपि दर्शपूर्णमासादिकर्माणि प्रत्यक्षाणि तथापि 'तानि कर्माणि, स्वर्गादिफलस्य साधनभूतानि' इत्ययमर्थः अप्रत्यक्ष एव। इति हेतोः 'तस्य अप्रत्यक्षस्य फलस्य इदं कर्म साधनमितिबुद्ध्या इदंकर्म अनुष्ठेयम्' इतिरीत्या फलसाधनत्वेन कर्मणां कर्तव्यताप्रतिपादकस्य वेदस्य अलौकिकार्थबोधकत्वमस्त्येव। अयमभिप्रायः—कर्मणो यः फलसाधनत्वाकारः' सः अप्रत्यक्ष एव, तत्प्रतिपादकत्वेन वेदस्य अलौकिकार्थबोधकत्वमक्षतमेवेतिध्येयम्। तथैव व्रीह्यादिद्रव्याणां यत् यागादिक्रियो-

---

होते हैं, वे उभयसाधारण होने के कारण 'ऐहिकामुष्मिक' कर्म कहे जाते हैं। जैसे—'भूति (ऐश्वर्य) को चाहने वाला पुरुष वायुदेवताक श्वेत पशु का आलम्भन करे' इत्यादि से विहित भूत्यादि-फलक याग का विधान है। इसके अनुष्ठान से इस लोक में ऐश्वर्य की प्राप्ति होती है, तथा परलोक में स्वर्ग-सुख मिलता है। अतः दोनों लोकों में फलविशेष की प्राप्ति होने के कारण इस कर्म को 'ऐहिकामुष्मिक फलक' कर्म कहते हैं। मीमांसा के ग्रन्थों में ये सभी बातें विस्तृत रूप से वर्णित हैं।

(६४) शङ्का—दर्शपूर्णमास आदि कर्म तथा उसके साधक व्रीहि आदि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लौकिकार्थबोधकत्वात् । एवं व्रीह्यादीनां यागादिक्रिया-साधनत्वं न प्रत्यक्षवेद्यमिति तद्बोधकस्यापि वेदवाक्यस्या-लौकिकार्थबोधकत्वमिति न दोषः ।

विधिवाक्यस्य विधायकत्वविचारः

(६५) इदानीं विधिवाक्यस्य विधायकत्वप्रकारः कथ्यते-

त्पादकत्वमुक्तं तदपि प्रत्यक्षादिलौकिकप्रमाणैः अनवगतमस्ति, तेन तद्बोधको वेदः, अलौकिकार्थबोधक एवेति वेदस्य अलौकिकार्थबोधकत्व-मभ्युपगन्तुं न किमपि बाधकम् ।

(६५) इदानीमिति । विधिवाक्यनिरूपणानन्तरं नामधेयनिरूपणात् पूर्वम् विधिवाक्यस्य विधायकत्वं विधिबोधकत्वं केन प्रकारेण भवति, तत् अभिधीयते 'विधायकत्वप्रकार' इति । केन अंशेन कस्य अर्थस्य उपस्थितिर्भूत्वा कीदृशः अर्थबोधः भवति, तेन च कर्मणि पुरुषस्य प्रवृत्तिर्भवतीति कथयतीत्यर्थः । वाक्ये प्रत्ययार्थस्यैव प्राधान्यात्

द्रव्य प्रत्यक्ष हैं अर्थात् प्रत्यक्ष-प्रमाण से ज्ञात हैं । प्रत्यक्ष-प्रमाण के विषय होने के कारण वे कर्म और द्रव्य लौकिक होंगे; क्योंकि लौकिक पदार्थों के साथ ही इन्द्रियों का सन्निकर्ष बनता है । वेदों से इन पदार्थों का ज्ञान होता है । अतः वेद अलौकिक पदार्थ का बोधक कैसे हो सकता है ?

समाधान--कर्म तथा द्रव्य प्रत्यक्ष होने पर भी उन दोनों का साध्यसाधनभाव प्रत्यक्ष नहीं है । दर्शपूर्णमास आदि कर्म साधन हैं और स्वर्ग आदि फल साध्य हैं--इसका ज्ञान प्रत्यक्ष-प्रमाण से नहीं हो सकता है । इन दोनों का यह साध्यसाधनभाव अप्रत्यक्ष अर्थात् अलौकिक है । इसका ज्ञान एकमात्र वेद से ही होता है, अन्य किसी प्रमाण से नहीं । इसलिये वेदों में अलौकिक-पदार्थ-बोधकता है । लौकिक व्यवहार में कर्म प्रत्यक्ष होता है; तथापि साध्यसाधनभाव अप्रत्यक्ष ही है । इसी प्रकार व्रीहि आदि द्रव्यों में यागादि क्रिया की साधनता प्रत्यक्षवेद्य (प्रत्यक्ष-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्र 'स्वर्गकामो यजेत' इत्यत्र यजिधातोरुपरितने 'त' प्रत्यये धर्मद्वयमस्ति—आख्यातत्वं लिङ्त्वं चेति। तत्र आख्यातत्वं सर्वलकारसाधारणं तदवच्छेदेन लिङ्प्रत्ययः पुरुषप्रवृत्तिरूपाम् आर्थभावनां प्रतिपादयति।

तस्यार्थं प्रथमतः कथयति—'तत्रेति।' विधिवाक्यान्तर्भूतेषु अंशेषु इत्यर्थः। 'स्वर्गकामो यजेत' इत्यस्मिन् विधिवाक्ये 'यज्' धातूत्तरवर्तिनि 'त' प्रत्यये द्वौ धर्मौ—(१) आख्यातत्वं (२) लिङ्त्वं च स्तः। तत्र 'आख्यातत्व' धर्मः दशसु लकारेषु समान (एक) एव। तेन 'आख्यातत्व' धर्मेण युक्तो 'लिङ्प्रत्ययः' पुरुषप्रवृत्तिरूपां अर्थभावनां प्रतिपादयति। अयमभिप्रायः—'त' प्रत्ययगतमाख्यातत्वं सर्वलकारसाधारणम्। व्याकरणकारेण भगवता पाणिनिना भिन्न-भिन्नक्रियाणां भूतभविष्यत्, वर्त-

---

प्रमाण से जानने के योग्य) नहीं है। इसलिये उस साध्यसाधनभाव के बोधक वेद-वाक्य अलौकिक अर्थ के बोधक होते हैं। अतः वेदों को अलौकिक पदार्थ का बोजक मानने में कोई दोष नहीं है।

(६५)। बोधकता को बताकर विधि-वाक्यों के विधायकत्व-प्रकार का निरूपण करते हैं। उन विधि-वाक्यों में "स्वर्गकामो यजेत" यह भी एक विधि-वाक्य है। इसमें "यजेत" यह क्रिया पद है। इसमें दो भाग है—"यज्" धातु और "त" प्रत्यय। 'यज्' धातु से लिङ् लकार में आत्मनेपदी "त" प्रत्यय आने पर 'यजेत' पद निष्पन्न होता है। 'यज्' धातु का अर्थ याग है। तिप्, तस् आदि अठारहों प्रत्ययों को आख्यात कहते हैं। 'त' प्रत्यय लिङ् लकार के स्थान में आया है। इसलिये स्थानी में रहने वाला लिङ्त्व धर्म का 'त' प्रत्यय में अतिदेश होता है। इस प्रकार 'त' प्रत्यय में लिङ्त्व धर्म रहता है। वह स्वरूपतः आख्यात है। इसलिये उसमें आख्यातत्व नाम का धर्म स्वाभाविक रूप से रहता है। निष्कर्ष यह हुआ कि 'यज्' धातु के अव्यवहितोत्तरप्रत्ययुक्त 'त' प्रत्यय में दो धर्म रहते हैं—आख्यातत्व और लिङ्त्व। अठारहों

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्रार्थी भावना

(६६) सा चार्थभावना किं, केन, कथमिति अंशत्रय-विशिष्टा। तथाहि—यजेत इत्यत्र प्रथमं प्रत्ययेन 'भावयेद्' इति प्रतीयते। सुबन्ताभिहितानां सर्वेषां कारकाणां तिङन्तार्थ-क्रियान्वयनियमे सति तिङन्तार्थस्य प्राधान्यात्। तत्रापि प्रकृत्यर्थापेक्षया प्रत्ययार्थस्य प्राधान्यात् प्रथमं प्रत्ययार्थ-भावनाया उपस्थितिर्युक्ता। ततः करोतिसमानार्थक-भावयतेः सकर्मकत्वात् 'किम्भावयेत्' इति कर्म्माकाङ्क्षायां भिन्नपदोपात्तोऽपि स्वर्गो भाव्यत्वेनान्वेति। भाव्य-त्वेन कर्मत्वेनेत्यर्थः, साध्यत्वेनेति यावत्। न तु समान-

---

मानेतित्रयाणां कालानां बोधनाय तथा आज्ञार्थ-विध्यर्थ-संकेतार्थाशीर्वादादीनामर्थानां बोधनाय च दश लकाराः निर्दिष्टाः सन्ति। तथाहि—(१) लट्, (२) लिट्, (३) लुट्, (४) लृट्, (५) लेट्, (६) लोट् (७) लङ्, (८) लिङ्, (९) लुङ्, (१०) लृङ्—एषां दशानां प्रत्येकं 'ल' वर्णघटितत्वात् इमे 'लकारा' इत्युच्यन्ते। तदवच्छेदेनेति तेन अवच्छेदः-तदवच्छेदः। अवच्छेदो नाम विशेषणम्। आख्यातत्वेन विशेषितः अर्थात् आख्यातत्वेन रूपेण ज्ञातः लिङ्प्रत्ययः आर्थभावनाम्प्रतिपादयति, सा च पुरुषप्रवृत्तिरूपा।

लिङ् प्रत्ययों का आख्यात शब्द से व्यवहार होने के कारण आख्यातत्व धर्म सर्वलकारसाधारण अर्थात् सभी लकारों में रहता है और उस आख्यातत्व के द्वारा लिङ् स्थानीय 'त' प्रत्यय पुरुष-प्रवृत्ति रूप आर्थी भावना का प्रतिपादन करता है। पुरुष की प्रवृत्ति को ही "आर्थीभावना" कहते हैं।

(६६) वह आर्थीभावना 'किं', 'केन' तथा 'कथम्' इन तीन अंशों से युक्त होती है, उदाहरण—मीमांसकों के मत में आख्यात प्रत्यय का अर्थ भावना और प्रकृति (यज्) का याग आदि अर्थ होता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पदोपात्तोऽपि धात्वर्थो भाव्यत्वेनान्वेति। दुःखात्मकस्य यागस्य ईप्सिततमत्वरूपकर्मत्वायोग्यत्वात्। स्वर्गस्य त्वानन्दात्मत्वेन ईप्सिततमतया कर्मत्वेनान्वययोग्यत्वात्। ततश्च 'स्वर्गं भावयेद्' इति बोधो भवति। ततः 'केन' इति करणाकाङ्क्षायां समानपदोपात्तो यागः करणत्वेनान्वेति—'यागेन स्वर्गं कुर्याद्' इति। ततः 'कथं यागेन स्वर्गं कुर्याद्' इति कथम्भावाकाङ्क्षायाम्—अग्न्यन्वाधानावहननादिजन्य दृष्टोपकारेण प्रयाजादिजनितादृष्टोपकारसहितेन यागेन

---

(६६) साचेति। तस्या आर्थभावनाया स्त्रयः अंशाः सन्ति—किम्, केन, कथम् इति। अनेन अंशत्रयेण सा विशिष्टा बोद्धव्या। तथाहि—'यजेत' इति श्रुते प्रथमं तद्गतेन 'प्रत्ययत्व' रूपेण धर्मेण 'भावयेत् = कुर्यात्, सम्पादयेत्' इत्यर्थः प्रतीयते। यतो हि सुबन्तपद-बोधितानां सर्वेषां कारकाणां अन्वयः तिङन्तपदेन बोधिताया क्रियाया कर्तव्यः इति नियमोऽस्ति। कारकाणां क्रिययैवान्वय इति भावः। तेन तिङन्तार्थस्यैव प्राधान्यं प्रतीयते। 'तिङ्' प्रत्ययः अन्ते यस्य तत् तिङन्तं पदं, तस्येत्यर्थः। तिङन्तार्थश्चासौ क्रिया च तस्यामन्वयः। तत्रापि प्रकृत्यर्थापेक्षया प्रत्ययार्थस्यैव प्राधान्यात् प्रथमं प्रत्ययार्थभावनाया

है। इसलिये 'यजेत' इस पद में प्रयुक्त 'त' प्रत्यय का 'भावयेत्' अर्थात् 'उत्पादन करे'—यह अर्थ होता है। सुबन्त से प्रतिपादित सभी कारकों का तिङन्तार्थ (क्रिया) में अन्वय होता है—ऐसा नियम है। इस नियम के अनुसार तिङन्तार्थ (क्रिया) की प्रधानता होती है; क्योंकि प्रधान में ही अन्य पदार्थों का अन्वय होता है। इसलिये सर्वप्रथम आख्यात प्रत्यय के अर्थभावना की उपस्थिति युक्तिसङ्गत है। सुबर्थ ही कारक होता है; परन्तु केवल सुप् का प्रयोग व्युत्पत्तिसिद्ध नहीं है; क्योंकि "न केवला प्रकृतिः प्रयोक्तव्या, नाऽपि केवलः प्रत्ययः" ऐसा नियम है। इसी-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वर्गं कुर्यादिति अग्न्यन्वाधानप्रयाजादिकमङ्गजातम् इति-कर्तव्यतात्वेनाऽन्वेति। कथम्भावाकाङ्क्षापूरकत्वमितिकर्तव्य-तात्वम्। यथा-'ओदनकामः पचेत्' इत्यत्र लिङा भावना प्रतीयते। किं भावयेदित्याकाङ्क्षायाम् ओदनो भाव्यत्वेना-न्वेति, केनेत्याकाङ्क्षायां पाकेनेति लभ्यते। कथमित्या-काङ्क्षायां तृणफूत्कारसहितेनेति। ततश्च तृणफूत्काराद्युपकृतेन पाकेन (तेजःसंयोगेन) ओदनम्भावयेदिति वाक्यार्थः सम्प-द्यते। तद्वद्वेदेऽपि बोध्यम्।

उपस्थितिरुचितैव। तदनन्तरं तस्यां भावनायां 'कृ' धातुना समानार्थकः यः 'भावि' (णिजन्तो भू धातुः) धातुः, तस्य सकर्मकत्वात् 'किं भावयेत्' = किं कुर्यात्, किं सम्पादयेत् इति कर्म = साध्यं आकांक्षितं भवति। तदा तिङन्तपदात् पृथक् स्थितेन 'स्वर्गकाम' इति सुबन्तपदेन बोधितो यः 'स्वर्गः' स तत्र कर्मत्वेन (कर्मरूपेण) 'भाव्यत्वेन' सध्यत्वनेतियावत् अन्वितो भवति। यद्यपि 'यजेत' इत्येकेन-पदेन उपस्थितोऽपि धात्वर्थो यागः, तथापि तस्य कर्मत्वेनान्वयो न भवति। यतो हि यागात्मकं कर्म कष्टात्मकम्। तेन तत् ईप्सिततमात्मकं

लिये ग्रन्थकार ने सुबन्तार्थ को कारक माना है। 'करोति' अर्थात् 'कृञ्' धातु तथा 'भावयति' अर्थात् णिजन्त 'भावि' धातु दोनों समान (एक) अर्थ के प्रतिपादक हैं। इसलिये 'भावि' धातु भी सकर्मक हो जाता है। स्वरूपतः 'भू' धातु अकर्मक है। 'भावि' धातु सकर्मक हो जाने के कारण 'किं भावयेत्' अर्थात् किस वस्तु की भावना करे—इस प्रकार कर्म की आकांक्षा होती है। इस कर्मविषयिणी अकांक्षा की शान्ति के लिये भिन्न पद से प्रतिपादित रहने पर भी स्वर्ग उस भावना में साध्य (कर्म) रूप से अन्वित होता है। 'भाव्य' का अर्थ 'कर्म' या 'साध्य' है: ये तीनों शब्द एक ही अर्थ से प्रयुक्त होते हैं।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कर्म नैव भवितुं शक्नोति। किन्तु स्वर्गस्य आनन्दरूपत्वात् स एव ईप्सिततमो (अत्यन्तमिष्टतमः) भवति। अतः तस्यैव कर्मत्वेन (साध्यत्वेन) प्रत्ययार्थभावनायाम् अन्वययोग्यता अस्ति। ततश्च 'स्वर्गं भावयेत्', (स्वर्गं सम्पादयेत्) इति अर्थबोधो भवति। अयं भावः—**भिन्नपदोपात्तोऽपीति**। 'यजेत' इति भावनावाचकपदात् भिन्नं यत् 'स्वर्गकामः' इति पदं, तेनोपस्थितोऽपि 'स्वर्गः' साध्यत्वेनान्वितो भवति। मीमांसादर्शनस्य षष्ठाद्यधिकरणे 'यजेत स्वर्गकामः' इति वाक्यमवलम्ब्य साध्यं यागः स्वर्गो वेति संशय्य भावनायाः भाव्यरूप-कर्माकांक्षायां सत्यां यः शीघ्रमुपस्थितो भवेत् तस्यैव प्रथममन्वयः करणीय इत्येवोचितं भवेत्। विलम्बेन उपस्थीयमानस्य पदार्थस्य अन्वयकरणं नोचितम्। इतिनियमानुरोधेन भावनावाचक'यजेते'ति पदे 'यज' इति प्रकृत्या उपस्थाप्यमानो याग एव शीघ्रमुपस्थितो भवति, तेन स एव साध्यत्वेनान्वययोग्यो भवितुमर्हति, न स्वर्गः। यतो हि स (स्वर्गः) भिन्नपदेन प्राप्तः। अतो यागस्यैव साध्यत्वेना-

---

समानपद से प्रतिपादित रहने पर भी धात्वर्थ याग का क्रिया में साध्य रूप से अन्वय नहीं होता है; क्योंकि याग क्रिया है। "कष्टं कर्म" इस न्याय से वह दुःखात्मक होता है। दुःखात्मक वस्तु ईप्सित भी नहीं होती, तो ईप्सिततम कैसे होगी? उसमें ईप्सिततमत्व न रहने के कारण साध्यत्व की योग्यता ही नहीं रहती। इसलिए याग का साध्यरूप से भावना में अन्वय नहीं हो सकता। स्वर्ग आनन्द रूप है, सुख रूप है। साधारण लौकिक सुख मनुष्य को ईप्सित होता है, तो आनन्दातिशय रूप स्वर्ग अवश्य ही ईप्सिततम होगा। इसलिए उसमें साध्य होने की योग्यता रहती है और क्रिया में उसका साध्यरूप से अन्वय होता है। स्वर्ग का साध्यरूप से अन्वय हो जाने के बाद 'स्वर्गं भावयेत्' अर्थात् स्वर्ग की भावना (सम्पादन) करे—ऐसा शाब्दबोध होता है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न्वयः कर्तव्य इति पूर्वपक्षः कृतः। तं मनसि कृत्वा ग्रन्थ-कारेण 'भिन्नपदोपात्तोऽपी'ति सिद्धान्तः सूचितः। **ईप्सिततमत्वरूप-कर्मत्वेति**। व्याकरणशास्त्रे 'कर्तुरीप्सिततमं कर्म' (१।१।४७) इति सूत्रम्। कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं भवतीति तस्यार्थः। ईप्सिततमत्वस्य शास्त्रीयरीत्या लक्षणमिद भवति। तथाहि—'प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रय-त्वेनोद्देश्यत्वयोग्यताविशेषशालित्वम्।' यथा—हरिं भजति।

ततश्चेति। स्वर्गस्य साध्यत्वेन अन्वये कृते सतीत्यर्थः। इत्थं भावनाया भाव्यांशो वर्णितः। तदनन्तरं करणांशं निरूपयितुं 'तत' इति। स्वर्गात्मकस्य फलस्य भाव्यत्वेन (साध्यत्वेन) अन्वये कृते भावनाया भाव्याकांक्षायां शान्तायां 'स्वर्गं भावयेत्' इति अर्थबोधो भवतीति। तदनन्तरं 'केन' इति तृतीयान्तपदेन साधनात्मकद्वितीयांशस्य आकांक्षा भवति। तदा 'यजेत' इति पदे धात्वर्थस्य 'यागस्य' करणत्वेन भावनायामन्वये कृते सति 'यागेन स्वर्गं भावयेत्' इति अर्थबोधो भवति।

साध्याकांक्षा की शान्ति हो जाने पर "केन भावयेत्" अर्थात् किस साधन से स्वर्ग की भावना करे—इस प्रकार करण (साधन) की आकांक्षा होने पर एक-पद-प्रतिपादित याग कारण रूप से भावना में अन्वित होता है। इस तरह उस भावना की करणाकांक्षा की शान्ति हो जाती है। उसके बाद 'यागेन स्वर्गं भावयेत्' अर्थात् यागरूप साधन से स्वर्गकर्मक (स्वर्गसाध्यक) भावना करे—यह शाब्दबोध होता है। उसके बाद 'कथं यागेन स्वर्गं कुर्यात्' अर्थात् याग से स्वर्ग की भावना कैसे करें—इस प्रकार की कथम्भावाकांक्षा होती है। इसी को 'इतिकर्त्तव्यताकांक्षा' भी कहते हैं। इससे कर्तव्य (अनुष्ठेय) यागादि के इति (प्रकार) की जिज्ञासा होती है। इस आकांक्षा को दूर करनेके लिए अन्वाधान तथा प्रयाज आदि अङ्ग-समूह का भावना में इतिकर्तव्यता रूप से अन्वय होता है। इसी तरह इसके अनन्तर

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदनन्तरं 'कथं (केन प्रकारेण) स्वर्गं कुर्यात्' इति कथंभावस्य (इतिकर्तव्यतायाः) आकांक्षा उत्पद्यते। तदा अग्नेः अन्वाधानं कृत्वा अवहननादिकं च कृत्वा दृष्टमुपकारं सम्पाद्य तथैव प्रयाजादीनामनुष्ठानेन अदृष्टमुपकारं सम्पाद्य 'तत्सहितेन यागेन स्वर्गं सम्पादयेत्' इत्यर्थस्य प्रतीतिर्भवति। ततश्च अग्न्यन्वाधान—प्रयाजादीनामङ्गानां इतिकर्तव्यतारूपेण भावनायामन्वयो भवति। यैरङ्गैः कथंभावाकांक्षा शान्ता भवति तान्येवांगानि 'इतिकर्तव्यता' शब्देनोच्यन्ते। कर्तव्यस्य 'इति' प्रकारः इतिकर्तव्यं, तस्य भावः इतिकर्तव्यता। यथा—'ओदनकामः पचेत्' ओदनेच्छुना पुरुषेण पाकः कर्तव्यः। अस्मिन् वाक्ये लिङ्त्वधर्मेण भावनायाः प्रतीतिर्भवति। तथाहि—'किं भावयेत्' (किं कर्तव्यम्) इति साध्याकांक्षायां सत्यां 'ओदनम्' इति भाव्यत्वेन (साध्यत्वेन) भावनायामन्वितं भवति। 'केन' (केन साधनेन) इत्याकांक्षायां

अग्न्यन्वाधान तथा अवहनन आदि से उत्पन्न अपूर्व-जनित उपकार तथा प्रयाज आदि से उत्पन्न अपूर्व-जनित उपकार से युक्त याग के द्वारा स्वर्ग की भावना करे—यह शाब्दबोध सम्पन्न होता है। कथम्भावाकांक्षापूरकत्व ही इतिकर्त्तव्यता का इतिकर्त्तव्यतात्व है। इतिकर्त्तव्यता को बता देने पर 'कथं कुर्यात्' इस प्रकार की कथम्भावाकांक्षा की शान्ति हो जाती है। इस प्रकार तीनों आकांक्षाओं की शान्ति हो जाने पर मनुष्य कर्त्तव्य-कार्य के प्रति प्रवृत्त हो जाता है। जब तक इनमें से एक की भी शान्ति अवशिष्ट रह जाती है, तब तक मनुष्य की यागादि में प्रवृत्ति नहीं होती है। स्पष्ट-ज्ञान के लिए लौकिक उदाहरण को प्रस्तुत करते हैं, जैसे—'ओदनकामः पचेत्' इत्यादि। इस वाक्य में प्रयुक्त लिङ् से भावना का ज्ञान होता है। उसके बाद भावना का 'किं भावयेत्' से साध्य की आकांक्षा होती है, तब ओदन पदार्थ को साध्य (कर्म) रूपसे भावना में अन्वय होता है। जब 'केन भावयेत्' से करणविषयिणी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शाब्दी भावना ।

(६७) स एव लिङ्प्रत्ययो लिङ्त्वावच्छेदेन शब्दभावनां प्रेरणाख्यामभिधत्ते । लोकेऽपि 'गामानय' इत्याचार्य्य-

---

सत्यां 'पाकेन' पचनेन इत्यर्थेन करणाकांक्षा शान्ता (पूर्णा) भवति । तदनन्तरं 'कथम्' केन प्रकारेण कया रीत्येतियावत् । इति कथंभावाकांक्षायां सत्यां तृणकाष्ठसंयोजनफूत्कारादिकं विधाय इत्यर्थः प्रतीयते । एवं च 'तृणफूत्कारादिभिरंगैरुपकृतेन पाकेन ओदनं भावयेत्' इति वाक्यार्थः सिध्यति । तद्वत् वेदेऽपि 'यजेत' इत्यत्र विज्ञेयम् । एतावता एतदुक्तं भवति—'यजेत' इत्यत्र यज्धातूत्तरवर्तिनि 'त'-प्रत्यये धर्मद्वयम्, तत्रापि आख्यातत्वधर्मेण कोऽर्थोऽभिप्रेत इत्यादि निरूपितम् । इत्थं अंशत्रयविशिष्टाया आर्थभावनाया वाक्यार्थः प्रतिपादितः ॥

(६७) स एवेति इदानीं शाब्दभावनां निरूपयति—'स एव लिङ्प्रत्यय' इति । स लिङ्प्रत्यय एव ('त'प्रत्यय एव) लिङ्त्वेन रूपेण

आकांक्षा होती है, तब समान-पदोपात्त पाक का करण रूप से भावना में अन्वय होता है । तेजः संयोग को ही पाक कहते हैं । उसके वाद जब 'कथं भावयेत्' से कथम्भावाकांक्षा होती है, तब तृण, फूत्कार आदि का इतिकर्त्तव्यतारूप से भावना में अन्वय होता है । इस प्रकार तीनों आकांक्षाओं की शान्ति होती है इसके अनन्तर 'तृणफूत्कार आदि से उत्पन्न हुए उपकार से युक्त पाक के द्वारा ओदन रूप साध्य की भावना करे'—यह समुदित शाब्दबोध सम्पन्न होता है । इस लौकिक वाक्य के समान ही वैदिक वाक्यों में समुदित शाब्दबोध समझना चाहिए ।

(६७) वही लिङ्लकारीय 'त' प्रत्यय लिङ्त्वरूप धर्म के द्वारा प्रेरणा नामक शाब्दीभावना का अभिधान करता है । ग्रन्थकार पहले

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाक्यश्रवणानन्तरम् 'अयमाचार्यो मां गवानयने प्रेरयति' इति प्रेरणाख्यव्यापारं ज्ञात्वैव शिष्यो गवानयने प्रवर्त्तत इत्यन्वयव्यतिरेकाभ्यां प्रेरणाज्ञानं प्रवृत्तिकारणम्। प्रेरणाज्ञानस्य चान्वयव्यतिरेकाभ्यां लिङादिश्रवणजन्यत्वावधारणात् लिङादेः प्रेरणायां शक्तिर्लोके गृह्यते इति वेदेऽपि तत्रैव

प्रेरणात्मिकां शाब्दभावनां प्रतिपादयति। लोकव्यवहारेऽपि 'गाम् आनय' इत्यादि गुरुवाक्यं श्रुत्वा शिष्यः स्वमनसि विचारयति यत् मदीयो गुरुः 'गामानय' इति वाक्येन गामानेतुं मां प्रेरयति। ईदृशं प्रेरणारूपं व्यापारं ज्ञात्वैव शिष्यो गामानेतुं प्रवृत्तो भवति। एवं च 'लिङादीनां श्रवणे सति प्रेरणाज्ञानं भवति, लिङादीनां श्रवणाभावे सति प्रेरणा-

---

लौकिक उदाहरण प्रस्तुत करके स्पष्ट-ज्ञान कराना चाहते हैं। उनका कहना है कि लोक में भी माणवक अपने आचार्य के द्वारा प्रयुक्त 'गामानय' अर्थात् 'गाय को ले आओ'—इस वाक्य को सुनता है। उसके बाद माणवक (बालक) समझता है कि 'ये मेरे हितैषी आचार्य मुझे गाय लाने के लिए प्रेरित करते हैं'। माणवक इस प्रेरणा नामक व्यापार को जान कर ही गवानयन रूप क्रिया में प्रवृत्त होता है। जब माणवक को प्रेरणात्मक ज्ञान नहीं था, तब गवानयन में उसकी प्रवृत्ति नहीं थी और जब आचार्य के द्वारा माणवक को गवानयन-विषयिणी प्रेरणा का ज्ञान हो जाता है, तब उसकी प्रवृत्ति होती है। इस प्रकार अन्वयव्यतिरेक के द्वारा प्रवृत्ति के प्रति प्रेरणा-ज्ञान की कारणता सिद्ध होती है। प्रेरणा-ज्ञान (शाब्दी भावना) कारण है और प्रवृत्ति (आर्थीभावना) कार्य (साध्य) है।

इसी प्रकार के अन्वय-व्यतिरेक के द्वारा लिङादि की प्रेरणा रूप अर्थ में शक्ति निश्चित होती है; क्योंकि जब लिङादि-घटित वाक्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शक्तिकल्पनौचित्यात्। इयांस्तु विशेषः—लोके गवानयनादिप्रवृत्त्यनुकूलः प्रेरणाख्यो व्यापारः प्रयोक्तृपुरुषगताभिप्रायविशेषः, वेदे तु प्रयोक्तृपुरुषाभावात् लिङादिशब्दनिष्ठ एव स इत्यङ्गीक्रियते। अत एव शब्दनिष्ठव्यापारत्वाच्छाब्दी भावनेत्युच्यते, यागहोमादिविषयकप्रवृत्तिहेतुत्वात् प्रवर्त्तना प्रेरणेति चोच्यते।

ज्ञानं न भवति। इति अन्वय-व्यतिरेकाभ्यां लिङ्श्रवणं प्रेरणाज्ञाने कारणमिति प्रतीयते। लिङ्घटितवाक्योच्चारणस्य अन्वयव्यतिरेकाभ्यां निश्चीयते यत् प्रेरणाज्ञानं लिङादिश्रवणेनैव भवति। अतः प्रेरणैव लिङादीनामर्थः। यस्य यत्र शक्तिः स एव तस्यार्थः इति नियमानुरोधेन लिङादेः प्रेरणायां शक्तिः इति जनैः विज्ञायते। तथैव वेदेऽपि प्रेरणैव लिङादीनामर्थः इत्यभ्युपगमः समुचित इति विज्ञेयम्। लोक-वेदयोरियान् विशेषः—लोकव्यवहारे तावत् गवानयनादिप्रवृत्तिजनकः प्रेरणाख्यो व्यापारः प्रेरक(प्रयोक्तृ)पुरुषमनोगतः

का श्रवण नहीं हुआ था, तब प्रेरणात्मक ज्ञान भी नहीं था और जब लिङादि-घटित वाक्य का श्रवण हुआ, तब उस वाक्य से प्रेरणात्मक ज्ञान भी सम्पन्न हुआ। इसलिए अन्वय-व्यतिरेक से यह निश्चित होता है कि लिङादि में प्रेरणा की वाचकता है। 'लिङादि' वाचक है और 'प्रेरणा' वाच्य है। इस प्रकार लौकिक वाक्यों में शक्ति का ग्रहण होता है। लौकिक वाक्यों के समान वैदिक वाक्यों में भी लिङादि में ही शक्ति की कल्पना करना समुचित है। लौकिक और वैदिक वाक्यों के सम्बन्ध में परस्पर भेद यह है कि लोक में गवानयन (गौ को ले आने की क्रिया) आदि की प्रवृत्ति के जनक 'प्रेरणा नाम का व्यापार' प्रयोजक पुरुष में रहने वाला अभिप्रायविशेष है। लौकिक वाक्यों में प्रयोजक कोई-न-कोई पुरुष होगा;

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(६८) सैषा शाब्दीभावनाऽपि अंशत्रयविशिष्टा । तत्र पुरुषप्रवृत्तिरूपाऽऽर्थभावना भाव्यत्वेनान्वेति । अध्ययना-

---

अभिप्रायविशेषो भवति। किन्तु वेदस्तावत् अपौरुषेयः। अतस्तत्र प्रवृत्तिकारयिता कोऽपि प्रेरकः (प्रयोक्तृ) पुरुषो नास्ति। तस्मात् लिङादिशब्देष्वेव प्रवृत्तिजनको व्यापारः तिष्ठति इति अंगीक्रियते। तस्य प्रेरणा(प्रवर्तना)ख्यस्य व्यापारस्य लिङादिशब्दनिष्ठत्वादेव स 'प्रेरणाख्यो व्यापारः' शाब्दभावनाशब्देन उच्यते। इयं शाब्दी भावनैव वैदिकयागहोमादिविषयेषु पुरुषं प्रेरयति प्रवर्तयतीतियावत्। सा शाब्दी भावना पुरुषप्रवृत्तौ कारणं भवति। तेन सा शाब्दी भावना, 'प्रवर्तना'—'प्रेरणा'शब्देनाऽपि उच्यते।

(६८) सैषेति। इयं शाब्दी भावनाऽपि अंशत्रयविशिष्टा भवति। तस्यां शाब्दभावनायां (१) पुरुषप्रवृत्तिरूपायाः आर्थभावनाया

क्योंकि पुरुष के बिना वाक्य का अभिप्राय ही उत्पन्न नहीं होगा। सभी वाक्य पुरुष-रचित होते हैं और पुरुष के अभिप्राय को ही वाक्य बताते हैं; किन्तु वेद-वाक्यों में प्रयोजक पुरुष नहीं होता; क्योंकि वैदिक-वाक्य किसी के द्वारा विरचित नहीं होते। वह तो अपौरुषेय, अनादि तथा नित्य है। पुरुष-रचित न होने के कारण उन वाक्यों में पुरुष का अभिप्राय सम्भव नहीं है। इसलिए प्रवृत्ति के जनक लिङादि शब्दों में ही प्रेरणा नाम का व्यापार रहता है और वही प्रेरक होता है। यह मीमांसक-सम्प्रदाय-सिद्ध सिद्धान्त है। वह व्यापार शब्द-निष्ठ है। अतएव वह 'शाब्दीभावना' के नाम से कही जाती है। याग-होमादि-विषयक प्रवृत्ति के हेतु होने के कारण वह शाब्दीभावना, प्रवर्त्तना एवं प्रेरणा शब्द से भी कही जाती है।

(६८) आर्थीभावना के समान शाब्दीभावना भी पूर्वोक्त तीनों अंशों से युक्त होती है। 'किं भावयेत्' रूप साध्य की अकांक्षा होने पर उसकी शान्ति के लिए पुरुष की प्रवृत्ति रूप आर्थीभावना

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वगतलिङादिकं करणत्वेनान्वेति। अर्थवादप्रतिपाद्यप्राशस्त्यज्ञानमितिकर्तव्यतात्वेनान्वेति। तथा च 'साङ्गवेदाध्येतारोऽधीतव्याकरणनिगमनिरुक्तादिवशाद् व्युत्पत्तिमन्तः पुरुषा अध्ययनगृहीतस्वाध्यायगतलिङादिभिः प्राशस्त्यज्ञानसचिवै-

---

भाव्यत्वेन (साध्यरूपेण) अन्वयो भवति। (२) अध्ययनेन अवगतानां लिङादीनां करणत्वेन (साधनरूपेण) अन्वयो भवति। (३) अर्थवादवाक्यैः प्रतिपादितस्य प्राशस्त्यज्ञानस्य इतिकर्तव्यतात्वेन (कथंभावरूपेण) अन्वयो भवति। तदा शाब्दभावनायाः शाब्दबोधस्य स्वरूपं इदं निष्पद्यते—'अंगसहितस्य वेदस्य अध्ययनकर्त्तारः पुरुषाः व्याकरण-निघण्टु-निरुक्तादीनां साहाय्येन 'अस्य पदस्य अयमर्थः' इति प्राप्तज्ञानाः सन्तः प्राशस्त्यज्ञानपूर्वकैः अध्ययनद्वारा विज्ञातस्वाध्याये—(अवगते वेदे) स्थितैः लिङादिभिः 'यागा-

---

भाव्य (साध्य) रूप से अन्वित होती है; क्योंकि शाब्दीभावना प्रेरणा रूप है और आर्थी भावना प्रवृत्ति रूप है। प्रेरणा-ज्ञान के पश्चात् ही प्रवृत्ति होती है। अतः वह (आर्थीभावना) उसका (शाब्दी भावना का) साध्य है।

जब 'केन भावयेत्' रूप करण की आकांक्षा होती है, तब 'स्वाध्यायोऽध्येतव्यः' इस अध्ययन-बोधक विधि-वाक्य से ज्ञात लिङादि का ज्ञान करण रूप से अन्वित होता है। उसके बाद जब 'कथं कर्त्तव्यम्' रूप कथम्भावाकांक्षा होती है, तब अर्थवादवाक्यों से उत्पन्न प्राशस्त्यादि-ज्ञान इतिकर्त्तव्यतारूप से भावना में अन्वित होता है। इस प्रकार शाब्दीभावना की 'आर्थीभावना' 'साध्य', 'लिङादि-ज्ञान' कारण तथा 'प्राशस्त्यादि-ज्ञान' इतिकर्त्तव्यता रूप है। उन तीनों अंशों से युक्त शाब्दी भावना का 'व्याकरणादि छः अङ्गों के साथ वेदों के अध्ययन करने वाले उन अङ्गों के अध्ययन के द्वारा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यागाद्यर्थं स्वकर्त्तव्यत्वेन बुद्ध्वा यागादीननुतिष्ठेयुः' इति शाब्दभावनाबोधः। अनुतिष्ठेयुः, अनुष्ठानं कुर्युरित्यर्थः। अनुष्ठानं प्रवृत्तिः। तेन पुरुषप्रवृत्तेः शाब्दभावनाभाव्यत्वमक्षतम्।

(६९) इयञ्च शाब्दभावना ज्योतिष्टोमादिप्रातिस्विकवाक्येषु स्वरूपेण प्रतीयमानाऽपि कर्त्तव्यत्वेन न प्रतीयते

दिकर्म' स्व-कर्तव्यमिति विज्ञाय तदनुष्ठानं (यागानुष्ठानं) कुर्युः।' 'निगमो' नाम—शब्दार्थमात्रबोधकानि 'यत्रान्या ओषधयो म्लायन्ते' इत्यादीनि वाक्यानि। 'स्वाध्यायो' नाम—स्वकुलपरम्पराप्राप्ता वेदशाखा। 'यागादीन्' इत्यत्र 'आदि'पदात् दान-होमादयो ग्राह्याः। अनुष्ठानं प्रवृत्तिरिति। 'अर्थभावना' हि 'अनुष्ठान'शब्दार्थः। तेन सा आर्थभावना, शाब्दभावनायां साध्यत्वेनान्वेतीति कथनमुचितमेव।

(६९) इयं चेति। इयं शाब्दभावना ज्योतिष्टोमादिकर्मविधायकेषु भिन्न-भिन्नेषु वाक्येषु यद्यपि स्वरूपेण प्रतीयते, तथापि सा कर्तव्यरूपेण (विधेयरूपेण) न प्रतीयते। यतस्तेषु वाक्येषु कर्तव्यत्वेन (कर्तव्यरूपेण) आर्थभावनाया एव बोधः (प्रतीतिः) भवति। कर्तव्यत्वावगमात् विधेयत्वावगमादित्यर्थः। ज्योतिष्टोमादिप्रातिस्विक-

---

शक्तिग्रह से युक्त पुरुष अध्ययन से गृहीत स्वाध्याय-वाक्यगत लिङादि के द्वारा प्राशस्त्यादि-ज्ञान-सहित यागादि के लिए अपने कर्त्तव्यरूप से जानकर यागादि का अनुष्ठान करे'—यह शाब्दबोध होता है। 'अनुतिष्ठेयुः' शब्द का 'अनुष्ठानं कुर्युः' अर्थ है अर्थात् अनुष्ठान करे। अनुष्ठान का 'प्रवृत्ति' अर्थ है। इसलिए पुरुष की प्रवृत्ति रूप आर्थीभावना, शाब्दी भावना की भाव्य (साध्य) सिद्ध होती है।

(६९) इस प्रकार ज्योतिष्टोमादि प्रत्येक वाक्यों में 'शाब्दी भावना' साक्षात् ज्ञात होती है; तथापि वह कर्त्तव्य रूप से ज्ञात

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आर्थभावनाया एव तेषु कर्तव्यत्वावगमात्, किन्तु 'स्वाध्यायोऽध्येतव्यः' इति वाक्ये एव कर्तव्यत्वेन प्रतीयते। न चात्रार्थभावनाया एव विधेयत्वमिति वाच्यम्। 'स्वाध्यायोऽध्येतव्यः' इतिवाक्यस्थार्थभावनाया एव सकलविधिवाक्यस्थशब्दभावनारूपत्वात्।

वाक्येष्विति। 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादिप्रत्येकवाक्येषु। **प्रातिस्विकेति।** स्वस्मिन् स्वस्मिन् प्रतिस्वम्, प्रतिस्वं भवानि प्रातिस्विकानि।

मीमांसाशास्त्रे भावनाया एव विधेयत्वं, न तु यागादिकर्मणां, तेषां करणत्वेन अप्राधान्यात्। तथा चैकादशीतत्त्वे भाव्याधिकरणे स्मार्तेनाप्यभिहितं तत्तद्विधिवाक्येषु भावनाया एव विधेयत्वादिति। एवं स्थिते विचारः प्रवृत्तो भवति—किम् आर्थभावनाया विधेयत्वम्, उत शाब्दभावनायाः। तत्र शाब्दभावनायाः शब्दवृत्तिव्यापाररूपत्वेन नित्यत्वेन च अनुष्ठानायोग्यत्वात्। आर्थभावनाया एव पुरुषवृत्तिव्यापाररूपत्वेन साक्षात् फलजनकत्वेन च विधेयत्वमित्येवंरूपेण कर्तव्यावगमादित्यर्थः। किन्तु शाब्दभावनायाः 'कर्तव्यत्वेन' (कर्तव्यरूपेण) प्रतीतिः 'स्वाध्यायोऽध्येतव्यः' इत्यस्मिन् वाक्ये एव भवति। अत्रैवं शंकते—**न चात्रापीति।** 'स्वाध्यायोऽध्येतव्यः' इत्यस्मिन् वाक्येऽपि आर्थभावनैव विधेयाऽस्ति। तत्रोत्तरं दीयते—**'स्वाध्यायोऽध्येतव्य' इति।** 'स्वाध्यायोऽध्येतव्यः' इति वाक्ये स्थिता आर्थभावनैव सर्वेष्वपि विधिवाक्येषु 'शाब्दभावनारूपेण' वर्तते। **सकलविधिवाक्यस्थशब्दभावनारूपत्वादिति।** स्वाध्यायोऽध्येतव्य इति

नहीं होती है; क्योंकि सभी वाक्यों में आर्थीभावना का ही विधेय रूप से ज्ञान होता है; परन्तु 'स्वाध्यायोऽध्येतव्यः' इस स्वाध्यायविधायक वाक्य में ही वह कर्त्तव्य रूप से ज्ञात होती है। इसलिए केवल आर्थीभावना की ही विधेयता नहीं कही जा सकती;

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(७०) तथाहि—अधिपूर्वकाद् 'इङ् अध्ययने' इति धातोः कर्मणि तव्यप्रत्ययो विहितः। कर्म च स्वाध्यायः प्रधानम्, तत् संस्कारकमध्ययनं गुणकर्म। व्रीहिसंस्कारक-प्रोक्षणादिवत्। अध्ययनजनितग्रहणसंस्कारविशिष्टस्वाध्या-

---

विधिवाक्यस्य विध्यर्थक'तव्य'प्रत्ययवाच्या या शाब्दभावना, तस्यां स्वाध्यायपदवाच्यसकलविधिवाक्यस्थलिङादिवाच्यशब्दभावनासाध्यत्वेनान्वयात्। शाब्दभावनायां साध्यत्वेन आर्थभावनाया एव अन्यत्र अन्वयदर्शनात् तासां शाब्दभावनानाम् एतद्विधेरार्थभावनात्वम्। न च तासां नित्यत्वात् साध्यत्वेन अन्वयाऽयोग्यत्वम् इति वाच्यम्। स्वाध्यायोऽध्येतव्य इति विधेरर्थ इति विधेरर्थज्ञानरूपदृष्टार्थत्वेन व्यवस्थापनात् तत्तत्शव्दभावनाविषक ज्ञानस्यैव साध्यत्वांगीकारात्।

(७०) तथाहीति। 'अधि' उपसर्गपूर्वकात् 'इङ् अध्ययने' (अदा० आत्म०) धातोः सकाशात् 'भावकर्मणोः' (१।३।१३) सूत्रेण 'तव्य'प्रत्ययो विहितोऽस्ति। अत्र कर्म 'स्वाध्यायः', तदेव च प्रधानम्। तस्य स्वाध्यायस्य संस्कारकम् अध्ययनम् अस्ति। तच्च व्रीहिसंस्कारकं प्रोक्षणमिव गुणकर्मास्ति। अध्ययनोत्पन्नेन स्वाध्याय-ग्रहणात्मकेन संस्कारेण युक्तस्य स्वाध्यायस्य अर्थात् अध्ययन-जनितं ग्रहणं, (ज्ञानं) तज्जन्यसंस्कारविशिष्टस्य स्वाध्यायस्य फला-

---

क्योंकि स्वाध्याय-विधायक वाक्यस्थित आर्थीभावना ही सभी विधि-वाक्यों में शाब्दभावना रूप है।

(७०) उपर्युक्त बातों को ही 'तथाहि' ग्रन्थ से स्पष्ट करते हैं। 'अध्येतव्यः पद' में 'अधि' उपसर्ग है, 'इङ्' धातु और 'तव्य' प्रत्यय है। अधिपूर्वक 'इङ्' धातु से कर्म अर्थ में 'तव्य' प्रत्यय का विधान है। इसमें 'स्वाध्याय' और 'अध्ययन' दोनों कर्म हैं। उनमें स्वाध्याय प्रधान कर्म है और व्रीहि के संस्कारक प्रोक्षण के समान

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यस्य प्रयोजनाकाङ्क्षायां स्वाध्यायगततत्तल्लिङादिविशिष्टवाक्यसामर्थ्यलभ्यं यद् अनुष्ठानौपयिकयागादिरूपार्थज्ञानं तदेव दृष्टत्वात्, तत्तत्कर्मानुष्ठानद्वारा स्वर्गादिरूपालौकिकश्रेयः-साधनत्वाच्च प्रयोजनम्। कर्मावबोधं विना कर्मानुष्ठानायोगात्। न त्वदृष्टं प्रयोजनम्। दृष्टफले सम्भवत्यदृष्टफलकल्पनाऽयोगात।

काङ्क्षायां सत्यां स्वाध्यायनिष्ठैः (अध्ययनीयवेदशाखानिष्ठैः) तत्तल्लिङादिप्रत्ययविशिष्टवाक्यैः स्वसामर्थ्येन अनुष्ठानोपयोगियागादिरूपमर्थज्ञानं कार्यते, तदेव—(अर्थज्ञानं) स्वाध्यायस्य प्रयोजनमिति स्वीक्रियते। यतस्तदेव प्रयोजनं दृष्टमस्ति। दृष्टत्वादेव तत्तत्कर्मणामनुष्ठानद्वारा स्वर्गात्मकस्य अलौकिकस्य श्रेयसः साधनमिति स्वीक्रियते। अर्थज्ञानं यदि न भवेच्चेत् कर्मानुष्ठानमपि न स्यात्। अतः अर्थज्ञानमेव स्वाध्यायस्य प्रयोजनमित्यभ्युपगन्तव्यम्। ननु स्वाध्यायस्य अदृष्टं प्रयोजनं कुतो नाङ्गीक्रियते ? किन्तु प्रश्नोऽयं न समुचितः। यतो हि दृष्टे फले संभवति सति अदृष्टफलं नाङ्गीकर्तुं युज्यते इति नियमानुरोधेन स्वाध्यायस्य अदृष्टं प्रयोजनं नाङ्गीक्रियते। ततश्चैत-

---

स्वाध्याय का संस्कारक अध्ययन गुणकर्म है। अध्ययन से उत्पन्न अक्षरग्रहण रूप संस्कार से युक्त स्वाध्याय को प्रयोजन की आकांक्षा होती है। उस आकांक्षा की शान्ति के लिए स्वाध्यायगत तत्तत् लिङादि से युक्त वाक्य के सामर्थ्य से प्राप्त अनुष्ठान का उपयोगी यागादि रूप अर्थ-ज्ञान ही प्रयोजन है; क्योंकि वह दृष्ट प्रयोजन है तथा 'तत्तत्' कर्मों के अनुष्ठान के द्वारा स्वर्गसिद्धिरूप अलौकिक श्रेयस् का साधन होने के कारण भी वही प्रयोजन है। कारण यह है कि कर्मों के ज्ञान के बिना उसका अनुष्ठान सम्भव नहीं है। दृष्ट को ही प्रयोजन मानना उचित है। अदृष्ट फल को प्रयोजन नहीं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तथा च स्वाध्यायविधिनैव स्वाध्यायगतविधिवाक्यगतलिङादिप्रतिपादिताः सर्वाः शाब्दभावनाः अंशत्रयविशिष्टाः कर्त्तव्यत्वेन विधीयन्ते। साङ्गवेदाध्ययनेन व्युत्पन्नाः पुरुषाः अध्ययनगृहीतस्वाध्यायगतलिङादिभिरर्थवादावगतप्राशस्त्यरूपाङ्गसचिवैः फलवद्यागादिकर्तव्यतां बुद्ध्वा यागादीननुतिष्ठेयुरिति। अनुतिष्ठेयुः कुर्युरित्यर्थः। तत्र पुरुषप्रवृत्तेर्भाव्यत्वेनान्वयात्, अध्ययनावगतलिङादेः करण-

---

सिद्धं भवति—'स्वाध्यायोऽध्येतव्यः' इति विधिरेव स्वाध्यायात्मके वेदे स्थितेन विधिवाक्यगतलिङादिना प्रतीयमानाः अंशत्रयसहिताः समस्ताः शाब्दभावनाः कर्तव्यत्वेन रूपेण प्रतिपादयति। सांगवेदाध्ययनेन गृहीतपद-पदार्थो व्युत्पन्नः पुरुषः अध्ययनद्वारा गृहीतस्वाध्यायगतैर्लिङादिभिः अर्थवादवाक्यावगतप्राशस्त्यरूपांगसहितैः 'प्रयोजनयुक्ता यागादयः कर्तव्याः' इति विज्ञाय तेषामनुष्ठानं कुर्यात्। अनुतिष्ठेयुः प्रवृत्तिं कुर्युरितियावत्। अनया रीत्या 'शाब्दभावनायां'

माना जा सकता; क्योंकि जिस कर्म का दृष्ट फल सम्भव हो, तब उसके अदृष्ट की कल्पना करना उचित नहीं है।

इस प्रकार स्वाध्याय विधि के द्वारा ही स्वाध्यायगत विधिवाक्य में रहने वाले लिङादि से प्रतिपादित तीनों अंशों से युक्त सभी शाब्दीभावनाएँ कर्त्तव्य रूप से विहिति होती है। अङ्गों के सहित वेदों के अध्ययन से शक्तिग्रह-युक्त पुरुष अध्ययन के द्वारा गृहीत स्वाध्याय-निष्ठ लिङादि से तथा अर्थवाद-वाक्यों से उत्पन्न प्राशस्त्यादि रूप अङ्गों से विशिष्ट फल-युक्त यागादि की कर्त्तव्यता को जान कर यागादि का अनुष्ठान करे। 'अनुतिष्ठेयुः' (कुर्युः) अर्थात् अनुष्ठान करें। उस शाब्दीभावना में पुरुष-प्रवृत्तिरूप आर्थीभावना भाव्य (साध्य) रूप से अन्वित होती है। अध्ययन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्वेनान्वयात् प्राशस्त्यज्ञानस्येतिकर्त्तव्यतात्वेनान्वयात् शाब्द-भावनाया अपि अंशत्रयवैशिष्टयम् अर्थभावनाया इवेष्टम् ।

(७१) तत्र समीहितस्वर्गादिभाव्यकत्वभानमपि विधिवशादेव। प्रवर्त्तनापरो विधिः यागादेः पुरुषार्थाऽसाधनत्वे तत्र पुरुषं प्रवर्त्तयितुं न शक्नोतीति स्वभाव्यपुरुषप्रवृत्ति-

---

पुरुषप्रवृत्तेः (आर्थभावनायाः) भाव्यत्वेन (साध्यत्वेन), अध्ययनेन ज्ञातस्य लिङादेः साधनत्वेन (करणत्वेन) अर्थवादवाक्यैः अवगतस्य प्राशस्त्यस्य इतिकर्तव्यतात्वेन (कथंभावत्वेन) अन्वयात् शाब्द-भावनाऽपि आर्थभावनाया इव अंशत्रयमपेक्षते ।

(७१) **तत्रेति ।** आर्थभावनायां सर्वाभिलषितस्य स्वर्गस्य साध्यत्वेन प्रतीतिरपि विधिसामर्थ्येनैव भवति । यतो हि पुरुषार्थ-रूपाणां स्वर्गादीनां साधनानि यागादिकर्माणि न भवन्ति चेत् तत्र पुरुषं प्रवर्तयितुं प्रवर्तनारूपो विधिः न समर्थो भवेत् । **स्वभाव्येति ।** 'स्व'पदेनात्र प्रवर्तनोच्यते । प्रवर्तनायाः प्रवृत्त्यनुकूलव्यापाररूपत्वात्

के विधायक स्वाध्याय-वाक्यगत लिङादि का करण (साधन) रूप से अन्वय होता है । अर्थवाद-वाक्य-जनित प्राशस्त्यादि-ज्ञान का इति-कर्त्तव्यता रूप से अन्वय होता है । आर्थीभावना के समान इसके भी तीनों अंशों का शाब्दी भावना में ही अन्वय होने के कारण शाब्दी भावना भी तीनों अंशों से युक्त होती है । मीमांसकों को यही इष्ट है ।

(७१) उसमें इच्छाविषयीभूत स्वर्गादि की भाव्यता (साध्यता) का ज्ञान भी विधि के द्वारा ही होता है । प्रवर्त्तना और विधि दोनों पर्याय हैं । विधि, यागादि को पुरुषार्थ का साधन न मानने पर उस यागादि में पुरुष को प्रवृत्त करने में समर्थ नहीं हो सकता है । प्रवर्त्तना (शाब्दीभावना) की भाव्य (साध्य) आर्थीभावना रूप

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विषयस्य यागादेः पुरुषाभिलषितस्वर्गादिसाधनत्वमापादयति। अन्यथा स्वस्य प्रवर्त्तनात्वमेव न स्यात्। प्रवृत्तिहेतुव्यापारस्यैव प्रवर्त्तनात्वात्। लडादिस्थले तु प्रवर्त्तनात्मकविधेरभावादार्थभावनायाः पुरुषार्थभाव्यत्वनियमो नास्ति।

भावनालक्षणम्।

(७२) भावनात्वं नाम भवितुः प्रयोजकव्यापारत्वम्।

स्वभाव्यायाः पुरुषप्रवृत्तेः विषयस्येति ज्ञेयम्। तस्मात् सः विधिः, स्वस्य पुरुषप्रवृत्तिरूपेण साध्येन सिद्धिं प्राप्यमाणा ज्योतिष्टोमादयो यागाः, सर्वाभिलषितस्वर्गादिफलानां साधनानि इति सूचयति। अन्यथा विधेः प्रेरणा (प्रवर्तना) परत्वमेव न स्यात्। प्रेरणैव (प्रवर्तनैव) विधेः स्वरूपम्। पुरुषप्रवृत्तिम्प्रति हेतुभूतो यो व्यापारः स एव प्रवर्तना-प्रेरणाशब्देन वोच्यते। 'जुहोति' इत्यादिस्थलेषु लट्लकारस्यैव प्रयोगेन प्रवर्तनायाः संभवो नास्ति। अतः तत्रार्थभावनायाः पुरुषार्थरूपेण स्वर्गादिसाध्येन भाव्यमेवेति नास्ति नियमः।

(७२) भावनात्वमिति। उत्पद्यमानस्य प्राप्यमाणस्य वा पदार्थस्य उत्पत्तौ प्राप्तौ वा साधनीभूतः प्रयोजकव्यापारो 'भावना' इत्युच्यते।

पुरुष-प्रवृत्ति के विषयीभूत यागादि को पुरुष के द्वारा अभिलषित स्वर्गादि के साधनत्व का आपादन करता है। अन्यथा उसका अपना प्रवर्त्तनात्व ही सिद्ध नहीं हो सकेगा। प्रवृत्ति के हेतुभूत व्यापार को ही प्रवर्त्तना कहते हैं। लट् आदि स्थलों में प्रवर्त्तनात्मक विधि का अभाव रहता है। अतः उसमें पुरुषार्थरूप भाव्य (साध्य) रूप से आर्थीभावना के रहने का नियम नहीं है अर्थात् उन स्थलों में आर्थीभावना साध्य नहीं होती।

(७२) "भावनात्वं नाम" इत्यादि ग्रन्थ से भावना का लक्षण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्रार्थभावनायां भवितुर्जायमानस्य स्वर्गादेः प्रयोजकव्यापारत्वात् लक्षणसङ्गतिः। शाब्दभावनायामपि पुरुषप्रवृत्तिरूपस्य भवितुः प्रयोजकव्यापारत्वात् लक्षणसङ्गतिः।

उत्पद्यमानस्य ओदनस्य प्राप्यमाणस्य वा स्वर्गस्य उत्पत्तौ प्राप्तौ वा साधनीभूतो व्यापारः आर्थभावनायां (पुरुषप्रवृत्तौ) वर्तते इति कृत्वा लक्षणं संघटते। शाब्दभावनायामपि स्व:य पुरुषप्रवृत्तिरूपसाध्यस्य साधको व्यापारो भवत्येव तेनात्रापि लक्षणसमन्वयः।

प्रस्तुत करते हैं। उत्पन्न होने वाले वस्तु की उत्पत्ति के जनक प्रयोजक के व्यापार को 'भावना' कहते हैं। वास्तविक रूप से व्यापार ही भावना है; परन्तु उसके स्वरूप को स्पष्ट करने के लिए अन्य पदों का प्रतिपादन किया गया है। आर्थीभावना-स्थल में उत्पद्यमान वस्तु स्वर्गादिफल है और उस फल का प्रयोजक (उत्पादक) व्यापार आर्थीभावना है। अतः आर्थीभावना में प्रयोजक व्यापारत्व रह जाने के कारण उसमें लक्षण संघटित हो जाता है। यह कहा जा चुका है कि आर्थीभावना पुरुष-प्रवृत्ति रूप है और प्रवृत्ति के पश्चात् ही कर्मों का अनुष्ठान होता है। उस अनुष्ठान से फल की प्राप्ति होती है। इस प्रकार 'आर्थीभावना' फल-प्रयोजिका सिद्ध होती है। शाब्दीभावना स्थल में भी उत्पन्न होने वाले पुरुष-प्रवृत्ति रूप का प्रयोजक (उत्पादक) व्यापार शाब्दीभावना है। इसलिए शाब्दीभावना में प्रयोजक व्यापारत्व रहजाने के कारण उसमें भी भावना-लक्षण की सङ्गति हो जाती है। पहले ही यह बताया जा चुका है कि शाब्दीभावना का साध्य आर्थीभवना होती है और वह पुरुष-प्रवृत्ति रूप है। शाब्दीभावना प्रेरणा रूप है। किसी के द्वारा प्राप्त प्रेरणा से ही प्रवृत्ति होती है। इसलिए आर्थीभावना की प्रयोजकता शाब्दीभावना में रहती है। इस प्रकार दोनों भावनाओं में भावना का लक्षण सुसंघटित हो जाता है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ज्योतिष्टोमादीनां नामत्वप्रतिपादनम् ।

(७३) ननु 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यत्र यागेन स्वर्गं भावयेदित्यर्थवर्णने ज्योतिष्टोमपदस्य कथमन्वयः ?—इति चेन्न । भावनाकरणत्वेनाभिमतयागनामत्वेनान्वयात्—'ज्योतिष्टोमनामकेन यागेन' इति ।

---

(७३) नन्विति । अत्रैवं शङ्का समुद्भवति—'ज्योतिष्टोमेन स्वर्गकामो यजेत' अस्य वाक्यस्य 'यागेन स्वर्गं सम्पादयेत्' इत्यर्थे कृते सति 'ज्योतिष्टोम'पदस्यान्वयः कथं भवति ? किन्तु नेयमाशंका कार्या। यतो हि भावनायां करणत्वेनान्वितस्य यागस्य 'ज्योतिष्टोम'

---

(७३) वेद को पाँच भागों में विभक्त किया है। वे हैं—विधि, मन्त्र, नामधेय, निषेध और अर्थवाद। उनमें से विधि का विस्तृत विवेचन प्रस्तुत किया गया है। अब नामधेय का निरूपण करते हैं। मन्त्रादि का प्रतिपादन आगे करेंगे।

शङ्का—धर्म का बोध कराना ही वेदों का परम लक्ष्य है। विशेष रूप से वेद का पूर्व भाग धर्मनिरूपण के लिए ही प्रवृत्त हुआ है; परन्तु यह नामधेय (नाम) का बाधक वेदभाग धर्माधर्म के प्रति प्रमाण नहीं हो सकता। इसके स्वाध्याय में किसी की प्रवृत्ति भी नहीं होगी; क्योंकि यह न फल का बोधक होता है, न इससे फल के साधन का ज्ञान होता है। गुणादि के विधायक न होने के कारण इतिकर्तव्यता में भी इसका अन्तर्भाव नहीं हो सकता और विधेय-पदार्थ के स्तावक न होने के कारण उसे अर्थवाद भी नहीं कहा जा सकता। इनको मन्त्र तो कहा ही नहीं जा सकता, क्योंकि इनके सम्बन्ध में मन्त्ररूप से याज्ञिकों की प्रसिद्धि नहीं है। इन सबसे भिन्न धर्म-प्रामाण्य का अन्य कोई प्रकार सम्भव नहीं है। इसलिए नामधेय का धर्माधर्म के प्रति कैसे प्रामाण्य होगा ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति नामधेयमस्ति। अर्थात् ज्योतिष्टोमपदस्य यागे नामत्वेनान्वयो भवति। तस्मात् ज्योतिष्टोमसंज्ञकेन यागेन स्वर्गं सम्पादयेदित्यर्थो भवति।

धर्माधर्म के प्रति प्रामाण्य न होने के कारण ये निष्प्रयोजन सिद्ध होंगे और निष्प्रयोजन विषय का विचार भी निरर्थक होगा। अतः इनकी अर्थवत्ता का प्रतिपादन कैसे किया जायेगा? धर्माधर्म-निर्णय के प्रति इनका कैसे उपयोग होगा?

समाधान—नामधेय का भी धर्माधर्म के प्रति उपयोग है। उपर्युक्त प्रकार से इसमें फलादि-बोधकता नहीं है, तथापि नामधेय धर्माधर्म के प्रमापक होते हैं। विधि के द्वारा यागादि क्रियाओं का विधान किया गया है। उस विधेय यागादि को यह अन्य से व्यवच्छेद कर देता है। 'नामधेय' परिच्छेदक (व्यवच्छेदक) अर्थात् इतर भेद का प्रतिपादक होता है। 'यजति' पद से याग-सामान्य का बोध होता है। याग अनेक प्रकार के हैं। एक ही काल में सभी यागों में प्रवृत्ति नहीं हो सकती। किसी याग-विशेष में ही प्रवृत्ति होगी। उसी याग-विशेष का निर्णायक 'नामधेय' होता है। अतः विधेय यागादि के परिच्छेदक होने के कारण नामधेय धर्माधर्म के प्रति प्रमाण होता है।

शङ्का—'ज्योतिष्टोमेन स्वर्गकामो यजेत' यह ज्योतिष्टोम याग-विधायक वाक्य श्रुत है। यह कहा जा चुका है कि 'यजेत' पद का 'त' प्रत्यय भावना का वाचक और 'यज्' धातु याग का वाचक है। धात्वर्थ याग का भावना में करण रूप से अन्वय होता है और 'यागेन स्वर्गं भावयेत्' यह अर्थ होता है। याग का करण रूप से अन्वय हो जाने पर करणाकांक्षा की शान्ति हो जाती है और 'यागेन स्वर्गं भावयेत्' यह अर्थ होता है। तब पुनः ज्योतिष्टोम पद का भावना में कैसे अन्वय होगा?

समाधान—मीमांसकों को भावना के करण रूप से याग अभिमत है;

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(७४) कथं तन्नामत्वमिति चेन्न । ज्योतिराख्यास्त्रि-वृदादिस्तोमा अस्मिन् सन्तीति व्युत्पत्त्या यागनामत्वात् । यागस्य त्रिवृतादिस्तोमसम्बन्धः केनावगम्यते इति चेन्न । 'त्रिवृत्, पञ्चदशः, सप्तदशः, स्तोमा' इति वाक्यान्तरेण एतच्छब्दार्थस्य तत्सम्बन्धावगमात् । एवं शास्त्रोक्तैस्तत्-प्रख्यादिभिर्हेतुभिस्तत्र तत्र नामत्वं बोध्यम् ।

---

(७४) कथमिति । विधिनिरूपणानन्तरं तदेकदेशस्य नामधेयस्य निरूपणाय पुनः शङ्कते—ज्योतिष्टोमपदं यागस्य नामधेयं कथं भवति ? तत्रेदमुत्तरम्—'ज्योतिराख्यास्त्रिवृदादिस्तोमा' इति । 'ज्योति'-संज्ञकाः 'त्रिवृत्' इत्यादयः 'स्तोमाः' यस्मिन् सन्ति—स ज्योतिष्टोमः, इति व्युत्पत्त्या तस्य यागनामत्वम् । अत्र पुनः शङ्कते—ज्योतिष्टोमयागे त्रिवृदादिस्तोमानां सम्बन्धोऽस्तीति कुतोऽवगतम् ? तत्रोत्तरम्—'त्रिवृत् पञ्चदशः सप्तदश एकविंशः एतानि वावतानि ज्योतींषि य एतस्य स्तोमाः ।' इत्याद्यन्येन वाक्येनैतद्वाक्यान्तर्गतेन 'एतस्य' इति 'एतद्'-शब्देन तस्य ज्योतिष्टोमयागस्य निर्देशः कृतोऽस्ति । तेन 'ज्योतिष्टोम'पदं यागस्य नामधेयमस्तीति निश्चीयते । एवमेव मीमांसाशास्त्रोक्ततत्प्रख्या-दिभिः तत्तत्स्थलेषु नामत्वं विज्ञेयम् ।

किन्तु यागसामान्य को अविधेय होने से उस भावना में नामधेय का याग-नामत्व रूप से अन्वय होता है अर्थात् इससे याग-नामधेय-निर्धारण किया जाता है। ज्योतिष्टोम और याग का अभेद सम्बन्ध से परस्पर अन्वय होता है। अतः 'ज्योतिष्टोमाभिन्नेन यागेन' अथवा 'ज्योतिष्टोमनामकेन यागेन स्वर्गं भावयेत्' यह अर्थ निष्पन्न होता है।

(७४) शङ्का—इस याग का ज्योतिष्टोम नाम कैसे सङ्गत होता है ? समाधान—इस याग में ज्योति नामक त्रिवृद् आदि स्तोमों का

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्प्रख्यादिहेतुविचारः ।

(७५) शास्त्रे हि—तत्प्रख्य-तद्व्यपदेश-यौगिक-वाक्यभेदैश्चतुर्भिर्नामत्वं प्रतिपादितम् ।

(७६) तथाहि—'अग्निहोत्रं जुहोति' इत्यत्र अग्नि-

---

(७५) शास्त्रे हीति । नामधेयत्वनिश्चयप्रकारः प्रदश्यंते 'शास्त्रे ही'ति । मीमांसाशास्त्रे तावत् (१) तत्प्रख्य—(२) तद्व्यपदेश—(३) यौगिक—(४) वाक्यभेदैरिति चतुर्भिः प्रकारैः नामधेयत्वं निर्णीयते इति प्रतिपादितमस्ति ।

(७६) तथाहीति । उपर्युक्तानां नामधेयनिर्णायकहेतूनाम् उदाहरणानि निर्दिश्यन्ते—'अग्निहोत्रं जुहोति' इत्यस्मिन् वाक्ये 'अग्निहोत्र'-

---

सम्बन्ध है। इसलिए इसको ज्योतिष्टोम कहते हैं। इसी व्युत्पत्ति के आधार पर यह याग का नाम होता है।

शङ्का—किस वाक्य के द्वारा याग का 'त्रिवृत्' आदि स्तोमों के साथ सम्बन्ध का ज्ञान होता है ?

समाधान—'त्रिवृत्, पञ्चदश, सप्तदश स्तोमाः' इस वाक्य से इन शब्दों के अर्थों के साथ उस याग के सम्बन्ध का ज्ञान होता है। अतः इसके साथ सम्बन्ध होने के कारण इसका 'ज्योतिष्टोम' नाम पड़ा है। इसी प्रकार मीमांसाशास्त्र-प्रतिपादित 'तत्प्रख्य' आदि हेतुओं के द्वारा उन-उन स्थलों में नामधेयत्व का निर्णय समझना चाहिए। 'नाम' और 'नामधेय' शब्द परस्पर पर्याय हैं। नाम शब्द से स्वार्थ में धेयप्रत्यय करने पर 'नामधेय' शब्द निष्पन्न होता है।

(७५) मीमांसाशास्त्र में तत्प्रख्य, तद्व्यपदेश, यौगिक तथा वाक्य-भेद रूप चार हेतुओं के द्वारा नामधेयत्व का प्रतिपादन किया गया है।

(७६) जैसे—'अग्निहोत्रं जुहोति' इस वाक्य में प्रयुक्त अग्निहोत्र शब्द से अग्निदेवता रूप गुण का विधान नहीं किया जाता है; क्योंकि 'अग्नि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

होत्रशब्देन अग्निदेवतारूपो गुणो न विधीयते, 'अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति' इतिवाक्यविहितेन मन्त्रेण देवतायाः प्राप्तत्वात् । किन्तु अग्निप्रख्यापकम् (अग्निप्रापकं) यच्छास्त्रान्तरम्—'अग्निर्ज्योतिर्ज्योतिरग्निः' इत्यादिकम्, तेन प्राप्तमग्निसम्बन्धं निमित्तीकृत्य अग्नये होत्रं होमोऽस्मिन्निति बहुव्रीहिणा अग्निहोत्रपदस्य होमनामधेयत्वम् । न च होमस्य प्रत्ययवाच्यार्थभावनायां

शब्देन अवगताया 'अग्नि'देवतायाः 'अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति' इति मन्त्रेण सायंकालीनहोमाङ्गत्वेन रूपेण प्राप्तिरस्ति। तेन कारणेन 'अग्निहोत्र'शब्देन अग्निदेवतारूपो गुणो न विधीयतो हि सर्वथा अप्राप्तस्यैव विधानं भवतीति नियमः । अत्र तु 'अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति' इति वाक्यविहितेन मन्त्रेण अग्निदेवतायाः प्राप्तिरस्ति । अतः 'अग्निर्ज्योति०' इति अग्निप्रापकशास्त्रेण प्राप्तमग्निसम्बन्धं निमित्तीकृत्य 'अग्नये होत्रं (होमः) यस्मिन् इति बहुव्रीहिसमासेन 'अग्निहोत्र'पदं होमस्य नामधेयमिति निर्णीयते। एतदुक्तं भवति—'तत्प्रख्यं चान्यशास्त्रम्' इति मीमांसासूत्रम् । 'तत्प्रख्यं'—तस्य देवतारूपगुणस्य 'प्रख्यं'—प्रकाशकं शास्त्रान्तरमस्ति, अतस्तत्र तस्य पुनर्विधाने अनुवादत्वापत्तेः । अतः 'अग्निहोत्र'पदं नामधेयमित्यर्थः । अत्र पुनः शङ्कते—'न चेति' । आख्यातप्रत्ययेन बोधितामर्थभावनाम्प्रति 'होमस्य'साधनत्वेन, तन्नामधेयत्वादग्निहोत्रशब्दस्यापि साधनत्वेन

ज्योति०' इस वाक्य से विहित मन्त्र के द्वारा ही देवता का ज्ञान हो जाता है। ज्ञात पदार्थ का विधान नहीं होता; अपितु अज्ञात पदार्थ का ही विधान होता है; परन्तु अग्नि के प्रख्यापक (प्रापक) अर्थात् बोधक 'अग्निर्ज्योति०' इत्यादि दूसरा ही शास्त्र है। उससे ज्ञात अग्नि के साथ सम्बन्ध को निमित्त बनाकर 'अग्नये होत्रं होमोऽस्मिन्' इस बहुव्रीहि समास के द्वारा अग्निहोत्र पद होम का नामधेय होता है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

करणत्वात् तन्नामत्वे 'अग्निहोत्रेण' इति तृतीया स्यात् 'ज्योतिष्टोमेन' इतिवदिति वाच्यम्। द्वितीयाया एव लक्षणया करणार्थकत्वात्। 'नासाधितं करणम्' इति न्यायेन असाधितस्य करणत्वायोगात् अर्थात् प्राप्तहोमगतसाध्यत्वानुवादकत्वेन वा द्वितीयोपपत्तेः—इति तत्प्रख्यन्यायादत्र नामधेयत्वम्।

भवितव्यम्। ततश्च 'ज्योतिष्टोमेन' इत्यादौ सञ्ज्ञाशब्दात् यथा तृतीया-विभक्तिः प्रयुज्यते, तद्वदेव 'अग्निहोत्रे'ति संज्ञाशब्दात् तृतीयाविभक्त्या भवितव्यम्। अर्थात् 'अग्निहोत्रं जुहोति' इत्यनुक्त्वा 'अग्निहोत्रेण जुहोति' इति वक्तव्यम्। तत्रोत्तरं दीयते—'द्वितीयाया एवे'ति। यद्यपि प्रकृत-स्थले साक्षात् तृतीयाविभक्तेः प्रयोगो न कृतः, तथापि 'अग्निहोत्रम्' इति द्वितीयाविभक्तिरेव लक्षणया करणत्वार्थं बोधयति। 'नासाधितं करणम्'—स्वयमसिद्धं वस्तु, परत्र साधनं न भवितुमर्हति, इति न्यायेन 'असाधितस्य करणत्वं न भवितुमर्हति। अर्थात् कश्चन पदार्थः केनापि साधनेन यावत् सिद्धतां न प्राप्नोति, तावत् तस्मिन् पदार्थे साधनता न स्वीक्रियते। सिद्धः पदार्थ एव साधनं भवितुमर्हति। अतः अर्थापत्तिप्रमाणेन प्राप्तस्य होमनिष्ठसाध्यत्वस्य अनुवाद कर्तुम् 'अग्निहोत्रम्' इति द्वितीयाविभक्तेः प्रयोगः। इत्यनेन प्रकारेण अग्निहोत्रगतद्वितीयाविभक्तेरुपपत्त्या 'तत्प्रख्य'-न्यायेन 'अग्निहोत्र'शब्दस्य होमनामधेयत्वमिति निर्णयः। 'नासाधितं करणम्' इति। असाधितं नाम अविद्यमानम्। यद् विद्यमानमेव नास्ति, तस्मादविद्यमानात् पदार्थात् कार्योत्पत्तिः नैव संभवितुमर्हति। यावच्च कार्योत्पत्तिर्नास्ति तावत् करणत्वं नोपपद्यते।

शङ्का—'त' प्रत्यय का अर्थ आर्थीभावना में होमकरण होता है। इसलिए जब उसको नामधेय मान लिया जायेगा, तब 'ज्योतिष्टोमेन' इस तृतीयान्त शब्द के समान 'अग्निहोत्रेण' यह तृतीयान्त ही पद होना चाहिए था, द्वितीयान्त पद का प्रयोग कैसे होगा?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(७७) तथा—'श्येनेनाभिचरन् यजेत' इत्यत्र श्येनपदं यागनामधेयम्, न तु यागाङ्गत्वेन श्येनपक्षिरूपगुणविधिः। 'यथा ह वै श्येनो निपत्यादत्ते, एवमेवायं द्विषन्तं भ्रातृव्यं निपत्यादत्ते यमभिचरति श्येनेन' इत्युपमानोपमेयव्यपदेशानुपपत्तिप्रसङ्गात्। 'श्येनपक्षी यथा पक्ष्यन्तरं निपत्यादत्ते' एवमयमपि श्येननामकः कर्मविशेषो भ्रातृव्यं शत्रुं

---

(७७) 'तथे'ति। 'श्येनाभिचरन् यजेत' इत्यादिस्थले 'श्येन'पदं तद्व्यपदेशन्यायेन यागस्य नामधेयमस्ति। श्येनपक्षिरूपगुणस्य यागाङ्गत्वेन विधानं नास्ति। अन्यथा 'यथा वै श्येनो निपत्यादत्ते, एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते यमभिचरति श्येनेन'। यथा श्येनपक्षी क्षुद्रजन्तूनाक्रम्य तान् गृह्णाति, तद्वत् 'श्येनेनाभिचरन् यजेत' इतिवाक्यावहितो यागः द्विषन्तं शत्रुम् आक्रम्य गृह्णाति हन्तीत्यर्थः। इति अर्थवादवाक्येन प्रतिपादितस्य उपमानोपमेयभावस्य अनुपपत्तिः स्यात्। यथा श्येनसंज्ञकः पक्षी पक्ष्यन्तरं निपत्य गृह्णाति, एवमयमपि 'श्येन'संज्ञकः कर्मविशेषः द्विषन्तं शत्रुं निपत्य आदत्ते हन्तीति यावत्। इति 'व्यपदेशः' इति सांके-

---

समाधान—द्वितीयाविभक्ति की तृतीयार्थ में लक्षणा कर देने पर वह द्वितीयाविभक्ति भी लक्षणावृत्ति से करण अर्थ का वाचक हो जायेगी। इसमें कोई दोष नहीं है। 'नासाधितं करणम्' (असाधितकरण नहीं होता) इस न्याय से असाधित का करणत्व ही अप्रसिद्ध है अर्थात् ज्ञात होमगत साध्यत्व के अनुवादक रूप से द्वितीयाविभक्ति की उपपत्ति हो जाती है।

इस प्रकार 'अग्निहोत्रं जुहोति' इत्यादि वाक्यों में 'तत्प्रख्य' न्याय से नामधेय माना जाता है।

(७७) उसी प्रकार 'श्येनेनाभिचरन् यजेत' इस वाक्य में प्रयुक्त श्येन पद याग का नामधेय है। इस वाक्य से याग के अङ्गरूप से श्येन पक्षिरूप गुण का विधान नहीं किया जाता। 'जिस प्रकार आकाश में

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निपत्यादत्ते' इति 'व्यपदेशः कर्मनामत्वपक्षे एव युज्यते। यागाङ्गतया श्येनपक्षिविधौ तु स्वस्य स्वेनैवोपमानोपमेयभावः स्यात्। स चायुक्तः। तस्माच्छ्येनतुल्यताव्यपदेशाच्छ्येनपदं कर्मनामधेयम्। ततश्च 'अभिचरन् शत्रुवधकामः श्येननामकेन यागेन अभिचारं भावयेद्, इति वाक्यार्थः।

तिकोऽर्थः (उपमानोपमेयभावः) कर्मणो नामधेयत्वपक्षे एव उपपद्यते। 'तद्व्यपदेश' इति। तेन व्यपदेशः तद्व्यपदेशः, स यत्र अस्ति तत् शास्त्रं तद्व्यपदेशम्। 'वि—विशेषः, उपमानत्वम्, अपदेशः—वर्णनम्, संकीर्तनम्। एवञ्च उपमानद्वारा यत्र प्रकृतविषयो वर्ण्यते, स 'व्यपदेश'पदेनोच्यते। गुणविधिपक्षे एकस्मिन्नेव पदार्थे उपमानोपमेयत्वं भवेत्। अर्थात् स्वस्य स्वेनैव उपमानोपमेयभावः स्यात्। एवमभ्युपगमस्त्वनुचितः। यतो हि भिन्नयोरेव पदार्थयोरूपमानोपमेयभावो भवति। तस्मात् श्येनपक्षिणः सादृश्यवर्णनेन 'श्येन'पदं कर्मणो नामधेयमेवेति निर्णीयते। ततश्चेत्थं वाक्यार्थो निष्पद्यते—'शत्रुं हिंसितुमिच्छुः पुरुषः श्येनसंज्ञकेन यागेन अभिचारं कुर्यात्' इति।

श्येन पक्षी निपतित (नीचे की ओर आकर) होकर अन्य पक्षियों का आदान (ग्रहण) कर लेता है', श्येन याग के द्वारा जिस पुरुष को उद्देश्य करके अभिचार करता है, उस पुरुष को वह याग ग्रहण कर लेता अर्थात् मार देता है। यहाँ श्येन उपमान और याग उपमा है। इस प्रकार उपमानोपमेयभाव नामधेय के बिना सम्भव नहीं है। उपमानोपमेयभाव रूप व्यवहार की सङ्गति के लिए 'नामधेय' मानना आवश्यक है। अतः 'तद्व्यपदेश' न्याय से 'नामधेय' माना जाता है। जैसे श्येन नामक पक्षी दूसरे पक्षियों को सहस ग्रहण कर लेता है, उसी प्रकार यह श्येन नामक कर्म-विशेष भी शत्रु को सहसा ग्रहण कर लेता है। श्येन शब्द को कर्म का नामधेय मानने में ही इस प्रकार का व्यवहार

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(७८) नन्वेवमप्यभिचारस्यापि वेदोक्तत्वात् आभिचारिके कर्मण्यास्तिकानामपि प्रवृत्तिः स्यादिति चेन्न। वेदोक्तोऽप्यभिचारो वेदविहितो न भवति फलत्वात्। 'फलं न विधेयं किन्तु फलमुद्दिश्य तत्साधनत्वेन कर्मैव विधेयम्' इति सिद्धान्तात्। अतोऽभिचारस्याविहितत्वेन प्रत्यवायजनकत्वम्।

---

(७८) नन्विति। अत्रैवं शङ्कते—यदि अभिचारो वेदेन प्रतिपादितः, तर्हि आभिचारिके कर्मणि आस्तिकानां धार्मिकाणां पुरुषाणामपि सतत-प्रवृत्तिर्भवेत्। तत्रोत्तरं दीयते—नैवमाशंकनीयम्। यतो हि यद्यपि वेदेन अभिचारः प्रतिपादितः तथापि न खलु तेन स विहितः। यतः सः अभिचारः फलरूपः। अभिचारो हि फलम्। फलं कदापि विधेयं न भवति। किन्तु फलमुद्दिश्य तत्साधनत्वेन कर्मैव विधेयं भवति, इति सिद्धान्तः। अयं च सिद्धान्तः चतुर्थस्याद्याधिकरणे द्वितीये वरणके प्रतिपादितः। अतो वेदे अभिचारस्य विधानाभावेन सः अभिचारः प्रत्यवायजनकः। तेन आभिचारिके कर्मणि धार्मिकाणां प्रवृत्तिर्न स्यात्।

युक्तिसङ्गत होता है। याग के अङ्ग रूप से श्येन पक्षी का विधान मान लेने पर अपने से अपने का (एक में ही) उपमानोपमेयभाव होने लगेगा। एक ही पदार्थ को उपमान तथा उपमेय मानना समुचित नहीं है। इसलिए श्येन की समानता के व्यवहार से श्येन पद कर्मनामधेय है। अतः 'अभिचार करते हुए शत्रुवध की इच्छा वाला पुरुष श्येन नामक याग के द्वारा अभिचार रूप फल की भावना (उत्पादन) करे'—यह समुचित वाक्यार्थ सम्पन्न होता है।

(७८) शङ्का—इस प्रकार अभिचार को भी वेद-विहित होने के कारण आभिचारिक कर्मों में आस्तिकों की भी प्रवृत्ति होने लगेगी।

समाधान—अभिचार को वेद-विहित होने पर भी उसमें आस्तिकों

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(७९) एवम् 'उद्भिदा यजेत पशुकामः' इत्यत्र पशुरूपफलाय विधित्सितस्य यागस्य उद्भित्पदन्नामधेयम्, न तु यथाकथञ्चित् प्राप्तयागमुद्दिश्य तदङ्गतयोद्भिद्रूपगुणविधिः। दध्यादिवदुद्भिन्नामकस्य गुणस्याप्रसिद्धत्वात्। यागे तु

---

(७९) एवमिति। अनेनैव प्रकारेण 'उद्भिदा यजेत' इत्यस्मिन् वाक्ये पशुरूपफलमुद्दिश्य कर्तव्यत्वेन विहितस्य यागस्य 'उद्भिद्' इति नामधेयमस्ति। नहि यथाकथञ्चित् प्राप्तं यागमुद्दिश्य 'उद्भिद्'रूपो गुणोऽत्र विधीयते। यतो हि दध्यादिद्रव्यपदार्थ इव 'उद्भित्'संज्ञकः कश्चन गुणो लोके प्रसिद्धोऽस्ति। यागनामधेयत्वपक्षे 'उद्भिद्यते फलमनेन स उद्भित्' इति यौगिकव्युत्पत्त्या अवयवार्थः संभवति। अत 'उद्भिद्' इति यागस्य नामधेयमिति स्वीकार्यम्। 'विधित्सितस्य' विधातुमिष्टस्येति-यावत्। 'गुणस्य अप्रसिद्धत्वात्'—दधि-सोमादिपदानां द्रव्यवाचकत्वात् तद्विधायकं 'दध्ना जुहोति' इत्यादिवाक्यं गुणविधायकमिति वक्तुं

की प्रवृत्ति नहीं होती; क्योंकि अभिचार का फल शत्रुवध है और उसका फल नरक है। इसलिए श्येन को स्वरूपतः अधर्म नहीं माना गया है; अपितु फलतः। इस याग के प्रतिपादक वाक्य से शत्रुवध का उपाय बताया है, उसके अनुष्ठान का विधान नहीं किया है। इसलिए उसमें आस्तिकों की प्रवृत्ति नहीं होती। मीमांसकों का सिद्धान्त है कि फल विधेय नहीं होता; अपितु फल को उद्देश्य करके उसके साधन रूप से कर्म का ही विधान होता है। इसलिए अभिचार (शत्रुवध) वेद-विहित नहीं हुआ और वेद-विहित न होने के कारण उसका अनुष्ठान प्रत्यवाय का जनक होगा। इसलिए आस्तिकों के लिए अनुष्ठेय नहीं है।

(७९)-इसी प्रकार 'उद्भिदा यजेत पशुकामः' इस वाक्य से पशुरूप फल के लिए विधि के द्वारा इच्छाविषयीभूत याग का 'उद्भिद' पद नामधेय है। जिस किसी वाक्य से ज्ञात याग को उद्देश्य करके उस

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

'उद्भिद्यते फलमनेन' इति योगसम्भवाद् यागनामत्वम् ।

(८०) ननु 'उद्भिद्यते भूमिरनेन' इतियोगवशेन खनित्रादावप्युद्भिदः प्रयोगसम्भवात् खनित्रादिगुणविधिः किन्न स्यादिति चेन्न । एतादृशस्थले गुणविधिः क्वापि वक्तुं न शक्यते । विरुद्धत्रिकद्वयसमावेशाख्यदोषप्रसङ्गात् ।

शक्यते । किन्तु 'उद्भित्'पदस्य कस्यापि द्रव्यस्य वाचकत्वाऽभावात् तद्गुणविधायकमिति न वक्तुं शक्यते । 'वृत्तिसंभवात्'—कृद्वृत्त्या अर्थस्य संभाव्यमानत्वात् ।

(८०) नन्विति । अत्र शङ्कते—येन भूमिः खन्यते स 'उद्भित्' इति यौगिकव्युत्पत्त्या 'उद्भित्'शब्दस्य 'खनित्र'वाचकत्वमपि संभवति । तेन प्रकृते खनित्रादिगुणस्य विधानं कथं न स्वीक्रियते ? तत्रोत्तरम्—तथा न वक्तुं शक्यते । यतो हि तथाभ्युपगमे परस्परविरुद्धं त्रिकद्वयम् अभ्युपगन्तव्यं भवेत् । तथाभ्युपगमो हि दोषावहः । 'विरुद्धत्रिकद्वयसमावेशाख्यदोषप्रसङ्गात्'—विरुद्धं च तत् त्रिकं च विरुद्धत्रिकम् । तयोः द्वयं विरुद्धत्रिकद्वयम्, तस्य समावेशः इति आख्या (नाम) यस्य सः इति विरुद्धत्रिकद्वयसमावेशाख्यः, स चासौ दोषः तस्य प्रसङ्गात् । तथा च कापि कारिका—

याग के अङ्गरूप से 'उद्भिद्' रूप गुण का विधान नहीं होता । दधि आदि गुणवाचक शब्दों के समान 'उद्भिद्' नाम का गुण प्रसिद्ध नहीं है । याग में तो 'उद्भिद्यते फलमनेन' अर्थात् 'जिसके द्वारा पशु आदि फलों का उद्भेदन किया जाय' यह व्युत्पत्ति सम्भव है । इसलिए उद्भिद् शब्द याग का नामधेय है । इस स्थल में योगबल से कर्मनामधेयत्व का निर्णय किया जाता है ।

(८०) शङ्का—'उद्भिद्यते भूमिरनेन' इस व्युत्पत्ति के द्वारा 'उद्भिद्' शब्द खनित्र आदि का भी वाचक हो सकता है । खनित्र आदि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विरुद्धत्रिकविचारः ।

(८१) तथाहि—'उद्भिदा यजेत पशुकाम' इत्यत्र मानान्तरेणाप्राप्तस्य यागस्यानुवादासम्भवात् पशुकर्मक-भावनायां करणत्वेन यागो विधेयः—'यागेन पशून् भावयेद्' इति । ततश्च यागस्य विधेयत्वम्, फलं प्रति शेषतया प्रतीय-मानत्वात् गुणत्वम्, 'शेषतया, अङ्गतयेत्यर्थः' फलसिद्ध्यर्थं

प्राधान्यमनुवाद्यत्वमुद्देश्यत्वमिति त्रिकम् ।
गुणभावो विधेयत्वमुपादेयत्वमित्यपि ।।

(८१) तथाहीति । विरुद्धत्रिकद्वयं यथा—'उद्भिदा यजेत पशुकामः' इत्यत्र प्रमाणान्तरेण अप्राप्तं यागमुद्दिश्य (यागमनूद्य) उद्भिद्रूपस्य गुणस्य विधानाऽसंभवात् पशुकर्मकभावनायां पशवः कर्म (भाव्यं—साध्यं) यस्यां सा पशुकर्मिका, सा चासौ भावना च तस्याम् । पशुरूपं फलमेव साध्यं यस्यास्तादृशी या अर्थभावना, तस्यां 'यागस्य' करणत्वेन विधानमवश्यं भवति । तेनायमर्थः सम्पन्नः—'यागेन पशून् भावयेत् (सम्पादयेत्)' इति । अतो 'यागे' विधेयत्वं सम्पद्यते । तथैव फलम्प्रति यागस्य अङ्गत्वेन (शेषतया)

अर्थ में भी उस शब्द का प्रयोग सम्भव है । इसलिए खनित्रादि रूप गुण का विधायक ही क्यों न मान लिया जाय ?

समाधान—इस प्रकार के स्थलों में कहीं भी गुणविधि नहीं मान सकते; क्योंकि गुणविधि मानने पर विरुद्धत्रिकद्वयसमावेश नाम के दोष की अतिप्रसक्ति हो जायेगी । अतः गुणविधि मानना उचित नहीं है; अपितु कर्मनामधेय मानना ही आवश्यक है ।

(८१) विरुद्धत्रिकद्वयसमावेश रूप दोष-स्वरूप को स्पष्ट करने के लिए 'तथाहि' इत्यादि ग्रन्थ उपस्थित होता है । 'उद्भिदा यजेत पशुकामः' इस वाक्य से प्रमाणान्तर से अज्ञात याग का अनुवाद सम्भव

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुंसाऽनुष्ठीयमानत्वात् उपादेयत्वमिति विधेयत्वगुणत्वोपादेयत्वात्मकमेकं त्रिकं यागे अस्ति। तथा यागोद्देशेनोद्भिद्-गुणविधौ विधित्सितगुणापेक्षया प्राधान्यम्, उद्देश्यत्वम्, अनुवाद्यत्वञ्चेति द्वितीयं त्रिकम्। तदेतत् त्रिकद्वयं परस्पर-विरुद्धम् एकस्मिन् यागे प्रसज्येत, अतो न गुणविधिः।

प्रतीयमानत्वात् तस्यैव 'गुणत्व'मपि सम्पद्यते। तथैव पुरुषेण फल-प्राप्त्यर्थं यागस्य अनुष्ठीयमानत्वात् तस्य (यागस्य) उपादेयत्वमपि सम्पद्यते। एवञ्च 'विधेयत्वम्'—'गुणत्वम्'—'उपादेयत्वं' चेति एकं त्रिकं (त्रयो धर्माः) 'यागे' अस्ति। एतच्च यागविधिपक्षे सम्पन्नम्। अनन्तरं यागमुद्दिश्य 'उद्भिद्रूपगुणविधान'पक्षे विधातुमिष्टस्य उद्भिद्रूपस्य गुणस्य अपेक्षया (दृष्ट्या) 'यागस्य' प्राधान्यम्, उद्देश्यत्वम्, अनुवाद्यत्वं चेति भवति। तेन इदमपरं त्रिकं (त्रयो धर्माः) 'यागे' अस्ति। इदं परस्परविरुद्धं त्रिकद्वयं एकस्मिन्नेव याग स्वीकर्तव्यं भवति। एवमेकस्मि-न्नेव यागपदार्थे परस्परविरुद्धा धर्मा (विरुद्धं त्रिकद्वयम) स्वीकर्तव्याः भवेयुः तेनात्र गुणविधिरिति न वक्तुं शक्यते।

नहीं है; क्योंकि अज्ञात का बोधक ही विधि होता है। ज्ञात का ज्ञापक तो अनुवादक कहा जाता है। अतः पशुकर्मक भावना में करण रूप से याग विधेय होता है। इसलिए 'यागेन पशून् भावयेत्' यह वाक्यार्थ होगा। अतः याग विधेय होता है और उसमें विधेयत्व रहता है। फल के प्रति शेष रूप से प्रतीयमान होने के कारण याग गुण है और उसमें गुणत्व रहता है। शेषतया का अङ्गतया अर्थ है; क्योंकि दोनों शब्द एकार्थक हैं। फल की सिद्धि (प्राप्ति) के लिए पुरुष के द्वारा याग अनुष्ठीयमान है। अतः वह उपादेय कहलाता है और उसमें उपादेयत्व रहता है। इस प्रकार याग में विधेयत्व, गुणत्व और उपादेयत्व रूप एकत्रिक रहता है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(८२) न च 'सोमेन यजेत' इत्यत्र विरुद्धत्रिकं विनैव सोमशब्दस्य सोमवति यागे लक्षणामङ्गीकृत्य, 'सोमवता यागेनेष्टं भावयेद्' इति सोमविशिष्टयागविधानाद् यथा सोमरूपगुणविधिः, तद्वद् उद्भित्पदस्यापि मत्वर्थलक्षणया उद्भिद्विशिष्टयागविधानाद् अत्रोद्भिद्गुणविधिः स्यादिति वाच्यम्। सोमादौ गत्यन्तराभावान्मत्वर्थलक्षणया विशिष्ट-

---

(८२) न चेति। पुनरत्र शङ्कते—'सोमेन यजेत' इत्यत्र विरुद्धत्रिकद्वयापत्ति विनैव 'सोम'शब्दस्य 'सोमवति' इति मत्वर्थे लक्षणां कृत्वा 'सोमलताविशिष्टेन यागेन इष्टं भावयेत्' इति सोमविशिष्टयागस्य विधानात् यथा सोमरूपगुणस्य विधानं भवति तथैव 'उद्भिदा यजेत' इत्यत्रापि 'उद्भत्'पदस्यापि 'उद्भिद्वति' इति मत्वर्थे लक्षणां कृत्वा 'उद्भिद्गुणविशिष्टेन यागेन पशून् भावयेत्' इति उद्भिद्विशिष्टस्य यागस्य विधानात् 'उद्भिद्'गुणस्य विधानं भवितुमर्हति न वा? किन्तु इति शङ्का नोचिता। 'सोमादाविति'। 'सोमेन यजेत' इत्यत्र विशिष्ट-

---

उसी प्रकार याग को उद्देश्य करके उद्भिद्रूप गुण के विधान मानने पर विधान के इच्छाविषयीभूत गुण की अपेक्षा याग प्रधान होता है तथा उसमें प्राधान्य रहता है। उसी याग को उद्देश्य करके गुण का विधान होता है। इसलिए उस याग में उद्देश्यत्व रहता है। याग का ज्ञान प्रकारान्तर से हो चुका है, उसी का पुनः कथन किया जा रहा है। इसलिए अनुवाद होने के कारण उसमें अनुवाद्यत्व रहता है। इस प्रकार याग में दूसरा त्रिक भी रह गया। ये दोनों त्रिक परस्पर विरुद्ध हैं तथा एक ही याग में प्रसक्त भी हैं। इसलिए गुण का विधान मानना उचित नहीं है। इसी दोष को दूर करने के लिए यागनामधेय माना जाता है।

(८२) शङ्का—'सोमेन यजेत' इस वाक्य में विरुद्धत्रिकद्वय दोष के बिना ही सोम शब्द का 'सोमवान्' में लक्षणा करके 'सोमवता यागेनेष्टं भावयेत्' इस प्रकार का वाक्यार्थ सम्पन्न किया जाता है। जिस प्रकार

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विध्यङ्गीकाराद् उद्भिदादौ नामत्वेन गतिसम्भवाद्विशिष्टविध्यङ्गीकारायोगात् । तस्माद्योगवशादुद्भिदादीनां नामत्वम् ।

विधानस्य अभ्युपगमं विना सोमस्य अन्वयं कर्तुमन्य उपाय एव नास्ति । अतः तत्र मत्वर्थलक्षणां स्वीकृत्य विशिष्टविधिरङ्गीक्रियते भावनायां करणत्वेन सोमपदस्य अन्वयसंभवात् । 'सोम'शब्दस्तावत् लताविशेषे रूढः । तत्र क्लिष्टकल्पनया अवयवार्थः न स्वीक्रियते, उपस्थितं प्रसिद्धं परित्यज्य अप्रसिद्धस्यार्थस्य कल्पनमनुचितम् । अतः द्रव्यवाचकस्य सोमपदस्य भावनायां करणत्वेन अनन्वयात् मत्वर्थलक्षणायाः स्वीकार आवश्यको भवति, गत्यन्तराभावान् । किन्तु 'उद्भिदा यजेत' इत्यत्र 'उद्भित्'पदस्य योगार्थं स्वीकृत्य यागभावनायां नामधेयत्वेन अन्वयसंभवात् अत्र गत्यन्तरमस्ति, गत्यन्तराभावो नास्तीति तात्पर्यम् । तेनात्र विशिष्टविधानस्य असंभवात् 'उद्भिद्'रूपस्य गुणस्य विधानं भवितुं नार्हति । तस्मात् 'उद्भिद्यते फलम् अनेन' इति व्युत्पत्त्या उद्भिदादयः शब्दाः यागस्य नामधेयानीति सिध्यन्ति । अयमभिप्रायः—'सोमेन यजेत' इत्यत्रापि नामत्वेन गतिसंभवात् मत्वर्थलक्षणाकरणमनुचितमिति न वक्तव्यम् । तत्र यौगिकार्थाभावेन यौगिकरूपनामधेयनिमित्तविरहात् न नामत्वम् । अतः अगत्या मत्वर्थलक्षणया गुणविशिष्टविधिः । 'उद्भिदा यजेत' इत्यत्र तु लक्षणाश्रयणमन्तरेणापि नामत्वेन गतिसंभवे सति न लक्षणाश्रयणम् । उक्तञ्च—

'विशिष्टविधिपक्षे तु भवेन्मत्वर्थलक्षणा ।
सोमादौ गत्यभावात् सा, न त्वत्र गतिसंभवात् ॥

इससे सोमविशिष्ट याग का विधान होने के कारण सोमरूप गुण का विधान होता है, उसी प्रकार उद्भिद् पद का भी मत्वर्थलक्षणा के द्वारा उद्भिद्विशिष्ट याग का विधान करें और उद्भिद् रूप गुण का विधान मान लिया जाय । इस प्रकार कर्मनामधेय का परित्याग करके गुण का विधान मान लेना उचित है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(८३) तथा—'चित्रया यजेत पशुकामः' इत्यत्र चित्रापदं प्राजापत्यनामधेयम्। 'दधि मधु घृतमापो धानास्तण्डुलास्तत्संसृष्टं प्राजापत्यम्' इति सामानाधिकरण्याद् यो दध्यादिद्रव्यषट्कस्य प्रजापतिदेवतासम्बन्धः श्रुतः, तेनानु-

---

(८३) तथेति। वाक्यभेदभयात् कुत्र नामधेयत्वस्वीकार इति वक्तुं आरभते—'चित्रया यजेत पशुकामः' इति वाक्ये 'चित्रा' पदं वाक्यभेददोषभयेन प्राजापत्ययागस्य नामधेयं भवति। 'प्रजापतिः' देवता अस्ति अस्य सः प्राजापत्यो यागः। ननु 'चित्रया' इति वाक्ये 'यजेत' पदेन केवलं यागस्य श्रवणं भवति, स यागः प्रजापतिदेवताक इति तु नैवोक्तम्। तर्हि पूर्ववत् 'विधित्सितस्य यागस्य नामधेयम्' इत्यनुक्त्वा 'प्राजापत्यनामधेयम्' इति कुत उक्तम्? किन्तु नैतदुचितम्, यतो हि वाक्यान्तरेण अयं यागः 'प्रजापतिदेवताकः' इति बोध्यते। तच्च वाक्यान्तरं 'दधि मधु घृतमिति' "दधि मधु घृतं पयो धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यम्" इति वाक्ये 'तत्ससृष्टं प्राजापत्यम्' इत्येतानि पदानि एकाधिकरणकानि

समाधान—'सोमेन यजेत' स्थल में वाक्यार्थ-सम्पादन का कोई दूसरा उपाय न होने के कारण मत्वर्थलक्षणा के द्वारा विशिष्ट विधि मान लिया जाता है, उद्भिदादि स्थल में ऐसी बात नहीं है; क्योंकि इस स्थल में नामधेय मान लेना ही दूसरा उपाय है। इसलिए विशिष्टविधि मानना समुचित नहीं है। इसीलिए लौकिक व्युत्पत्ति के द्वारा उद्भिदादि को नामधेय मानना उचित है, गुणविधि नहीं।

(८३) वाक्यभेद होने के कारण कर्मनामधेय का उदाहरण 'तथा' ग्रन्थ से प्रस्तुत करते हैं। उपर्युक्त प्रकार से ही 'चित्रया यजेत पशुकामः' इत्यादि वाक्यों में प्रयुक्त चित्रा पद प्राजापत्य का कर्मनामधेय है। दधि, मधु, घृत, जल, धान और तण्डुल का संसृष्ट (सम्मिलित) प्रजापतिदेवताक हवि है। इस वाक्य में सामानाधिकरण्य के बल से दध्यादि छः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मितो यागो विधीयते। विहितस्य यागस्य फलाकाङ्क्षायां 'चित्रया यजेत' इति वाक्यं फलसम्बन्धविधायकम्। तत्र फलार्थत्वेन पुनर्विधिरिति तस्य प्राजापत्ययागस्य दध्यादि-विचित्रद्रव्यकत्वात् चित्रापदं कर्मनामधेयम्, न तु 'अग्नी-षोमीयं पशुमालभते' इतिवाक्यप्राप्तपशुयागं 'यजेत' इत्यनूद्य चित्रत्वरूपगुणद्वयविधानम्। मानान्तरप्राप्तं कर्मो-द्दिश्य तत्रानेकगुणविधाने वाक्यभेदात्। तदुक्तम्—

(लिंग-विभक्ति-वचनानि च समानानि) सन्ति, तेन दध्यादिद्रव्यैः सह प्रजापतिदेवतायाः यः संबन्धः 'तद्धित'प्रत्ययद्वारा श्रूयते, तद्बलात् यागस्य अनुमानं भवति, अनुमितस्य च यागस्य विधानं 'दधि मधु घृतम्' इति वाक्येन क्रियते। एवं रीत्या विहितस्य यागस्य फलाकांक्षायां सत्यां 'चित्रया यजेत' इति वाक्येन 'दधिमधु" इति विहितयागभावनायां 'फलसम्बन्धस्य' विधानं क्रियते। एवञ्च 'चित्रया यजेत' इति वाक्यं फलसम्बन्धविधायकं भवति। फलसम्बन्धबोधनार्थम् अनूदितस्य प्राजापत्य-यागस्य दध्यादिचित्र-विचित्रैर्द्रव्यैः साध्यत्वात् स यागः 'चित्रा'संज्ञया उच्यते। अत्र शंकते—'अग्नीषोमीयं पशुमालभेत' इत्यनेन वाक्येन प्राप्तं

द्रव्यों का प्रजापति देवता के साथ सम्बन्ध श्रुत है। उसी श्रुत-सम्बन्ध के द्वारा अनुमित याग का विधान किया जाता है। जब याग का विधान हो जाता है, तब उस याग को फल की आकांक्षा होती है। फल की आकांक्षा होने पर 'चित्रया यजेत' यह वाक्य फल के साथ सम्बन्ध का विधान करता है। फल के लिए पुनः उसका विधान किया जाता है। इस प्रकार उस प्रजापतिदेवताक याग को दध्यादि विविध एवं विचित्र द्रव्यों से युक्त होने के कारण चित्रा पद कर्मनामधेय है। 'अग्नीषोमीयं पशुमालभते' इस वाक्य से ज्ञात पशुयाग का 'यजेत' इस पद से

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

'प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः' । इति ।

मानान्तराप्राप्ते कर्मणि त्वनेकदेवताऽष्टाकपालपुरोडाशामावास्यापौर्णमास्याद्यनेकगुणविशिष्टो द्रव्यदेवतासम्बन्धेनानुमितो यागो विधीयते इति सिद्धान्तः । तदुक्तम्—

यागं 'चित्रया यजेत' इति वाक्यस्थ'यजेत' इति पदेन अनूद्य तेनैव वाक्येन ('चित्रया यजेत' इत्यनेन वाक्येन) 'चित्रत्व''स्त्रीत्व'रूपगुणद्वयस्य विधानं कुतो न क्रियते? तत्र समाधीयते—मानान्तरप्राप्तमिति। प्रमाणान्तरेण प्राप्तं यागमुद्दिश्य अनेकगुणविधाने सति 'वाक्यभेद दोषः' प्राप्नोति। अर्थात् पृथक्-पृथक् वाक्यैः पृथक्-पृथक् गुणा वक्तव्या भवेयुः। अत्र वार्तिकप्रमाणमुपस्थाप्यते—'प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः'। अन्य प्रमाणेन विज्ञाते कर्मणि अनेके गुणा न विधातुं शक्यन्ते। यत्र पुनः केनापि अन्येन प्रमाणेन कर्मणः प्राप्तिः (ज्ञानं वा) नास्ति, तादृशस्य कर्मणः अनेकगुणविशिष्टत्वेन विधानं कर्तुं शक्यते। तदानीं वाक्यभेदो न भवति। यथा 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति' इति वाक्ये अष्टसु कपालेषु संस्कृताऽष्टाकपालपुरोडाश अमावस्या–पौर्णमासी - कालादिगुणैर्युक्तस्य तथा द्रव्य-देवतासम्बन्धेन कल्पितस्य यागस्य विधानं वाक्यभेदं विनैव भवितुमर्हति। अत्र प्राचीनो-

---

अनुवाद करके चित्रत्वादि रूप दो गुणों का विधान नहीं होता; क्योंकि दूसरे प्रमाणों से ज्ञात कर्म को उद्देश्य करके उसमें अनेक गुणों का विधान करने पर वाक्यभेद हो जायेगा। वार्त्तिककार ने भी कहा है कि—'कर्म पहले से ज्ञात होने पर अनेक गुणों का विधान नहीं कर सकते।' दूसरी बात यह है कि जिस स्थल में एकवाक्यता सम्भव हो, उसमें वाक्यभेद मानना उचित नहीं है। मीमांसकों का यह सिद्धान्त है कि दूसरे प्रमाणों से अज्ञात कर्म में अनेक देवता, अष्टाकपाल पुरोडाश, अमावास्या पौर्णमासी आदि अनेक गुणों से युक्त द्रव्य और देवता के सम्बन्ध से अनुमित याग का विधान किया जाता है। वार्त्तिककार ने

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

'अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः' । इति ।

(८४) अथ—यथा 'पशुना यजेत' इत्यत्र मानान्तर-प्राप्तयागमुद्दिश्य तदङ्गतया 'पशुना' इत्येकपदोपात्तानां पशुद्रव्यतद्गतलिङ्गसङ्ख्यानां त्रयाणां वाक्यभेदं विनैव विधिरङ्गीकृतः, तद्वदत्राप्येकपदोपात्तचित्रत्वस्त्रीत्वविशेषित-पशुद्रव्यकारकस्य विधानान्न वाक्यभेदः । अत एव तत्र

क्तिम्प्रमाणयति—'अप्राप्ते तु विधीयन्ते बह्वोऽप्येकयत्नतः' इति । प्रमाणान्तरेण अज्ञातस्य कर्मणः अनेकगुणविशिष्टत्वेन विधानं कर्तुं शक्यते । अष्टाकपालेति । अष्टसु कपालेषु संस्कृतः पुरोडाशः अष्टाकपालः, स चासौ पुरोडाशश्च, स च अमावास्या च पौर्णमासी च । 'एकयत्नतः'—एकयैव भावनयेति यावत् ।

(८४) अथ यथेति । अत्र पुनः शंकते यथा 'पशुना यजेत' इत्यत्र 'अग्नीषोमीयं पशुमालभेत' इत्यनेन वाक्येन प्राप्तं (ज्ञातं) यागमुद्दिश्य 'पशुना' इत्येकेन पदेन यागांगत्वेन प्राप्तस्य 'पशु'द्रव्यस्य, तल्लिङ्गस्य 'पुंस्त्वस्य' तत्संख्याया 'एकत्वस्य' चेति त्रयाणां पदार्थानां विधानं वाक्य-भेदं विनैव स्वीक्रियते, तथैव 'चित्रया यजेत पशुकामः' इत्यत्र 'चित्रया' इत्येकेन पदेन प्राप्तस्य 'चित्रत्व'-'स्त्रीत्व'-विशिष्टस्य पशुद्रव्यरूपस्यैकस्य

कहा है कि 'कर्म को प्रमाणान्तर से अज्ञात रहने पर एक यत्न से भी अनेक गुणों का भी विधान किया जाता है ।' अतः कर्म नामधेय मानना ही उचित है ।

(८४) शङ्का—जिस प्रकार 'पशुना यजत' इस वाक्य में प्रमाणान्तर से प्राप्त याग को उद्देश्य करके उसके अङ्ग रूप से 'पशुना' इस एक पद से प्रतिपादित पशु रूप द्रव्य तथा उसमें रहने वाली लिङ्ग, संख्या आदि तीनों का वाक्यभेद स्वीकार किये विना ही विधान माना गया है । उसी प्रकार 'चित्रया' इस एक पद से प्रतिपादित

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विधेयस्य पशोरुपादेयत्वात् तद्गतमेकत्वं यज्ञाङ्गतया विवक्षितमित्येकेनैव पशुना यष्टव्यम्, 'ग्रहं सम्मार्ष्टि' इत्यत्र उद्देश्यगतत्वादेकत्वमविवक्षितमिति सिद्धान्तप्रवादः कथम् ? 'ग्रहं संमार्ष्टि' इत्यत्र 'ग्रहम्' इति द्वितीयया ग्रहस्येप्सिततमत्वेनोद्देश्यत्वात् प्रयोजनवत्त्वाच्च प्राधान्यं गम्यते,

---

कारकस्य विधाने कृते सति वाक्यभेदो न स्यात्। अत्रापि 'यागभाव्यका चित्रवर्णस्त्रीपशुकरणिका भावनाविधिविषयः' इति शाब्दबोधो ज्ञेयः। अतएवेति। संख्यायाः पशोर्विशेषणत्वेन विधानादेव 'पशुना यजेत' इत्यत्र विधेयस्य पशोरुपादेयत्वेन तत्र विद्यमानं यत् 'एकत्वं' तत् यागांगत्वेन विवक्षितं भवति। तस्मात्कारणात् 'एकेनैव पशुना यागः कर्तव्यः' इति निर्णीयते। ननु 'एकत्वं' कदा अविवक्षितं भवति ? तत्प्रदर्शयति ग्रहं संमार्ष्टीति। 'ग्रहं-संमार्ष्टि'इत्यत्र 'ग्रहम्' इति पदस्य द्वितीयान्तत्वात् तत् 'उद्देश्यम्' अस्ति। यतः 'यत् ईप्सिततमं भवति तदुद्देश्यम्' इति नियमः। होमस्य अनुष्ठानार्थं 'ग्रह'संज्ञकस्य पात्रस्य 'ग्रहैर्जुहोति' इति वाक्येन विहितत्वात् होमार्थं तत् पात्रम् अत्यावश्यकम्, अत एव तदीप्सिततममस्ति। ईप्सिततमत्वादेव तस्य प्राधान्यम्। यतो हि 'यत् सप्रयोजनं तत्प्रधानमिति' प्रसिद्धमेव। एवं च ग्रहस्य उद्देश्यभूतत्वाद् ग्रहगतमेकत्वमविवक्षितं भवति इति सिद्धान्तः। यदा च सप्रयोजनत्वाद्-

---

चित्रत्व तथा स्त्रीत्व से विशेषित पशु द्रव्य रूप कारक का विधान हो जाने से वाक्यभेद नहीं होता। इसीलिए उस वाक्य में विधेय पशु को उपादेय होने के कारण पशुगत एकत्व यज्ञ के अङ्गरूप से विवक्षित है। अतः यही अर्थ होता है कि--'एक ही पशु से याग करना चाहिए।' 'ग्रहं सम्मार्ष्टि' इस वाक्य में सम्मार्जन को उद्देश्यगत होने के कारण एकत्व विवक्षित नहीं है। इस प्रकार का सिद्धान्त किस प्रकार सङ्गत होता है ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संमार्गस्तु ग्रहं प्रति गुणभूतः। 'प्रतिप्रधानं गुण आवर्त्तनीयः' इति न्यायाद् 'यावन्तो ग्रहास्तेषां सर्वेषां संमार्गः' इति निश्चये सति, 'कति ग्रहाः सम्मार्जनीयाः' इति बुभुत्साया अभावादुद्देश्यगतमेकत्वं श्रूयमाणमप्यविवक्षितम्। यद्यु-

---

ग्रहस्य प्राधान्यम्, तदा सम्मार्जनं (सम्मार्गः) ग्रहम्प्रति गौणम् (अप्रधानम्)। तेन 'प्रति प्रधानं गुण आवर्तनीयः' इति नियममनुसृत्य 'यावन्तो ग्रहाः तेषां सर्वेषां सम्मार्जनं कर्तव्यम्' इति निर्णीयते। तदा "कति ग्रहाः संमार्जनीयाः' इति जिज्ञासाया अनुत्पद्यमानत्वात् उद्देश्यभूतो यो ग्रहः, तद्गतमेकत्वं श्रुतमपि, विवक्षितं न भवति। अर्थात् अविवक्षितं भवति। तत्र पुनः शङ्कते 'यदुच्यते' इति। ननु—उद्देश्यभूतो यो ग्रहः, तद्गतमेकत्वं श्रुतमपि अविवक्षितं भवति इति यद्यपि उच्यते तथापि एवं वक्तुं शक्यते यत् 'एकत्वम्' उद्देश्यगतं नास्ति, तत्तु स्वत एव विधेयमस्ति। तथाहि—'ग्रह संमृज्यात्', 'यं संमृज्यात् तं चैकम्' इति। अर्थात् ग्रहस्य सम्मार्जनं कर्तव्यम्, यस्य सम्मार्जनं कर्तुं योग्यं, सः (ग्रहः) एको

समाधान—'ग्रह सम्मार्ष्टि' इस वाक्य में प्रयुक्त 'ग्रहम्' पदघटकीभूत द्वितीयाविभक्ति के द्वारा ग्रहगत ईप्सिततमत्व का बोध होता है; ईप्सिततम होने पर ही कर्म संज्ञा होती है और तत्फलीभूत द्वितीया विभक्ति होती है। उससे उद्देश्यत्व की प्रतीति भी होती है। सम्मार्जन प्रयोजन का भी प्रयोजन है। अतः उद्देश्यत्व और प्रयोजनवत्ता होने के कारण ग्रह की प्रधानता ज्ञात होती है। ग्रह की अपेक्षा सम्मार्ग गुणभूत है; क्योंकि वह दूसरे (ग्रह) के लिए है। 'प्रत्येक प्रधान के अनुसार गुण का आवर्त्तन होता है' इस न्याय से 'जितने ग्रह होंगे, उन सभी का सम्मार्ग प्राप्त होगा'—ऐसा निश्चय होता है। उसके बाद 'कितने ग्रह सम्मार्जन के योग्य हैं' इस प्रकार जानने की इच्छा नहीं होने के कारण श्रूयमाण होने पर भी ग्रह रूप उद्देश्यगत एकत्व विवक्षित नहीं है। उपर्युक्त दोनों स्थलों में विवक्षा और अविवक्षा का यही कारण है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

च्येत—'नेदमुद्देश्यगतं किन्तु स्वयं विधेयम्' 'ग्रहं संमृज्याद्' 'यं संमृज्यात्तच्चैकम्' इति। तथा सति विधेयभेदाद्वाक्यभेदः स्यात्। तथाबुभुत्साया अभावात् विधानाऽयोगाच्चोद्देश्यगता सङ्ख्या न विवक्षिता (पू० मी० अ० ३ पा० १ अधि० ७)। उद्देश्यगतमपि विशेषणं किञ्चिद्विवक्षितं यस्य विशेषणस्य विवक्षां विना उद्देश्यप्रतीतिर्न पर्यवस्यति। यथा—तत्रैव ग्रहत्वं विवक्षितम्। तद्विवक्षां विना उद्देश्य-

---

भवतु इति। किन्तु नेदमुचितम्। यतो हि एवमुक्ते सति 'सम्मार्जनम' 'एकत्वं' चेत्युभयं विधेयं भवेत्। एवं च उभयोर्विधाने सति 'वाक्यभेदः' स्यात्। 'एकेनैव वाक्येन द्वयोर्विधाने सति वाक्यभेदः' इति नियमो वर्तते। किञ्च—आकांक्षानुसारेण विधानं भवति इति तथ्येन प्रकृतस्थले 'कति ग्रहाः सम्मार्जनीयाः' इति आकांक्षैव नोदेति। अतः संख्याया विधानस्य आवश्यकतैव नास्ति। अन्यथा 'सम्मार्जनम्' 'एकत्वं' चेति द्वयोर्विधेयत्वात् वाक्यभेदः कर्तव्यो भवेत्। यतो हि वाक्यभेदमनङ्गीकृत्य उभयोर्विधानं न सम्भवति। अत उद्देश्यभूतस्य ग्रहस्य विशेषणभूता या एकत्व-संख्या सा न विवक्ष्यते। तथापि क्वचित् उद्देश्यगतस्य विशेषणस्य विवक्षाऽपि कर्तव्या भवति। अन्यथा उद्देश्यस्य प्रतीतिरेव न भवेत्। यथा—'ग्रहं सम्मार्ष्टि' इत्यत्रैव ग्रहविशेषणभूतस्य 'ग्रहत्वस्य' विवक्षा

पूर्वपक्षी यदि कहे कि वह उद्देश्यगत होने से विधेय नहीं है, किन्तु वह स्वयं विधेय है। 'ग्रह का सम्मार्जन करे' और 'जिसका सम्मार्जन प्राप्त है वह एक है।' इस प्रकार विधेयगत भेद होने के कारण वाक्यभेद की प्रसक्ति होगी। इस तरह के ज्ञान के अभाव की इच्छा तथा विधान की योग्यता न होने के कारण ग्रहादि रूप उद्देश्य में रहने वाली एकत्वादि संख्या विवक्षित नहीं है। जिस विशेषण की विवक्षा के विना उद्देश्य का ज्ञान ही सम्भव न हो, उस सम्बन्धी भी कुछ विशेषण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वरूपस्य ज्ञातुमशक्यत्वात् । तेन ग्रहजातीयसाधनक-सोमयागापूर्वार्थत्वाच्चमसेषु न संमार्ग इति स्थितम् । (पू० मी० अ० ३ पा० १ अधि० ८) ।

(८५) 'पशुना यजेत' इत्यत्र तु यागं प्रति पशुर्विधेय-त्वाद् गुणभूतः, प्रतिगुणं प्रधानावृत्तिर्नास्तीति कियद्भिः

क्रियते । यदि ग्रहत्वस्य विवक्षा न क्रियेत चेत् उद्देश्यस्य स्वरूपमेव अनवगतं स्यात् । अतो ग्रहत्वं विवक्ष्यते । तेन उद्देश्यभूतग्रहप्रतीति-सम्पादकस्य विशेषणस्य विवक्षितत्वात् साधनभूतेन ग्रहेण साध्यभूतः सोमयागः अनुष्ठितश्चेत् तस्मात् अपूर्वं समुत्पद्येत । तस्माद्ग्रहाणामेव सर्वेषां सम्मार्जनं कर्तव्यमिति निर्णीयते । एवञ्च 'ग्रहपात्राणामेव सम्मा-र्जनमनुष्ठेयम्, न चमसपात्राणामि'ति आकरग्रन्थेषु स्थितम् । सोमरसा-धारभूतानि विशिष्टाकाराणि कानिचित् पात्राणि 'ग्रह'शब्देन, कानिचित् 'चमस'शब्देन च उच्यन्ते ।

(८५) पशुनेति । 'पशुना यजेत्' इत्यत्र यागमुद्दिश्य पशोर्विधेय-त्वाद् 'पशुः' गुणभूतः (गौणः) अस्ति । उद्देश्यभूतं वस्तु सर्वदा प्रधानं विधेयभूतं च वस्तु सर्वदा अप्रधानम्—(गौणम्) भवतीति नियमः ।

विवक्षित होता है, जैसे—'ग्रह सम्मार्ष्टि' इत्यादि स्थलों में ही ग्रहत्व विवक्षित है; क्योंकि उसकी विवक्षा के विना उद्देश्य के स्वरूप का ज्ञान ही नहीं हो सकता है। इसलिए ग्रहनिष्ठ साधनता के समान साधनता से युक्त तथा सोम-याग-जन्य अपूर्व के लिए होने के कारण चमस में सम्मार्ग की प्राप्ति नहीं होती।

(८५) 'पशुना यजेत' इस स्थल में याग को उद्देश्य करके पशु का विधान किया गया है। अतः विधेय होने के कारण याग के प्रति पशु गुणभूत अर्थात् गौण है। जिस प्रकार प्रधानों के अनुसार गुणों की आवृत्ति होती है, उसी प्रकार प्रत्येक गुणों के अनुसार प्रधान की आवृत्ति नहीं होती।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पशुभिः यागः कर्त्तव्यं इत्याकाङ्क्षायाम् एकवचनेन प्रतीयमानं विधेयगतमेकत्वं विवक्षितम्। बुभुत्सितत्वात् (पू० मी० अ० ४ पा० १ अधि० ५)।

(८६) किञ्च लिङ्गसङ्ख्याविशेषितस्य पशुद्रव्यरूपकारकस्य एकपदोपात्तस्य विधेयत्वाद्विधेयपशुद्वारा तद्गतलिङ्गसङ्ख्यादेरपि क्रियाङ्गत्वादेकत्वं विवक्षितम्। अथवा तृतीयया विभक्त्याऽभिहितयोर्लिङ्गसङ्ख्ययोर्विभक्त्यभि-

---

अत्र गुणानुरोधेन प्रधानस्य आवृत्तिरनुचितेत्युक्त्वा 'कियद्भिः पशुभिर्यागः कर्तव्यः' इत्याकांक्षायां सत्यां 'पशुना' इत्येकवचनेन प्रतीयमानं यद् विधेयगतमेकत्वं, तदेव विवक्षितं भवति। यतो हि तस्यैव जिज्ञासितत्वात्।

(८६) किञ्चेति। अपरं कारणमिदमपि अस्ति—लिङ्गेन संख्यया च विशिष्टस्य एकपदोपात्तस्य पशुद्रव्यरूपकारकस्य विधानं वाक्यभेदं विनैव कर्तुं शक्यम्। तेन विधेयभूतस्यपशोः यागक्रियाङ्गत्वात्, तत्पशुगते लिङ्ग-संख्येऽपि यागक्रियायामङ्गभूते स्तः। अत एव विधेयपशुवर्तिनी या एकत्वसंख्या, सा विवक्षिता अस्ति। पुनः प्रकारान्तरेणापि तदेव बोधयितुं अथवेति। अथवा 'पशुना' इति पदे या तृतीयाविभक्तिः, तया लिङ्ग-

---

इसलिए 'कितने पशुओं से याग करना चाहिए' इस तरह की आकांक्षा होती है। ऐसी आकांक्षा होने पर एकवचन के द्वारा ज्ञात होने वाला विधेयगत एकत्व विवक्षित होता है; क्योंकि वह इच्छाविषयीभूत है।

(८६) दूसरी बात है कि लिङ्ग और संख्या रूप विशेषण से विशिष्ट एवं एक ही पद से प्रतिपादित पशु-द्रव्य रूप कारक ही विधेय है। विधेय पशु के द्वारा उसमें रहने वाले लिङ्ग और संख्या को भी क्रिया का अङ्ग होने के कारण एकत्व विवक्षित है। अथवा—ऐसा समझना चाहिए कि 'पशुना' पद में तृतीया विभक्ति प्रयुक्त है। उस तृतीया विभक्ति से लिङ्ग और संख्या का भी प्रतिपादन होता है और उसी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हितया करणकारकशक्त्याऽऽत्मसात्कृतयोः प्रातिपदिकार्थपशु-द्रव्येण सम्बन्धमनादृत्य तद्वदेव साक्षात् क्रियाङ्गत्वेन विधाने सति पश्चादरुणैकहायनीन्यायेन परस्परमन्वयः—यागाङ्गत्वेन विहितो यः पशुः स एकः पुमांश्चेति ।

संख्ये, अभिहिते भवतः। या च करणकारकस्य शक्तिः साऽपि तृतीया-विभक्त्या अभिहिता भवति। सा च करणकारकशक्तिः, लिङ्गं संख्यां च स्वाधीने करोति। एतादृशयोर्लिङ्ग-संख्ययोः प्रातिपदिकार्थभूतेन पशुद्रव्येण सह सम्बन्धो न क्रियते। अपितु साक्षात् यागक्रियाङ्गत्वात् प्रातिपदि-कार्थस्य भावनायां यथा अन्वयो भवति, तथैव लिङ्ग-संख्ययोरपि साक्षात् यागक्रियांगत्वेन विधानात् अनन्तरं 'अरुणैकहायनी' न्यायेन प्रातिपदि-कार्थ-विभक्त्यर्थयोः (पशुद्रव्यलिङ्ग-संख्ययोश्च) परस्परमन्वयो भवति। तथाहि—'यागांगत्वेन विहितो यः पशुः, स एकः पुमाँश्च भाव्यः' इति। मूले 'आत्मसात्कृतयोरि'ति। प्रातिपदिकार्थभूतस्य पशुद्रव्यस्य आधेयता-सम्बन्धेन तृतीयाविभक्त्यर्थभूते करणत्वे (करणकारके) यथा अन्वयो भवति, तेन च 'पशुनिष्ठं करणत्वम्' इति शाब्दबोधो भवति। तथैव लिंगसंख्ययोरपि करणत्वे (करणकारके) अन्वयो भवति। तेन 'पशुनिष्ठं, एकत्वनिष्ठं, पुंस्त्वनिष्ठं च यत् करणत्वं, तन्निरूपिका भावना' इति शाब्दबोधो भवति।

तृतीया विभक्ति से करण कारक का भी अभिधान होता है; क्योंकि करण अर्थ में ही उस तृतीया का विधान है। उस करण कारक की शक्ति में ही लिङ्ग और संख्या समाविष्ट है। उस लिङ्ग और संख्या का प्रति-पादिकार्थ पशु-द्रव्य के साथ सम्बन्ध का परित्याग करके पशु-द्रव्य के समान ही साक्षात् क्रिया के अङ्गरूप से विधान मानने के पश्चात् अरुणा-धिकरण न्याय से परस्पर अन्वय होगा। उसके बाद 'याग के अङ्गरूप से विहित जो पशु, वह एक और पुंलिङ्ग हो'—ऐसा वाक्यार्थ-बोध होगा।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(८७) यथा—'अरुणया पिङ्गाक्ष्या एकहायन्या गवा सोमं क्रीणाति' इत्यत्र कारकाणां क्रियाऽन्वयनियमात् करण-विभक्तिभिरारुण्यपिङ्गाक्षीत्वादीनां चतुर्णां परस्परमनन्वितानामेव सोमक्रयणाङ्गत्वेन अन्वये सति आरुण्यादेर्गुणस्यामूर्त्तस्य स्वतः क्रियासाधनत्वायोगात् क्रियासाधनैकहायनीगो-

---

(८७) यथेति। अरुणैकहायनीन्यायस्य विवरणं कर्तुम् आरभते। यथा 'अरुणया पिङ्गाक्ष्या एकहायन्या गवा सोमं क्रीणाति' इत्यत्र 'कारकाणां क्रियया सह अन्वयः अवश्यं भवत्येव' इति नियमस्य विद्यमानत्वात् प्रथमतः आरुण्यस्य, पिङ्गाक्षीत्वस्य, एकहायनीत्वस्य चेत्येषां परस्परं सम्बन्धं न कृत्वा सर्वेषामेषां सोमक्रयणांगत्वेन भावनायामन्वयः क्रियते। तदनन्तरम् आरुण्यादीनाममूर्तानां गुणानां क्रयणक्रियायामनुपयोगात् क्रयणक्रियोपयोगिन्या एकहायन्या गोः करणत्वेन अन्वये कृते सति तस्या गोः आरुण्यादिगुणानां च विशेषण-विशेष्यभावेन परस्परमन्वयो

---

(८७) जिस प्रकार 'अरुणा, पिङ्गाक्षी तथा एकहायनी गौ के द्वारा सोम का क्रमण करे' इस वाक्य में करण के प्रतिपादक तृतीया विभक्ति के साथ परस्पर अन्वय-रहित आरुण्य तथा पिङ्गाक्षीत्व आदि चारों का सोम-क्रमण के अङ्गरूप से अन्वय होता है; क्योंकि कारकों का क्रिया में ही अन्वय होने का नियम है। उनका परस्पर अन्वय नहीं होता। पूर्वोक्त अन्वय मान लेने पर आरुण्य आदि गुण को अमूर्त्त होने कारण साक्षात् क्रिया का साधन नहीं हो सकते। इसलिए क्रिया के साधनीभूत एकहायनी आदि इतर (अन्य) गौ के परिच्छेदक (व्यवच्छेदक) रूप से पश्चात् परस्पर पश्चाद्भावी (पार्ष्णिक) अन्वय होता है, जैसे—'जो एकहायनी गौ', वह पिङ्गाक्षी और अरुणा हो'। उसी प्रकार 'पशुना यजेत' इत्यादि में भी एकत्व संख्या और पुंस्त्व लिङ्ग का पार्ष्णिक अन्वय होता है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिच्छेदकत्वेन पश्चात् परस्परं पार्ष्णिकान्वयः—या एकहायनी गौः सा पिङ्गाक्षी अरुणेति, तद्वत्। (पू० मी० अ० ३ पा० १ अधि० ६)।

(८८) तदेवमुद्देश्यगतविशेषणमविवक्षितम्, उपादेयगतं विवक्षितमिति स्थितम्।

एवञ्च चित्रापदेन चित्रत्वस्त्रीत्वोभयविशेषितपशुकारकस्य यजेतेतिपदानूदितेऽग्नीषोमीयपशुयागे विधातुं शक्यत्वात् कथं नामत्वमिति चेन्न।

भवति। तथा हि—'या एकहायनी गौः सा पिङ्गाक्षी अरुणा च भाव्या' इति। मूले 'पार्ष्ठिकान्वयः' इत्युक्तम्। तत्र 'पृष्ठे भवः पार्ष्ठिकः स चासौ अन्वयश्च' इति विग्रहः। अनेन तस्यान्वयस्य पश्चाद्भाविता सूच्यते। तथैवात्रापि विज्ञेयम्।

(८८) तदेवमिति। एतावता विवेचनेनेदं स्पष्टं यत् उद्देश्यगतं विशेषणम् अविवक्षितं भवति, विधेयगतं च विशेषणं विवक्षितं भवति। तेन—'चित्रयां यजेत पशुकामः' इत्यत्र 'चित्रा'पदेन 'चित्रत्व-स्त्रीत्वे'-त्युभाभ्यां गुणाभ्यां सहितस्य पशुरूपस्य कारकस्य, 'यजेते'ति पदेन 'अग्नीषोमीयपशुयाग'मनूद्य वाक्यभेदं विनैव विधानं कर्तुं शक्यत्वात् 'चित्र'पदस्य यागनामधेयत्वं कथम्? इति शङ्का नोचिता।

इस प्रकार उद्देश्य में रहने वाला विशेषण अविवक्षित होता है और उपादेय में रहने वाला विशेषण विवक्षित होता है।

(८८) शङ्का—उद्देश्यगत विशेषण को अविवक्षित और उपादेयगत विशेषण को विवक्षित मान लेने पर 'यजेत' पद से अनूदित अग्नीषोमीय पशु याग में चित्रा पद से चित्रत्व और स्त्रीत्व दोनों विशेषणों से विशेषित पशु कारक का विधान कर सकते हैं। तब कैसे कर्मनामधेय माना जायेगा?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(८९) तथा सति प्रकृतस्य प्राजापत्ययागस्य फल-सम्बन्धाकाङ्क्षस्य हानम्, अप्रकृतस्य अग्नीषोमीययागस्य कल्पना च स्यात् । तद्द्वयमयुक्तम् । तस्माच्चित्रापदं कर्म-नामधेयम् । एवं तत्प्रख्यादिभिरन्यतमेन सर्वत्र कर्मनाम-त्वमूह्यम् ॥

---

(८९) तथेति । शङ्काकर्तुरनुसारेण यदि क्रियते चेत् प्रकरणेन उपस्थितस्य (प्रकृतस्य) फलसम्बन्धमाकांक्षमाणस्य 'प्राजापत्य'संज्ञकस्य यागस्य परित्यागः कर्तव्यो भवेत् । अप्रकृतस्य (अनुपस्थितस्य) च अग्नीषोमीयपशुयागस्य कल्पना कर्तव्या भवेत् । किन्तु इदं द्वयम् अपि (प्रकृतस्य यागस्य त्यागः, अप्रकृतस्य च यागस्य कल्पनम्) अनुचितमस्ति । तस्मात् 'चित्रापदं' यागक्रियाया नामधेयमित्येव स्वीकर्तुमुचितमस्ति । सूत्रे 'तद्द्वयमि'ति । 'दधिमधुघृतं पयो धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यम्' इतिवाक्यसमीपे पठितस्य 'चित्रया यजेत पशुकामः' इति वाक्यस्य 'यजेत' इति पदेन 'दधिमधु०' इतिवाक्यविहितप्राजापत्ययागस्यैव उपस्थितिः प्रकरणवशात् प्राप्ता भवति । तथा सति 'प्रकरण'प्रमाणेन प्राप्तस्य प्राजापत्ययागस्य त्यागं कृत्वा प्रकरणप्रमाणेन अनुपस्थितस्य अग्निषोमीययागस्य चित्रावाक्यस्य'यजेत' इति पदेन स्वीकरणमनुचित-मस्ति । एवं (१) तत्प्रख्य-, (२) तद्व्यपदेश-, (३) यौगिक-, (४) वाक्य-

---

(८९) समाधान—उपर्युक्त युक्ति मानना उचित नहीं है । कारण यह है कि प्रकृत में उपस्थित फल के साथ सम्बन्ध की आकांक्षा से युक्त प्राजापत्य याग का परित्याग और अप्रकृत अग्नीषोमीय याग की कल्पना करनी पड़ेगी । उपस्थित का परित्याग और अनुपस्थित की कल्पना समुचित नहीं है । अतः चित्रा पद कर्म नामधेय है । इसी प्रकार तत्प्रख्यादि सभी हेतुओं में से एक-एक के द्वारा सभी स्थलों में कर्मनाम-धेयत्व का ऊह करना चाहिए ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथार्थवादो विचार्यंते।

(९०) अर्थवादानान्तु स्वार्थपरत्वे प्रयोजनाभावादध्ययन विधिवशेन फलवदर्थज्ञानार्थत्वस्यावश्यकत्वाद्विधेयगतप्राशस्त्यप्रतिपादनद्वारा विध्येकवाक्यतया प्रामाण्यम्।

भेदानां मध्ये किमपि एकम्प्रमाणं निमित्तं यदि चेत् तदा तद्वशात् तत्तत्पदं कर्मनामधेयं भवतीति सिद्धान्तः स्थिरो भवति। अनया रीत्या ग्रंथारंभात् एतावत्पर्यन्तं विधिवाक्यस्य प्रामाण्यं विचारितमस्ति।

अर्थवादप्रामाण्यविचारः।

(९०) अर्थवादानामिति। इदानीम् अर्थवादवाक्यानि अधिकृत्य विचारः क्रियते– यदि अर्थवादवाक्यानि स्वार्थप्रतिपादकानि अभ्युपगम्यन्ते चेत् तानि निष्प्रयोजनानि स्युः। अर्थात् तेभ्यः काऽपि प्रवृत्तिर्निवृत्तिर्वा कस्यापि न भवेदिति। किञ्च अर्थवादवाक्यान्यपि स्वाध्यायान्तर्गतानि सन्ति। तस्मात् 'स्वाध्यायोऽध्येतव्यः' इत्यध्ययनविधिस्तान्यपि गृह्णाति। तेन अर्थवादवाक्येभ्यः उत्पद्यमानस्य अर्थज्ञानस्य सप्रयोजनता (प्रयोजनविशिष्टता) अभ्युपगन्तव्या भवति। अतः अर्थवादवाक्यानि विधिविहितस्य विधेयपदार्थस्य प्राशस्त्यं प्रतिपाद्य विधिवाक्यैः सह एकवाक्यतां लभन्ते। तेन विधिवाक्यैकवाक्यतावशात् अर्थवादवाक्यानि अपि प्रमाणम्।

---

(९०) अर्थवाद वाक्य को स्वार्थ-प्रतिपादक मान लेने पर धर्माधर्म-विचार के प्रति उनका कोई प्रयोजन नहीं हो सकेगा; क्योंकि अर्थवाद-वाक्य सिद्ध अर्थ के प्रतिपादक होते हैं। 'स्वाध्यायोऽध्येतव्यः' इस अध्ययन के विधायक विधि के द्वारा उसके अध्ययन का विधान किया गया है। जिससे उसकी फलवत्ता की प्रतीति होती है और फलवान् का अर्थज्ञान आवश्यक होता है। अतः उसकी फलवत्ता की सिद्धि के लिए विधेयगत प्राशस्त्यादि के प्रतिपादन के द्वारा विधि-वाक्य के साथ एकवाक्यता होती है। विधि-वाक्यों तथा निषेध-वाक्यों के साथ अर्थ–

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स चतुर्विधः—निन्दा-प्रशंसा-परकृति-पुराकल्प-भेदात् ।

तत्र निन्दाऽर्थवादो यथा—'असत्त्रं वा एतद् यदच्छन्दोमम्', 'अश्रुजं हि रजतं, यो बर्हिषि ददाति पुराऽस्य संवत्सराद् गृहे रुदन्ति' इत्यादिः ।

अर्थवादवाक्यानां भेदाः तदुदाहरणानि च ।

अर्थवादवाक्यानि चतुर्विधानि भवन्ति—(१) निन्दार्थवादः, (२) प्रशंसार्थवादः, (३) परकृत्यर्थवादः, (४) पुराकल्पार्थवादश्च । अर्थात् निन्दा-प्रशंसा-परकृति-पुराकल्पभेदात् अर्थवादः चतुर्विधो भवति ।

निन्दार्थवादस्य उदाहरणम् ।

तत्र निन्दार्थवादो यथा–'असत्त्रं वा एतद्यदच्छान्दोमम्' इत्यादिः । "अश्रुजं हि रजतं यो बर्हिषि ददाति पुराऽस्य संवत्सराद् गृहे रुदन्ति' इत्यादिः ।

वाद-वाक्यों की एकवाक्यता होने के कारण विधेय और निषेध्य कर्मों में वह प्रवृत्ति तथा निवृत्ति का सम्पादक होता है । विधि-वाक्यों से कर्मों का ज्ञान हो जाने पर भी 'कष्टं कर्म' इस न्याय से उसमें प्रवृत्ति नहीं होती; परन्तु जब अर्थवाद-वाक्यों से उसकी प्रशंसा या निन्दा की जाती है, तब पुरुष को उन-उन कर्मों में प्रवृत्ति या निवृत्ति होती है ।

उनमें जो विधेय की निन्दा का प्रतिपादन करता है, वह निन्दा-अर्थवाद अर्थात् निन्दा-प्रतिपादिक अर्थवाद कहलाता है; जैसे—'असत्रं वा' इत्यादि । इसमें प्रयुक्त नञ् का अप्राशस्त्य अर्थ है अर्थात् जिस सत्र में स्तोम का गान नहीं होता, वह सत्र प्रशस्त नहीं है । 'रजत अश्रु से उत्पन्न है । अतः जो यजमान बर्हिष् नाम के याग में रजत की दक्षिणा देता है, उसके गृह में एक वर्ष पूर्ण होने के पहले ही रोदन होता है' । इसलिए बर्हिष् नाम के याग में रजत की दक्षिणा नहीं देनी चाहिए । निन्दा अर्थवाद का निवृत्ति में ही तात्पर्य होता है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रशंसा यथा—'शोभतेऽस्य मुखं य एवं वेद', 'वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति' इत्येवमादिः।

परेण महता पुरुषेणेदं कर्म कृतमिति प्रतिपादकोऽर्थवादः परकृतिः, यथा—'अग्निर्वा अकामयत' इत्यादिः।

प्रशंसार्थवादस्य उदाहरणम्।

तत्र प्रशंसार्थवादो यथा—'शोभतेऽस्य मुखं य एवं वेद', 'वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति' इत्येवमादिः।

परकृत्यर्थवादस्य स्वरूपमुदाहरणं च।

'परेण केनचित् महता पुरुषेण इदं कर्म अनुष्ठितमि'त्यर्थप्रतिपादकं

जिससे विधेय कर्म की प्रशंसा का प्रतिपादन किया जाता है, वह प्रशंसा अर्थवाद कहलाता है, जैसे—'शोभतेऽस्य मुखम्', 'वायुर्वै क्षेपिष्ठा देवता' इत्यादि। अध्यापन के समय शिष्यों के द्वारा उद्वीक्ष्यमान मुख शोभा प्राप्त करता है। अध्यापन वही करता है, जो पहले अध्ययन करता है अध्ययन-सम्पादन के समय कठिन परिश्रम करने से मुँह सूख जाता है। अतः शोभा प्राप्त कैसे करेगा? उसमें किसी की भी प्रवृत्ति नहीं होगी। उसी अप्रवृत्त पुरुष की प्रवृत्ति के लिए 'शोभतेऽस्य मुखम्' यह अर्थवाद-वाक्य है। 'वायुर्वै क्षेपिष्ठा देवता' में वायु के शीघ्रगामीत्व का प्रतिपादन किया गया है। जिस प्रकार वायु शीघ्रगामी देवता है, उसी प्रकार तद्देवताक याग भी शीघ्र फल देने वाला होगा। अतः शीघ्र फल प्राप्त करने की इच्छा से वायुदेवताक याग का अनुष्ठान करना चाहिए।

'किसी दूसरे महान् पुरुष के द्वारा यह कर्म अनुष्ठित है' इस तरह के अर्थ का प्रतिपादक अर्थवाद 'परकृति' कहलाता है, जैसे—'अग्नि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परप्रवक्तृकार्थादिप्रतिपादकः पुराकल्पः, यथा—'तमशपद् धिया धिया त्वा वध्यासुः' इत्यादिः।

(९१) तत्र निन्दाऽर्थवादस्य विधेयान्यनिन्दाद्वारा विधयप्राशस्त्यपरत्वम्। 'अश्रुजम्' इत्यादिरजतनिन्दाद्वारा

वाक्यं 'परकृति'संज्ञकः अर्थवादः। तस्य उदाहरणम्—'अग्निर्वा अकामयत' इत्यादिः।

पुराकल्पार्थवादस्य स्वरूपमुदाहरणं च।

परेण केनचिदुक्तस्य अर्थस्य प्रतिपादकमथवा पूर्वंघटितस्य वृत्तस्य प्रतिपादकं वाक्यं 'पुराकल्प'संज्ञकः अर्थवादः। तस्य उदाहरणम्—'तमशर्पाद्धया धिया त्वा वध्यासुः' इत्यादिः।

(९१) तत्रेति। उक्तेषु अर्थवादेषु मध्ये इदं निन्दार्थवादवाक्यं विधेयपदार्थात् कस्यचिद् भिन्नस्य पदाथस्य निन्दां कृत्वा विधेयपदार्थस्य प्रशंसां करोति। यथा—'अश्रुजं हि रजतम्०" इत्यत्र रजतस्य निन्दां कृत्वा (निन्दाद्वारा) विधेयभूतस्य रजतदाननिषेधस्य प्राशस्त्यं (प्रशंसा)

ने कामना किया' यह अर्थवाद भी प्रवृत्ति-सम्पादक ही होता है; क्योंकि जब अग्नि जैसे महान् व्यक्ति ने इस कर्म को किया, तो अन्य लोगों को भी करना चाहिए।

दूसरे के द्वारा कहे हुए पदार्थ के प्रतिपादिक अर्थवाद को पुराकल्प कहा जाता है, जैसे—उसको शाप दिया कि ज्ञान के द्वारा अर्थात् बुद्धिपूर्वक तुम्हारा बध हो।

इस अर्थवाद-वाक्य का निवृत्ति में ही तात्पर्य है। तुम ऐसा काम न करो कि जिससे तुम्हें कोई शाप दे और उससे तुम्हारा वध हो।

(९१) उन अर्थवादों में निन्दा-अर्थवाद विधेय कर्म से भिन्न की निन्दा के द्वारा विधेय के प्राशस्त्य (श्रेष्ठता) का प्रतिपादक होता है। 'अश्रुजम्' इत्यादि अर्थवाद से रजत की निन्दा के द्वारा विधेयभूत

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विधेयभूतरजतदाननिषेधप्राशस्त्यपरत्वे , विरोधाभावात् । इतरेषां त्रयाणां साक्षात् प्राशस्त्यपरत्वमेव । 'वायुर्वै' इत्यर्थवादस्य वायुः क्षिप्रगामित्वादतीव प्रशस्ता देवता, अतस्तद्दैवत्यं कर्म्म प्रशस्तमिति विधेयदेवतागतप्राशस्त्यप्रतिपादनद्वारा विध्येकवाक्यत्वम् ।

(९२) "अग्निर्वा अकामयत" इत्यस्य अग्निदैवत्यो

प्रकाश्यते । अत्र वाक्ये एकस्यैव पदार्थस्य निन्दा-प्रशंसे नावगम्येते, तेन कोऽपि विरोधो नास्ति । एतदतिरिक्तानि अवशिष्टानि त्रीणि अर्थवाद-वाक्यानि विधेयपदार्थस्य प्रशंसां साक्षात् कुर्वन्ति । 'वायुर्वा क्षेपिष्ठाः' इत्यत्र वायुदेवता शीघ्रगमनकर्त्री, अतः सा अतीव प्रशस्ता । तस्मात् वायुदेवताकं कर्म प्रशस्तमस्ति । अनेन प्रकारेण विधेयकर्मांगभूतदेवतायाः प्राशस्त्यप्रतिपादनेन (प्राशस्त्यप्रतिपादनद्वारा) विधिवाक्येन सह अस्यार्थवाद-वाक्यस्य एकवाक्यता निष्पद्यते ।

(९२) अग्निर्वेति । 'अग्निर्वा अकामयत' इत्ययमर्थवादः 'परकृति' संज्ञकः । यस्य यागस्य देवता 'अग्निः' स्वयमस्ति । तादृशस्य यागस्य

रजत के दान का निषेध-सम्बन्धी प्राशस्त्य के वाचक मान लेने पर कोई विरोध नहीं है। यह परम्परया प्राशस्त्य का वाचक है। इससे भिन्न तीनों अर्थवाद साक्षात् प्राशस्त्य के वाचक हैं। 'वायुर्वै' इत्यादि अर्थवाद से वायु की अत्यन्त शीघ्रगामिता का बोध होता है। शीघ्र-गामी होने के कारण यह देवता अत्यन्त प्रशस्त है। इसलिए 'वायु-देवताक कर्म भी प्रशस्त है'—इस प्रकार विधेय वायुदेवतागत प्राशस्त्य के प्रतिपादन द्वारा अर्थवाद-वाक्य का विधि-वाक्य के साथ एकवाक्यता होती है।

(९२) 'अग्निर्वा' इस अर्थवाद से यह बताया जाता है कि प्राचीन-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizaqtion by eGangotri

यागः पूर्वकाले अग्निना कृतत्वात् प्रशस्तः, आधिक्यादिदानीमप्यन्यैर्यजमानैरवश्यं कर्त्तव्य इति विधेयकर्म्मगतप्राशस्त्यद्वारा विध्येकवाक्यम् । एवमन्यत्राप्यूह्यम् ।

(९३) क्वचित् कार्य्यान्तरमप्यस्ति, यथा "अक्ताः शर्करा उपदधाति" इतिविधौ "अक्ता" इतिपदेन द्रवद्रव्य-

---

अनुष्ठानं पूर्वस्मिन् काले अग्निनैव स्वयं कृतमिति कृत्वा स यागः प्रशस्तोऽस्ति। अतः साम्प्रतमपि— यजमानेन सोऽवश्यमनुष्ठेयः। इति विधेयकर्मगतं प्राशस्त्यम्प्रतिपाद्य अयं परकृत्यर्थवादो विधिवाक्येन सह एकवाक्यताम्प्राप्नोति। एवमेव यस्य विधेः सन्निधौ योऽर्थवादो भवेत् तस्य विधेयकर्मप्राशस्त्यद्वारा विध्येकवाक्यत्वं विज्ञेयम् ।

(९३) क्वचिदिति। कुत्रचित्स्थले प्राशस्त्यप्रतिपादनं विना अर्थवादस्य कार्यान्तरमपि अस्ति। यथा—"अक्ताः शर्करा उपदधाति" अत्र विधौ 'अक्ताः' पदेन सामान्यतया द्रवद्रव्यस्य बोधो भवति। किन्तु 'तद् द्रवद्रव्यं किम् ?' इति सन्देहे सति तद्विधिसन्निधौ पठितेन "तेजो वै घृतम्" इत्यर्थवादेन तद् द्रवद्रव्यं 'घृतम्' इति निश्चीयते। अतः "तेजो वै

काल में स्वयं अग्नि ने ही अग्निदेवताक याग किया। अग्नि जैसे महान् व्यक्ति के द्वारा अनुष्ठित होने के कारण यह याग प्रशस्त है। प्रशस्त होने के कारण इस समय भी दूसरे यजमानों के द्वारा उस याग का अवश्य अनुष्ठान करना चाहिए। इस प्रकार विधेय कर्मगत प्राशस्त्य-प्रतिपादन के द्वारा अर्थवाद-वाक्य का विधि-वाक्य के साथ एकवाक्यता होती है। इसी प्रकार अन्य अर्थवादों को भी समझना चाहिए।

(९३) कुछ अर्थवादों का कहीं-कहीं दूसरा कार्य भी है, जैसे— 'अक्ता शर्करा' इस विधि में प्रयुक्त 'अक्ता' पद के द्वारा द्रव-द्रव्य-सामान्य की प्रतीति होती है; क्योंकि अक्त का अञ्जन अर्थ है। वह

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सामान्यं प्रतीयते। तच्च द्रव्यं किमिति सन्देहे "तेजो वै घृतम्" इत्यर्थवादाद् घृतमिति निश्चीयते इति "तेजो वै घृतम्" इत्यर्थवादस्य सन्दिग्धार्थनिर्णायकत्वेन प्रामाण्यम्।

अथ मन्त्रविचारः।

(९४) मन्त्राणामपि अध्ययनविधिना कृत्स्नस्वाध्यायस्य

घृतम्" इति घृतप्रशंसाबोधकस्य अर्थवादस्य सन्दिग्धार्थनिर्णायकत्वेनापि प्रामाण्यं विज्ञायते। सन्दिग्धार्थस्य निर्णयकरणमत्र अर्थवादस्य कार्यान्तरम्।

मन्त्रविचारः।

(९४) मन्त्राणामपीति। 'स्वाध्यायोऽध्येतव्यः' इति अध्ययनविधिः 'समस्तः स्वाध्यायः (स्वकुलपरम्परागतां शाखां) प्रयोजनवदर्थज्ञानयुक्तः' इति बोधयति। तेन स्वाध्यायान्तर्गता मन्त्रा अपि प्रयोजनवदर्थज्ञानार्था एव। न अदृष्टार्थाः। यतो हि दृष्टं (प्रत्यक्षं) फलं यदि सम्भवात, तदा

अञ्जन कार्य द्रव पदार्थ से ही सम्भव है। वह अञ्जन घृत से भी किया जा सकता है और तैल आदि से भी। इस प्रकार सन्देह होने पर 'तेजो वै घृतम्' इस अर्थवाद से प्रशंसित घृत को ही अञ्जन के साथ रूप से निश्चय किया जाता है। इस प्रकार 'तेजो वै घृतम्' इस अर्थवाद का सन्दिग्ध अर्थ के निर्णायक होने के कारण धर्माधर्म के प्रति प्रामाण्य सिद्ध होता है। दूसरे-दूसरे ग्रन्थों में अर्थवाद का भिन्न-भिन्न प्रकार से भेद किया गया है, जैसे—विधिविशेष और निषेधशेष रूप से दो भेद किये गये हैं। इसी तरह प्रकारान्तर से गुणवाद, अनुवाद तथा भूतार्थवाद के भेद से अर्थवाद तीन प्रकार क बताये गये हैं।

(९४) अर्थवाद के प्रामाण्य-निरूपण के पश्चात् मन्त्रों का प्रामाण्य बताते हैं। 'स्वाध्यायोऽध्येतव्यः' इस अध्ययन के विधायक विधि के द्वारा सम्पूर्ण वेद के स्वाध्याय को फलयुक्त अर्थ-ज्ञान के लिए होने के

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

फलवदर्थज्ञानार्थत्वमेव, न त्वदृष्टार्थत्वम् । दृष्टे सम्भवत्यदृष्टकल्पनाऽयोगात् । प्रयोगकाले कर्म्मज्ञानं विना कर्म्मानुष्ठानायोगात् कर्मौपयिकमर्थज्ञानं मन्त्रैः क्रियते ।

(९५) न चोपदेष्टृवचनादिनाऽप्यर्थस्मरणसम्भवादनुष्ठानोपपत्तिरिति वाच्यम् । मन्त्रैरेवार्थं स्मृत्वाऽनुष्ठाने सति

अदृष्टफलं (अप्रत्यक्षफल) न कल्पनीयम् । अदृष्टफलकल्पनमनुचितमिति यावत् । अतो 'मन्त्रा दृष्टार्था' इति विज्ञेयम् ।

किञ्च—अनुष्ठानसमये (प्रयोगकाले) कर्मणः स्वरूपं यावन्न ज्ञातं स्यान्न तावत् कर्मणः अनुष्ठानमेव न सम्भवेत् । तेन स्पष्टमेतद्भवति यत् कर्मानुष्ठानार्थमुपयोगि (उपकारकं) यदर्थज्ञानं, तत् मन्त्रैरेव भवति ।

(९५) 'न चोपदेष्टृवचनादिने'ति । अत्र शङ्कते—कस्यचिदुपदेशकस्य वचनेनापि कर्मोपयोगिनः पदार्थस्मरणस्य सम्भवेन तदनुष्ठानं संभावितुमर्हति । तत्र समाधानं क्रियते 'मन्त्रैरेवार्थमि'ति । उपर्युक्ता शंका न वक्तुं योग्या । यतो हि 'अनुष्ठानोपयोगिनं पदार्थं मन्त्रैरेव स्मृत्वा कर्मानु-

---

कारण मन्त्र भी प्रयोजनवान् हैं । उनका अर्थज्ञान रूप दृष्ट ही प्रयोजन है, अदृष्ट नहीं; दृष्ट फल के सम्भव रहने पर अदृष्ट फल की कल्पना उचित नहीं है । अनुष्ठान के समय कर्मों के ज्ञान के बिना उसका अनुष्ठान नहीं हो सकता । अतः अनुष्ठेय कर्मज्ञान के उपयोगी अर्थज्ञान अर्थात् पदार्थ-ज्ञान मन्त्रों से ही किया जाता है । अनुष्ठान के समय मन्त्रों के द्वारा ही पदार्थों के ज्ञान का नियम है; अन्यथा अपूर्व ही उत्पन्न नहीं हो सकेगा ।

(९५) शङ्का—किसी उपदेष्टा पुरुष के द्वारा पदार्थों का उपदेश कर देने पर तो उनका ज्ञान हो जायगा और उसी ज्ञान से यागादि का अनुष्ठान सम्भव हो जायेगा । इसलिए मन्त्रों की कोई आवश्यकता प्रतीत नहीं होती ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

फलं भवति, नान्यथेति नियमाङ्गीकारात्। नियमेनादृष्ट-स्याङ्गीकारात्। तदभावे तज्जन्यादृष्टलोपे तन्मूलं फलं न सिध्यतीति कल्पनात्।

(९६) नन्वेवं मन्त्राणां स्वप्रकाश्येऽर्थे विनियोग इति फलितम्। विनियोगो नाम शेषत्वेनान्वयः। शेषत्वं नाम

ज्ञाने कृते सति तस्मात् फलं संभवति, अन्यथा न संभवती'ति नियमः। अस्य नियमस्य विद्यमानत्वादेव अदृष्टोत्पत्तिः अभ्युपगम्यते। अतो हि अस्य नियमस्य अभावे तज्जन्यस्य अदृष्टस्य (नियमादृष्टस्य) अपि लोपो भवेत्। ततश्च नियमादृष्टमूलकं प्रधानयागजन्यं परमापूर्वं (परमादृष्टं) अपि नोत्पद्येतेतिकल्पितं मीमांसकैः।

(९६) 'नन्वेवमि'ति। पुनरत्र शंकते—उपर्युक्तरीत्या स्वप्रकाश्येऽर्थे मन्त्राणां विनियोगो भवतीति फलितम्। 'स्व' शब्देन मन्त्रो ग्राह्यः। एव च मन्त्रैः प्रकाश्यमाने अर्थे एव तेषां मन्त्राणां विनियोगो वाच्यः। शेषत्वेन अन्वयः इति 'विनियोग' शब्दस्य अर्थः। शेषत्वं नाम अङ्गत्वम्।

समाधान—उपदेष्टा पुरुष के उपदेश से उत्पन्न पदार्थ-ज्ञान से अनुष्ठान हो सकता है; परन्तु "मन्त्रों से पदार्थों का स्मरण करके यागादि का अनुष्ठान-सम्पादन करने पर ही तद्विहित फल की सिद्धि होगी; अन्यथा नहीं ?—ऐसा नियम माना गया है। इस नियम से भी नियमापूर्व की उत्पत्ति मानी गयी है। नियम के अभाव हो जाने पर अर्थात् नियम को न मानने पर उस नियम से उत्पन्न अपूर्व का लोप हो जायेगा। इसलिए अपूर्व-मूलक फल की सिद्धि न होगी—ऐसी कल्पना की जाती है। नियमापूर्व भी परमापूर्व के सहायक होता है। नियमापूर्व उत्पन्न न होने से याग अङ्गविकल हो जायेगा और स्वफल-साधक नहीं होगा।

(९६) शङ्का—उपर्युक्त शङ्का-समाधान से यह निष्कर्ष निकलता है कि मन्त्र स्वप्रतिपादित पदार्थ का विनियोजक होता है। शेष (अङ्ग)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अङ्गत्वम् । ततश्च "इमामगृभ्णन् रशनाम्" इतिमन्त्रस्य रशनाग्रहणसामर्थ्यमस्तीति रशनाग्रहणप्रकाशनसामर्थ्यरूपात् लिङ्गादेवरशनाग्रहणाङ्गत्वोपपत्तेः "इमामगृभ्णन् रशनामृतस्य इत्यश्वाभिधानीमादत्ते" इति वचनं किमर्थमिति चेत् न। परिसङ्ख्याऽर्थत्वात् । चयनप्रकरणेऽश्वरशनाग्रहणम्, गर्दभ-

---

इत्थं च "इमामगृभ्णन् रशनामृतस्य" इति मन्त्रे रशनाग्रहणात्मकस्य अर्थस्य प्रकाशनसामर्थ्यमस्ति । तस्मात् तत्सामर्थ्यात्मकेन लिङ्गप्रमाणेन अयं मन्त्रः रशनाग्रहणस्य अङ्गं भवितुं शक्नोति । तर्हि—'इत्यश्वाभिधानीमादत्ते' इति ब्राह्मणवचनं किमर्थम् ? 'अदृष्टार्था मन्त्राः' इत्याक्षेपस्य समाधाने जातेऽपि स एव पूर्वपक्षी अर्थस्मारकत्वं मंत्राणामिति सिद्धान्तं प्रकारान्तरेण आक्षिप्तवानिति । तत्रोत्तरं दीयते 'परिसंख्यार्थत्वादिति'। तद् ब्राह्मणवचनं व्यर्थं नास्ति । तद् वचनं परिसंख्यार्थमस्ति । न हि तत्, मन्त्रविनियोगकरणार्थम् । ईदृशी चात्रेयं परिसंख्या—चयनयाग-

---

रूप से अन्वय को ही विनियोग कहते हैं। शेषता का अङ्गता अर्थ है। इस प्रकार "इमामगृभ्णन्" इस मन्त्र में रशना ग्रहण के प्रतिपादन का सामर्थ्य है। इसलिए रशना-ग्रहण के प्रतिपादन-सामर्थ्य रूप लिङ्ग-प्रमाण से ही रशना-ग्रहण के अङ्गत्व का ज्ञान उपपन्न हो जाता है। इसलिए "इमामगृभ्णन्" इत्यादि अश्वाभिधानी के आदान के प्रतिपादक वचन का क्या प्रयोजन होगा अर्थात् कोई भी प्रयोजन नहीं होगा ?

समाधान—"इत्यश्वाभिधानीमादत्ते" यह वचन निष्प्रयोजन नहीं है, यह परिसंख्या के लिए है। अश्वाभिधानी के समान गर्दभाभिधानी का भी आदान प्राप्त होता है। उसमें गर्दभाभिधानी के वर्जन में ही इसका तात्पर्य है। वर्जनबुद्धि को ही परिसंख्या कहते हैं।

चयन प्रकरण में अश्वरशना का ग्रहण तथा गर्दभरशना का ग्रहण दोनों विहित है। उसमें लिङ्ग-प्रमाण से अश्वरशना के ग्रहण में मन्त्र की

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रशनाग्रहणञ्चेति द्वयमस्ति। तत्र लिङ्गादश्वरशनायां मन्त्रप्राप्तावुच्यमानायां लिङ्गाविशेषाद्गर्दभरशनायामपि मन्त्रः प्राप्तः, अतोऽश्वरशनायामेव मन्त्रः कार्यो न गर्दभरशनायामिति मन्त्रनिवृत्तिरूपपरिसङ्ख्याऽर्थोऽयं विधिः।

परिसंख्याया दोषत्रयम्।

(६७) सा च परिसङ्ख्या त्रिदोषा—स्वार्थत्यागः, परार्थस्वीकारः, प्राप्तबाधश्चेति। तत्र "अश्वाभिधानीमादत्ते"

प्रकरणे तावत् 'अश्वरशनाग्रहणम्', 'गर्दभरशनाग्रहणम्' चेति द्विविधं रशनाग्रहणमस्ति। तत्र लिङ्गप्रमाणेन यथा अश्वरशनाग्रहणे अयं मन्त्रो वक्तव्य इति प्रतिभाति। तथैव लिङ्गप्रमाणेन कस्यापि विशेषस्य अप्रदर्शितत्वात् अयं मन्त्रः गर्दभरशनाग्रहणेऽपि वक्तुं शक्यः। एवं च उभयरशनाग्रहणे मन्त्रोऽयं प्राप्नोति। तदा 'अश्वरशनाग्रहणे मन्त्रोऽयं वक्तव्यः, गर्दभरशनाग्रहणे न वक्तव्यः' इति मन्त्रस्य अन्यनिवृत्तिरूपपरिसंख्यार्थं 'इत्यश्वाभिधानीमादत्ते' इत्ययं विधिरावश्यकः।

परिसख्यायां दोषत्रयम्।

(६) सा चेति। परिसंख्यायां सत्यां त्रयो दोषा भवन्ति। ते च दोषाः—(१) स्वार्थत्यागः, (२) परार्थस्वीकारः, (३) प्राप्तबाधश्च।

प्राप्ति बतायी गयी है। इसलिए लिङ्ग-प्रमाण विशेष न होने के कारण गर्दभ-रशना में भी मन्त्र की प्राप्ति होगी। इस परिस्थिति में "अश्वरशना के ग्रहण में ही मन्त्र का उपयोग करना चाहिए, गर्दभ-रशना में नहीं—इस प्रकार गर्दभ-रशना में मन्त्र की निवृत्ति रूप परिसंख्या-प्रतिपादन के लिए यह विधि आवश्यक है, व्यर्थ नहीं।

(९७) वह परिसंख्या स्वार्थत्याग, परार्थस्वीकार और प्राप्तबाध रूप तीन दोषों से दुष्ट होती है। "अश्वाभिधानीमादत्ते" इस वाक्य का "इस

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति वाक्यस्य अनेन मंत्रेणाश्वरशनाऽऽदानं कुर्यादिति स्वार्थः, स च त्यक्तः। गर्दभरशनातो मन्त्रनिवृत्तिः परार्थः, स च स्वीकृतः। गर्दभरशनायामपि लिङ्गात् प्राप्तस्य मन्त्रस्यानेन बाधश्च—इति त्रिदोषा परिसङ्ख्या गत्यभावादङ्गीकृता। गत्यन्तरे सति सा न युक्ता।

तथा चोक्तम्—

> "श्रुतार्थस्य परित्यागात् अश्रुतार्थस्य कल्पनात्।
> प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदूषणा।"

अत्र तावत् 'इत्यश्वाभिधानीमादत्ते' अस्य ब्राह्मणवाक्यस्य अयमर्थः, यत् 'अनेन मन्त्रेण अश्वरशनाया ग्रहणं कर्तव्यम्'। परिसंख्यायां सत्यां अस्य अर्थस्य परित्यागः कर्तव्यो भवति। 'अनेन मंत्रेण गर्दभरशनाया ग्रहणं न कर्तव्यम्' इति परार्थस्य (अश्रुतार्थस्य) स्वीकारः कर्तव्यो भवति। गर्दभरशनाग्रहणेऽपि लिङ्गप्रमाणेन प्राप्तस्य मन्त्रस्य 'इत्यश्वाभिधानीमादत्ते' इति ब्राह्मणवाक्येन बाधः स्वीकर्तव्यो भवति। इत्थं दोषत्रयेण युक्ताऽपि परिसंख्या उपायान्तराभावात् (अगत्या) स्वीक्रियते। उपायान्तरे सति तस्याः स्वीकरणमनुचितम्।

मन्त्र से अश्वरशना का आदान करे"—यह अर्थ है। इस प्रकार के स्वार्थ का परित्याग हो जाता है। गर्दभरशना से मन्त्र की निवृत्ति परार्थ है, उसका स्वीकार किया जाता है। गदर्भ-रशना में भी लिङ्ग-प्रमाण से प्राप्त मन्त्र का इससे बाध हो जाता है। इस प्रकार यह परिसंख्या तीन-दोषों से युक्त होती है। कोई अन्य उपाय न रहने पर ही परिसंख्या स्वीकार की जाती है। दूसरे उपायों के रहने पर परिसंख्या मानना उचित नहीं है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(९८) एवमष्टदोषदुष्टविकल्पोऽप्यगतिकोऽङ्गीकृतः । यथा यदाग्नेयोऽष्टाकपालः संस्कृतः पुरोडाशो यागाङ्गत्वेनावगतः । तत्र अपूपविशेषस्य पुरोडाशस्य प्रकृतिद्रव्याकाङ्क्षायाम् अनियमेन यस्य कस्यचिद् द्रव्यस्य प्राप्तौ "व्रीहिभिर्य-

---

(९८) एवमिति । अगतिकगत्या यथा परिसंख्या स्वीकर्तव्या भवति, तथैव उपायान्तरस्य अविद्यमानत्वात् अष्टभिर्दोषैर्दूषितो विकल्पोऽपि स्वीकर्तव्यो भवति । यथा—'यदाग्नेयोऽष्टाकपालः' इति विधिवाक्येन अष्टसु कपालेषु भर्जितः पुरोडाशः यागाङ्गत्वेन विहितोऽस्ति । तत्र अपूपविशेषपुरोडाशरूपस्य पिण्डविशेषस्य प्रकृतिद्रव्यं किम् ? इत्याकांक्षायां सत्यां विधिवाक्ये कस्यापि द्रव्यविशेषस्य अनुल्लेखात् 'येन केनाऽपि द्रव्येण पुरोडाशः कर्तव्यः' इति प्राप्तौ पुरोडाश प्रकरण-पठितत्वात् 'व्रीहिभिर्यजेत' इतिवाक्येन पुरोडाशार्थं प्रकृतिद्रव्यरूपेण व्रीहिद्रव्यस्य निश्चयो भवति । किन्तु तथैव पुरोडाशप्रकरणपठितत्वादेव 'यवैर्यजेत' इत्यपरेण वाक्येन 'पुरोडाशः' यवः कर्तव्य इति निश्चयः कर्तव्यो भवति । पुरोडाशनिर्माणकार्यार्थमेव व्रीहि-यवयोर्द्वयोः प्रकृतिद्रव्ययोः उपयोगः कर्तव्योऽस्ति ।

---

(९८) इसी प्रकार आठ दोषों से दुष्ट विकल्प भी कोई अन्य उपाय न रहने पर ही स्वीकार किया जाता है; जैसे—जो अग्निदेवताक अष्टकपालों में संस्कृत पुरोडाश याग के अङ्ग-रूप से ज्ञात होता है। उस स्थल में अपूवविशेष रूप पुरोडाश को प्रकृति-द्रव्य की आकांक्षा होने पर कोई नियम न होने के कारण जिस किसी द्रव्य की प्राप्ति होती है। अभिप्राय यह है कि जब पुरोडाश के लिए कोई विशेष द्रव्य का नियम नहीं है, तब किसी भी द्रव्य से पुरोडाश का निर्माण किया जा सकता है। इस परिस्थिति में "व्रीहिभिर्यजेत" इस वाक्य से व्रीहि का नियमन होता है अर्थात् व्रीहि-द्रव्य से ही पुरोडाश-निर्माण होगा; दूसरे द्रव्यों से नहीं। इसी प्रकार "यवैर्यजेत" इस वाक्य से यव-द्रव्य का नियमन किया जाता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जेत्" इतिवाक्यात् व्रीहयो नियम्यन्ते, एवं "यवैर्यजेत" इति वाक्याद्यवा अपि नियम्यन्ते, तयोरेकार्थत्वाद्विकल्पः ।

(९९) एवम् "अतिरात्रे षोडशिनं गृह्णाति" इति षोडशिग्रहो विहितः । तथा "नातिरात्रे षोडशिनं गृह्णाति" इति प्रतिषेधात् ग्रहणाभावो विहितः, तयोर्ग्रहणाग्रहणयोः

किन्तु द्वयोर्युगपदुपयोगः कर्तुमशक्य इति अगत्या 'विकल्पः' अत्र स्वीकर्तव्यो भवति । 'व्रीहिभिः पुरोडाशः कर्तव्यः, अथवा यवैः पुरोडाशः कर्तव्यः' इति विकल्पस्य स्वरूपम् । "तयोरेकार्थत्वाद् विकल्पः" इति मूले उक्तम् । तत्र 'एकः अर्थः प्रयोजनं ययोः तौ एकार्थौ, तत्त्वात् एकार्थत्वात् इति । अस्मिन् विकल्पोदाहरणे द्रव्ययोर्विकल्प. प्रदर्शितः ।

(९९) एवमिति । विकल्पस्य अन्यविधमुदाहरणं प्रदर्शयितुम् आरभते । अनेनैव प्रकारेण 'अतिरात्र' सञ्ज्ञके यागे "अतिरात्रे षोडशिनं गृह्णाति" इति वाक्येन 'षोडशिग्रहस्य' ग्रहणं विधीयते । तथैव "नातिरात्रे षोडशिनं गृह्णाति" इति वाक्येन अतिरात्रसंज्ञके यागे 'षोडशिग्रहस्य ग्रहणं न कर्तव्यम्'ति ग्रहणं निषिध्यते । अत्र एकेन वाक्येन षोडशिग्रहस्य ग्रहणं कर्तव्यमित्युक्तम् । अपरेण वाक्येन षोडशिग्रहस्य ग्रहणं न कर्तव्यमित्युक्तम् । ग्रहणाऽग्रहणे न युगपत् अनुष्ठातुं शक्ये मिथो विरुद्धत्वात् ।

है । दोनों द्रव्यों का पुरोडाश-सम्पादन रूप एक ही प्रयोजन होने के कारण विकल्प मानना पड़ता है । दोनों को वैदिक विधान होने क कारण किसी एक को अप्रामाणिक भी नहीं कह सकते ।

(९९) इसी प्रकार अतिरात्र नामक याग में षोडशि-पात्र का ग्रहण विहित है और "नातिरात्रे०" वाक्य से अतिरात्र याग में षोडशि-पात्र-ग्रहण का प्रतिषेध होने के कारण उसका ग्रहणाभाव विहित है । ग्रहण और ग्रहणाभाव दोनों परस्पर विरुद्ध हैं । एक ही प्रयोग में दोनों का

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परस्परविरुद्धयोरेकस्मिन् प्रयोगेऽनुष्ठातुमशक्यत्वात् क्वचित् प्रयोगे ग्रहणानुष्ठानम्, प्रयोगान्तरे तदभावानुष्ठानमिति तत्रापि विकल्पः।

विकल्पे दोषाष्टकम्।

(१००) स चाष्टदोषदुष्टः। तथाहि—पूर्वं व्रीहिप्रयोगे यवशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणप्रामाण्यपरित्यागः,

---

अतः कुत्रचित् प्रयोगे षोडशिग्रहस्य ग्रहणं कर्तव्यम्, प्रयागान्तरे च षोडशिग्रहपात्रस्य ग्रहणं न कर्तव्यम्। इति विकल्पः अगत्या अङ्गीक्रियते। अत्र ग्रहण क्रग्रातदभावयोर्विकल्पः प्रदर्शितः। अतिरात्रयागो हि ज्योतिष्टोमयागस्यैव प्रयोगविशेषः।

(१००) स चेति। अत्र विकल्पे अष्टौ दोषाः भवन्ति। तथाहि—(१) पुरोशाशार्थं व्रीहीणां स्वीकारे 'यवैर्यजेत' इति यवविधायकशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणप्रामाण्यस्य परित्यागः कर्तव्यो भवति। अयमाशयः—विधेयार्थस्य अनुष्ठापकत्वेनैव विधीनां प्रामाण्य भवति। अन्यथा विधीनां न प्रामाण्यम्। इतिकृत्वा यदा विधिवाक्यार्थो न अनुष्ठीयते, तदा विधेः प्रामाण्यस्य परित्यागो भवति। तस्य च अप्रामाण्यं स्वीकृतमिव

अनुष्ठान नहीं कर सकते। अतः किसी प्रयोग में ग्रहण किया जायेगा, किसी दूसरे प्रयोग में ग्रहणाभाव का अनुष्ठान किया जायेगा। इसलिए इस स्थल में भी विकल्प स्वीकार करना पड़ता है।

(१००) 'व्रीहिभिर्यजेत' एवं 'यवैर्यजेत' इन दोनों वाक्यों से व्रीहि और यव का विधान है तथा दोनों में परस्पर विकल्प माना जाता है—यह बताया जा चुका है। इन्हीं दोनों वाक्यों को प्रस्तुत करके विकल्प के आठ दोषों को प्रदर्शित किया गया है। वह विकल्प आठ दोषों से दुष्ट होता है अर्थात् विकल्प मानने पर आठ दोष समुपस्थित होते हैं; जैसे—पहले व्रीहि का प्रयोग कर देने पर यव के विधायक वाक्य के स्वार्थानुष्ठा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अननुष्ठापकत्वलक्षणाप्रामाण्यस्वीकारः ततो द्वितीयप्रयोगे यवानुष्ठाने पूर्वं त्यक्तं यत् प्रामाण्यं तत्स्वीकारः, स्वीकृतं यदप्रामाण्यं तत्परित्यागश्चेति यवशास्त्रे चत्वारो दोषाः। एवं पूर्वं यवप्रयोगे व्रीहिशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणं यत्प्रामाण्यं तत्परित्यागः, अननुष्ठापकत्वलक्षणं यदप्रामाण्यं तत्स्वीकारः, पुनर्द्वितीयप्रयोगे व्रीह्यनुष्ठाने व्रीहिशास्त्रस्य त्यक्तप्रामाण्यस्वीकारः, स्वीकृताप्रामाण्यपरित्यागश्चेति,

---

भवति। अर्थात् (२) 'यवशास्त्रम् अप्रमाणमि'ति स्वीक्रियते। (३) पक्षान्तरे (यवपक्षे) पुरोडाशार्थं यवानां स्वीकारे यवशास्त्रस्य पूर्वं परित्यक्तं यत् प्रामाण्यं, तत् स्वीकृतमिव भवति। अर्थात् परित्यक्तस्य प्रामाण्यस्य स्वीकारः कृत इति भवति। (४) पूर्वं (व्रीहिप्रयोगे) यवशास्त्रस्य स्वीकृतं यत् अप्रामाण्यं, तत् इदानीं न स्वीक्रियते इति वक्तव्यं भवति। इति यवशास्त्रस्वीकारपक्षे चत्वारो दोषाः समुद्भवन्ति। एवमेव (५) यदि पूर्वं पुरोडाशार्थं यवानां स्वीकारे 'व्रीहिभिर्यजेत' इति व्रीहिशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणं यत् प्रामाण्यं तस्य परित्यागः कर्तव्यो भवति। (६) तस्य च अननुष्ठापकत्वलक्षणं यत् अप्रामाण्य तत् स्वीकृतमिव भवति। अर्थात् व्रीहिशास्त्रमप्रमाणमिति स्वीकारः कर्तव्य इव भवति। पुनर्द्वितीयप्रयोग पुरोडाशार्थं व्रीहिशास्त्रस्य स्वीकारे तस्य परित्यक्तप्रामाण्यस्य (अप्रामाण्यस्य) स्वीकार इव भवति। (७) स्वीकृतस्य अप्रामाण्यस्य पुनः परित्यागः कर्तव्यो भवति। इत्थं व्रीहिशास्त्रसम्बद्धा-

---

पकत्व-स्वरूप प्रामाण्य का परित्याग, अननुष्ठापकत्व रूप अप्रामाण्य का स्वीकार करना होगा। उसके बाद दूसरे प्रयोग में यव-द्रव्य का प्रयोग करने पर पूर्व में परित्यक्त का प्रामाण्य और उसका स्वीकार, पहले से स्वीकृत जो अप्रामाण्य, उसका परित्याग करना होगा। इस प्रकार यव-विधायक में चार दोष होते हैं।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्रीहिशास्त्रे चत्वारो दोषाः । इत्यष्टदोषदुष्टो विकल्पः ।

(१०१) स च विकल्पः क्वचिदेकार्थत्वात्, एककार्य-

श्चत्वारो दोषाः भवन्ति । अत्रैव यवशास्त्रसम्बद्धानां चतुर्णां दोषाणां समावेशे कृते अष्टौ दोषा भवन्ति । इति अष्टदोषदुष्टो विकल्पो भवति । अयमाशयः—होमानुष्ठानकाले यवशास्त्रानभ्युपगमे व्रीहिशास्त्रस्य यदा स्वीकारः क्रियते तदा यवशास्त्रे दोषद्वयम् । एवं व्रीहिशास्त्रानभ्युपगमे यवशास्त्रस्य यदा स्वीकारः क्रियते तदा व्रीहिशास्त्रे दोषद्वयमिति मिलित्वा चत्वारो दोषाः । तथैव व्रीहिद्रव्यस्य होमानुष्ठाने उपयोगानुपयोगयोश्चत्वारो दोषाः । व्रीहि-यवयोर्वैकल्पिकत्वात् उभयोर्मिलित्वा अष्टौ दोषा भवन्ति । यत्र त्रयाणां विकल्पस्तत्र द्वादशदोषाः । यत्र चतुर्णां विकल्पः तत्र षोडशदोषाः । इत्थमेकैकसंख्याधिक्येन चत्वारश्चत्वारो दोषा अधिका भवन्ति ।

(१०१) अष्टदोषदुष्टविकल्प इति । क्वचित् एककार्यकारित्वादेव विकल्पो भवति । यथा—व्रीहि-यवयाः प्रत्येकस्य (एकैकस्य) पुरोडाश-

---

इसी प्रकार पहले यव-द्रव्य का ही प्रयोग मान लेने पर व्रीहि के विधायक वाक्य के स्वार्थानुष्ठापकत्व-स्वरूप जो प्रामाण्य, उसका परित्याग; अननुष्ठापकत्व रूप जो अप्रामाण्य, उसको स्वीकार करना पड़ेगा। पुनः दूसरे प्रयोग में व्रीहि के अनुष्ठान करने पर व्रीहि के विधायक वाक्य के त्यक्त प्रामाण्य का स्वीकार और स्वीकृत अप्रामाण्य का परित्याग मानना पड़ेगा। इस प्रकार व्रीहि के विधायक वाक्य में चार दोष उपस्थित होते हैं। इन दोनों दोष-समूहों को मिला देने पर दोषों की संख्या आठ हो जाती है, विकल्प स्थलों में ये आठ दोष होने के कारण विकल्प 'अष्ट-दोष-दुष्ट' कहलाता है।

(१०१) किन्हीं-किन्हीं वाक्यों में एकार्थ अर्थात् एक ही प्रयोजन को सिद्ध करने के कारण विकल्प माना जाता है। एक कार्यकारित्व का एककार्य सम्पादकत्व अर्थ है। अभिप्राय यह है कि दोनों वाक्यों से दो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कारित्वादित्यर्थः। यथा, व्रीहियवयोरेकैकस्य पुरोडाश-निष्पादनक्षमत्वाद्विकल्पः।

(१०२) क्वचित् वचनबलात्; यथा—"बृहत्पृष्ठं भवति" इति बृहत्सामसाध्यं पृष्ठनामकं स्तोत्रं विहितम्, "रथन्तरं पृष्ठम्भवति" इति रथन्तरसामसाध्यं पृष्ठस्तोत्रान्तरं विधीयते।

निष्पादनात्मकमेकं कार्यं कर्तुं सामर्थ्यमस्ति। अतः व्रीहि-यवयोर्विकल्पः। अत्र एकार्थत्वाद् विकल्पः स्वीक्रियते।

(१०२) क्वचिदिति। कुत्रचित् स्वतन्त्रवचनबलाद् विकल्पो भवति यथा—'बृहत्पृष्ठं भवति' इति वाक्येन बृहत्संज्ञकसाम्ना साध्यं पृष्ठसंज्ञकं स्तोत्रं विधीयते। तथैव 'रथन्तरं पृष्ठं भवति' इति वाक्येन रथन्तर-संज्ञकसाम्ना साध्यं अपरं पृष्ठसंज्ञकं स्तोत्रं विधीयते। 'पृष्ठस्तोत्रान्तरम्' इति मूले स्थितमस्ति। तत्र पृष्ठसंज्ञकं स्तोत्रं पृष्ठस्तोत्रम्। अन्यत् पृष्ठस्तोत्रं पृष्ठस्तोत्रान्तरम् इति विज्ञेयम्।

द्रव्यों का विधान किया गया और दोनों का प्रयोजन एक ही है, तब उन दोनों द्रव्यों में विकल्प माना जाता है, जैसे—व्रीहि के विधायक वाक्य तथा यव के विधायक वाक्य के द्वारा विहित व्रीहि और यव दोनों अकेले-अकेले पुरोडाश रूप प्रयोजन को सिद्ध करने में समर्थ हैं। अतः दोनों का विकल्प माना जाता है।

(१०२) कहीं पर विशेष वचन के सामर्थ्य से विकल्प माना जाता है, जैसे—'बृहत्पृष्ठं भवति' इस वाक्य से बृहत्साम से साध्य पृष्ठनामक स्तोत्र का विधान है। "रथन्तरं पृष्ठं भवति" इस वाक्य से रथन्तर साम से साध्य पृष्ठ नामक दूसरे स्तोत्र का विधान किया जाता है। इसलिए विधायक वचन के बल से इन स्तोत्रों में विकल्प माना जाता है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(१०३) स्तोत्रं च प्रयाजादिवदपूर्वार्थत्वादर्थकर्म्म। साम तु संस्कारकर्म्मत्वाद् गुणकर्म्म। स्तोत्रसाधनीभूतस्तोत्रीयाक्षराभिव्यक्तिरूपसंस्कारद्वारा साम्नां स्तोत्रसाधनत्वाङ्गीकारात्। प्रगीतमन्त्रसाध्यमिन्द्रादिगुणिनिष्ठगुणाभिधानं स्तोत्रम्। प्रगीतमन्त्रसाध्यं सामाभिव्यक्तऋगक्षरसाध्यमित्यर्थः। अप्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं शस्त्रम्।

---

(१०३) स्तोत्रमिति। स्तोत्रं तावत् अर्थकर्म अपूर्वार्थत्वात् प्रयाजादिवत्। किन्तु साम्नः सस्कारकर्मत्वाद् गुणकर्मत्वम्। अर्थात् 'साम' तावत् गुणकर्म सस्कारकर्मत्वात् यतो हि साम्ना खलु स्तोत्रगताक्षराणां स्पष्टतारूपः संस्कारः क्रियते, तेन सामानि स्तोत्रसाधनानि प्रगीतमन्त्रसाध्या इन्द्रादिदेवतानां या स्तुतिः, सा 'स्तोत्र' मित्युच्यते। प्रगीतमन्त्रसाध्यत्वं च साम्ना अभिव्यक्तऋगक्षरसाध्यत्वम्। अप्रगीतमन्त्रसाध्यं गुणिनिष्ठगुणाभिधानं शस्त्रम्। गानक्रियाविशेषो हि 'साम' इत्युच्यते। स्तोत्रं

---

(१०३) प्रयाजादि के समान अपूर्व सम्पादक होने के कारण स्तोत्र 'अर्थकर्म' कहलाता है। साम संस्कार-सम्पादक कर्म है। इसलिए वह 'गुणकर्म' कहलाता है, क्योंकि स्तोत्र के साधनीभूत स्तोत्रीय अक्षरों की अभिव्यक्ति रूप संस्कार के द्वारा साम को स्तोत्र का साधन माना गया है। प्रगीत अर्थात् गान-युक्त मन्त्र से साध्य इन्द्रादि गुणी में रहने वाले गुणों का अभिधान (कथन) को स्तोत्र कहते हैं। 'प्रगीत मन्त्र साध्य' का साम से अभिव्यक्त ऋक् के अक्षरों से साध्य अर्थ है। अप्रगीत अर्थात् गान-रहित मन्त्रों से साध्य इन्द्रादि गुणी में रहने वाले गुणों का अभिधान (कथन) को शस्त्र कहते हैं। गान-क्रियाविशेष को साम कहते हैं। इससे ऋक् पर विशेष रूप से गान प्रस्तुत किया जाता है। स्तोत्र के साधनीभूत ऋचाओं को स्तोत्रीय कहते हैं। इन्हीं को त्रिवृत्, पञ्चदशत्व,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गानक्रियाविशेषः साम्ः। स्तोत्रसाधनीभूता ऋचः स्तोत्रीयाः। तदेतत्त्रिवृत्पञ्चदशत्वादिसङ्ख्याविशेषः स्तोमः। इत्येतेषां भेदः।

तथा च बृहद्रथन्तरपृष्ठयोः भिन्नापूर्व्वार्थत्वेन एकार्थत्वाभावेऽपि 'बृहद्वा पृष्ठं कार्य्यं, रथन्तरं वा पृष्ठं कार्य्यम्' इति वचनबलादेव विकल्पः।

(१०४) क्वचित् व्यवस्थितविकल्पः—द्वितीयप्रयाजादि-

वक्तुमुपयुज्यमाना ऋचः 'स्तोत्रीया' इत्युच्यन्ते। तासां स्तोत्रीयाख्यानामृचा 'त्रिवृत्', 'पञ्चदशे'त्यादिसंख्याविशेषः 'स्तोम'शब्देनोच्यते। इत्थमुक्तानां पदार्थानां भेदोऽभिहितः। तथा च—बृहत्पृष्ठस्तोत्रजन्यमपूर्वं भिन्नम्, रथन्तरपृष्ठस्तोत्रजन्यं च अपूर्वं भिन्नम्। तेन तयोः स्तोत्रयोरेकार्थत्वाऽभावेऽपि 'बृहत्पृष्ठं कर्तव्यम्' अथवा 'रथन्तरपृष्ठं कर्तव्यम्' इति वचनबलादेव अत्र विकल्पः स्वीक्रियते।

(१०४) क्वचिदिति। क्वचित्स्थलेषु 'व्यवस्थितविकल्पो' भवति। यथा—पञ्चप्रयाजानां मध्ये द्वितीयप्रयाजकर्मानुष्ठानकाले 'नाराशंस'—

सप्तदशत्व आदि संख्या-विशेष से युक्त स्तोम होता है। यही इन सब का परस्पर भेद है।

उसी प्रकार बृहत्पृष्ठ और रथन्तरपृष्ठ दोनों को भिन्न-भिन्न अपूर्व के सम्पादक होने के कारण एक प्रयोजन के साधक न होने पर भी "बृहद्वा पृष्ठं कार्यम्" "रथन्तरं वा पृष्ठं कार्यम्" इन दोनों वचनों के सामर्थ्य से ही विकल्प माना जाता है।

(१०४) कुछ स्थलों में व्यवस्थित विकल्प भी होता है। दूसरे प्रयाजादि कर्मों में नराशंस और तनूनपाद् पदघटित मन्त्रों को एक ही प्रयोजन का साधक होने के कारण विकल्प होता है। वह विकल्प

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कर्म्मणि नराशंसतनूनपान्मन्त्रयोः एकार्थत्वाद् विकल्पः। स च "राजन्यवसिष्ठादीनां द्वितीयः प्रयाजस्तनूनपादन्येषाम्" इति वाक्याद् व्यवस्थित इति व्यवस्थितविकल्पः।

वेदस्य प्रामाण्यविचारः

(१०५) तदेवं चोदनाऽपरपर्य्यायाणां विधिवाक्यानाम् अंशत्रयविशिष्टभावनाविधायकत्वात् प्रामाण्यम्। उद्भिदादीनां नामतया, अर्थवादानां विधेयप्राशस्त्यपरतया,

---

'तनूनपात्' इत्यनयोर्मन्त्रयोरेकप्रयोजनत्वाद् विकल्पः स्वीक्रियते, किन्तु वशिष्ठगोत्रोत्पन्नेन कण्वगोत्रोत्पन्नेन च क्षत्रिययजमानेन 'नाराशंस'पदेन युक्तो द्वितीयः प्रयाजोऽनुष्ठेयः, तद्भिन्नगोत्रोत्पन्नैर्यजमानैः 'तनूनपात्'-पदेन युक्तो द्वितीयः प्रयाजोऽनुष्ठेय इति व्यवस्था 'राजन्यवशिष्ठ' इत्यादि-वाक्येन क्रियते। तस्मादत्र व्यवस्थितविकल्पः भवति।

(१०५) तदेवमिति—इत्थं चोदनेत्यपरसंज्ञकानां विधिवाक्यानाम् अंशत्रयविशिष्टार्थभावनाविधायकत्वात् प्रामाण्यम्। उद्भिदादिवाक्यानां, कर्मनामधेयप्रतिपादकत्वात् प्रामाण्यम्। अर्थवादवाक्यानां विधेयार्थस्य

"राजन्यवसिष्ठादीनाम्" इस वाक्य से व्यवस्थित है। अतः यह व्यवस्थित विकल्प कहलाता है।

(१०५) चोदना और विधि दोनों एक दूसरे के पर्याय हैं। तीनों अंशों से युक्त भावना का विधायक होने के कारण उनका प्रामाण्य होता है। उद्भिदादि-पद-घटित वाक्यों का नामधेय रूप से, अर्थवादों का विधेय पदार्थ के प्राशस्त्यादि-प्रतिपादन द्वारा तथा मन्त्रों का अनुष्ठेय पदार्थों का स्मारक होने के कारण प्रामाण्य होता है। इस प्रकार सम्पूर्ण वेद का धर्माधर्म रूप अलौकिक पदार्थ के प्रतिपादन के प्रति प्रामाण्य सिद्ध होता है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मन्त्राणामनुष्ठेयार्थस्मारकतया प्रामाण्यमिति कृत्स्नस्य वेदस्यालौकिके धर्म्माधर्म्माख्येऽर्थे प्रामाण्यं स्थितम् ॥

अथ स्मृत्यादिप्रामाण्यविचारः

(१०६) मन्वादिप्रणीतानां स्मृतीनामपि वेदमूलकत्वा-

प्राशस्त्यप्रतिपादकत्वात् प्रामाण्यम्। मंत्रवाक्यानां च अनुष्ठानकालिकपदार्थस्मारकत्वात् प्रामाण्यम् इतिरीत्या समस्तो वेदः, अलौकिके धर्माऽधर्मरूपेऽर्थे प्रमाणमिति आकरग्रन्थेषु प्रतिपादितम्। इत्थं वेदप्रामाण्यमधिकृत्य विचारोऽनुष्ठितः। एवं च विधि-नामधेयाऽर्थवाद–मन्त्ररूपैर्वेदं चतुर्धा विभज्य तत्र प्रत्येकस्य प्रामाण्यं व्यवस्थापितमिति विज्ञेयम्।

अथ स्मृत्यादिप्रामाण्यविचारः

(१०६) मन्वादिप्रणीतानामिति। वेदमनुसृत्य मन्वादिभिर्विर-

शङ्का—विधि आदि के प्रामाण्य का निरूपण किया गया, वेदों में निषेधात्मक वाक्य भी देखे जाते हैं। उनका धर्माधर्म के प्रति कैसे प्रामाण्य होगा? ग्रन्थकार ने भी इसका निर्देश नहीं किया है। अतः सम्पूर्ण वेद का प्रामाण्य कैसे सिद्ध हुआ?

समाधान—वेदों में निषेध के प्रतिपादक वाक्य भी देखे जाते हैं और उनका भी धर्माधर्म के प्रति प्रामाण्य सिद्ध होता है। निषेध-वाक्य अनर्थ के हेतुभूत कर्मों से पुरुष की निवृत्ति-सम्पादक होने के कारण प्रमाण होते हैं। निवृत्ति में ही उनका तात्पर्य होता है। जिस प्रकार विधि-वाक्य प्रवृत्ति-सम्पादक होते हैं और स्वप्रवर्त्तकत्व के निर्वाह के लिए यागादि को श्रेयः साधन बताते हुए उसमें पुरुष की प्रवृत्ति कराता है, उसी प्रकार निषेध-वाक्य भी निवर्त्तना का प्रतिपादन करते हैं और स्वनिवर्त्तकत्व-निर्वाह के लिए कलञ्ज भक्षणादि को अनर्थ का साधन बताते हुए उससे पुरुष की निवृत्ति का प्रतिपादन करता है। इस प्रकार निवृत्ति के द्वारा धर्माधर्म के प्रति उसका भी प्रामाण्य सिद्ध होता है। इसी रीति से सम्पूर्ण वेद का धर्माधर्म के प्रति प्रामाण्य सिद्ध होता है।

(१०६) वेद-मूलक होने के कारण मनु आदि महर्षियों के द्वारा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्स्याद् अष्टकादौ धर्मे प्रामाण्यम् । "औदुम्बरी सर्वा वेष्ट-

चितानां स्मृतिग्रन्थानामपि वेदमूलकत्वात् प्रामाण्यमस्ति । अर्थात् वेद-तुल्यमेव स्मृतीनामपि प्रामाण्यं स्वीक्रियते । तेन 'अष्टकादौ' धर्मे तासां प्रामाण्यमुचितमेव । अर्थात् स्मृत्युक्तत्वादष्टकादीनामनुष्ठानमवश्यं कर्त्तव्यम् । माघकृष्णाष्टम्यां पितॄनुद्दिश्य क्रियामाणं कर्म 'अष्टका'शब्देनोच्यते । 'अष्टकाः कर्त्तव्याः' इतिस्मृतिवचनेन 'अष्टकाख्यं कर्म' विधीयते । तथैव 'तडागः खनितव्यः', 'प्रपा प्रवर्तयितव्या' इत्यादीनि अन्यान्यपि स्मृतिवचनानि सन्ति । अत्र 'अष्टकाः कर्तव्याः' इतीयं स्मृतिः प्रमाणम्, अप्रमाणं वा ? इति सन्देहे सति अष्टकादिस्मृतिवचनस्य वेदमूलकत्वात् तत् प्रमाणमिति सिद्धान्तितम् । अष्टकाविषये मूलभूतं श्रुतिवचनं—"यां जनाः प्रतिनन्दन्ति रात्रिं धेनुमिवायतीम् । संवत्सरस्य या पत्नी स नो अस्तु सुमङ्गली ॥ अष्टकायै सुराधसे स्वाहा इति ।" अस्य अर्थवादवाक्यमपि उपलभ्यते—'एषा वै संवत्सरस्य पत्नी यदेकाष्टका' इति । एवं च अष्टकादिस्मृतीनां वेदमूलकत्वात् प्रामाण्यमभ्युपगन्तव्यमेव । किन्तु श्रुतिस्मृत्योर्यत्र विरोधः स्यात् तत्र स्मृतिरप्रमाणमिति प्रदर्शयितुं 'औदुम्बरी'ति ।

प्रणीत स्मृतियाँ भी धर्माधर्म के प्रति प्रमाण होती हैं, जैसे—'अष्टका कर्त्तव्या' इत्यादि । इस बात को स्मृत्यधिकरण में स्पष्ट रूप से बताया गया है । वह इस प्रकार है :—अष्टका आदि के प्रतिपादक स्मृतियाँ धर्म के प्रति प्रमाण है या नहीं—ऐसी शङ्का करके पूर्वपक्ष किया है कि वे स्मृतियाँ धर्म के प्रति प्रमाण नहीं हो सकतीं, क्योंकि उनका कोई मूल नहीं है । दूसरी बात यह है कि जिन विषयों का प्रतिपादन वेदों में किया है, उन्हीं विषयों का प्रतिपादन स्मृतियों में भी है । अतः स्मृतियाँ निष्प्रयोजन हैं । सिद्धान्त पक्ष में कहा गया है कि स्मृतियों को वैदिक-मन्वादि-प्रणीत होने के कारण उपनयनादि के प्रतिपादक स्मृतियों के समान ये स्मृतियाँ भी वेद-मूलक हैं और इस समय प्रत्यक्ष तथा परोक्ष अनेक वेद-शाखाओं में अनुष्ठेय पदार्थ विस्तृत हैं । उनका एकत्र संक्षेप

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यितव्या" इतिस्मृतिरप्रमाणम्, "औदुम्बरीं स्पृष्ट्वोद्गायेद्" इतिप्रत्यक्षश्रुतिविरुद्धत्वात् । सर्ववष्टने सति श्रुत्युक्तस्पर्श-

ज्योतिष्टोमे सदोनामकस्य मण्डपस्य मध्ये काचिद् औदुम्बरी शाखा निखन्यते। 'उदुम्बर' वृक्षस्य इयं शाखा औदुम्बरीत्युच्यते। तस्याश्च शाखाया: वस्त्रेण वेष्टनं कर्तव्यमिति "औदुम्बरी सर्वा वेष्टयितव्या" इति स्मृतिवचनेन कथ्यते। तत्रायं संशयो भवति यत् इयं सर्ववेष्टनस्मृतिः प्रमाणम् अप्रमाणं वा ? तत्र पूर्वपक्षी वदति—इयं स्मृतिः वेदमूलकत्वात् प्रमाणम् अष्टकादिस्मृतिवत्। अष्टकादिस्मृतिषु इव यद्यपि अत्र मूलभूतं वेदवाक्यं नोपलभ्यते, तथापि तस्य अनुमातुं शक्यत्वात्। तत्र सिद्धान्तो ब्रूते—सर्ववेष्टनस्मृतिवाक्यम अप्रमाणम्। यतो हि 'औदुम्बरीं स्पृष्ट्वा उद्गायेत्'-औदुम्बरीशाखाया: स्पर्शं कृत्वा 'उद्गाता' संज्ञकः ऋत्विक् सामगानं कुर्यात्—इति प्रत्यक्षपठितेन वेदवाक्येन औदुम्बरीशाखायाः स्पर्शो विधीयते। यदि स्मृतिवचनानुरोधेन शाखायाः सर्ववेष्टनं क्रियते चेत् तस्याः शाखायाः स्पर्शो न संभवति। अतः प्रत्यक्षश्रुतिविरुद्धत्वात् इयं सर्ववेष्टनस्मृतिरप्रमाणमेवति विज्ञेयम्। प्रत्यक्षश्रुतिविरुद्धत्वादेव

रूप से प्रतिपादन किया है। इससे ज्ञान-सौकर्य होता है। इसलिए ये स्मृतियाँ धर्म के प्रति प्रमाण होती हैं।

"औदुम्बरी सर्वा वेष्टयितव्या" इत्यादि कुछ स्मृतियाँ धर्म के प्रति प्रमाण नहीं होती हैं, क्योंकि "औदुम्बरीं स्पृष्ट्वोद्गायेत्" इस प्रत्यक्ष श्रुति-वाक्य के साथ उसका विरोध है। श्रुति और स्मृति में परस्पर विरोध होने पर श्रुति ही प्रामाणिक होती है; क्योंकि श्रुति स्वतः प्रमाण है। उसकी प्रामाणिकता के लिए अन्य किसी प्रमाण की अपेक्षा नहीं होती और स्मृति श्रुति की कल्पना करके उसके द्वारा ही स्मृतियों की प्रामाणिकता होती है। इसलिए प्रत्यक्ष श्रुति-विरुद्ध स्मृति प्रमाण नहीं हो सकती। यहाँ पर स्मृति-प्रमाण से सम्पूर्ण शाखा का वेष्टन प्राप्त है और श्रुति से स्पर्श प्राप्त है। सर्ववेष्टन हो जाने पर स्पर्श सम्भव नहीं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नस्य कर्त्तुमशक्यत्वात् । "वैसर्जनहोमीयं वासोऽध्वर्यु-र्गृह्णाति" इत्यादिस्मृतिरप्रमाणम् । श्रुत्यर्थाविरुद्धत्वेऽपि लोभमूलकत्वात् ।

मूलभूतवेदवाक्यानुमानमपि बाधितं भवति । एवंच निर्मूलत्वादियं स्मृतिरप्रमाणमेव । यथैव "वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णाति" इति स्मृतिरपि अप्रमाणम् । सोमयागे अवान्तरदीक्षाविसर्जनप्रसंगे क्रियमाण-होमावसरे यजमानं पत्नीं पुत्रांश्च भ्रातृंश्च अहतेन वाससा प्रच्छाद्य वाससोऽन्ते स्रुग्दण्डमुपनिबध्य जुहोति । तस्मिन् वाससि एवं स्मर्यते–'वै-सर्जनहोमीयं वासोऽध्वर्युर्गृह्णाति' । यजमानपरिवाराच्छादकं वस्त्रं 'वैस-र्जनहोमीयं वसः' इत्युच्यते । इयं स्मृतिः यद्यपि अत्र प्रत्यक्षश्रुतिविरुद्धा नास्ति, तथापि अस्याः स्मृतेर्लोभमूलकत्वात् अप्रमाण्यं निश्चीयते । दृष्टानुसारिणी चैषा कल्पना । अतः प्रत्यक्षश्रुत्या बाधाभावेऽपि मूलभेदात् नेयं स्मृतिः प्रमाणम् । दृष्टश्चात्र मूलभूतो हेतुः लोभ एव । तत एव स्मृत्यु-पपत्तेः । एवं च श्रुतिविरुद्धं दृष्टकारणं च स्मरणमप्रमाणम् ।

हो सकेगा । इसलिए श्रुति से स्मृति का बाध हो जाता है और स्पर्श ही किया जाता है, वेष्टन नहीं । यह विरोधाधिकरण बताया गया है ।

"वैसर्जनहोमीयम्" इत्यादि कुछ स्मृतियाँ भी धर्म के प्रति प्रमाण नहीं होती, क्योंकि ये इन स्मृतियों का श्रुति-प्रतिपादित पदार्थों के साथ विरोध न होने पर भी लोभमूलक हैं । कभी कोई अध्वर्यु लोभवशात् आच्छादन वाले वस्त्र का ले लिया । तन्मूलक ही यह स्मृति है । अतः धर्म के प्रति प्रमाण नहीं होती । दक्षिणा से परिक्रीत ऋत्विजों को वस्त्र लेना समुचित नहीं है; तथापि लोभ के कारण उसने ग्रहण कर लिया । श्रुति और स्मृति में परस्पर बाध्यबाधक भाव न होने पर भी मूलभूत वेद को न रहने के कारण यह स्मृति प्रमाण नहीं होती । यह लोभादिमूलक स्मृत्यप्रामाण्याधिकरण में प्रतिपादित है । इन सब का विस्तृत ज्ञान उन्हीं ग्रन्थों से करना चाहिए ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

(१०७) तथा शिष्टाचारोऽपि स्मृतिद्वारा श्रुतिमूलकत्वात् प्रमाणम्। मातुलसुतापरिणयनादिशिष्टाचारस्त्वप्रमाणम्। "मातुलस्य सुतामूढ्वा" इत्यादिस्मृत्या निषिद्धत्वेन

(१०७) तथेति। तथैव शिष्टानामाचारोऽपि स्मृतिद्वारा श्रुतिमूलकत्वात् प्रमाणम्। किन्तु मातुलकन्याविवाहतुल्याः शिष्टाचारास्तु अप्रमाणम्। यतो हि 'मातुलस्य सुतामूढ्वा' इत्यादि शातातपस्मृतिवचनेन

(१०७) उसी प्रकार शिष्टाचार भी धर्म के प्रति प्रमाण होता है। शिष्टाचार से स्मृति की कल्पना की जाती है और स्मृति से श्रुति की कल्पना की जाती है। इस प्रकार उसकी प्रामाणिकता सिद्ध होती है। वार्त्तिककार ने 'शिष्टाकोपाधिकरण' में इसका विचार प्रस्तुत किया है। वैदिक शिष्टों के द्वारा परिगृहीत होने के कारण शिष्टाचार प्रमाण होता है। जो स्मृतियाँ वेद-विरुद्ध हैं तथा जो शिष्टाचार वेद तथा स्मृतियों से विरुद्ध हैं, वे धर्म के प्रति प्रमाण नहीं होते। इसीलिए होलाकोत्सव आदि शिष्टाचार प्रमाण होते हैं।

स्मृतियों के साथ विरोध होने के कारण मातुल सुता के साथ विवाहादिरूप कुछ शिष्टाचार भी अप्रमाण होते हैं। "मातुलस्य सुतामूढ्वा" इत्यादि स्मृति के द्वारा निषिद्ध होने के कारण यह शिष्टाचार स्मृति विरुद्ध है। प्रायश्चित्त रूप से चान्द्रायण व्रत का उपदेश दिया गया है। प्रायश्चित्त का पापनिवृत्ति ही प्रयोजन है; क्योंकि कहा है कि "प्रायः पापं विजानीयात् चित्तं तस्य विशोधनम्"।

दूसरी बात यह है कि इस शिष्टाचार से स्मृति का अनुमान होगा; परन्तु श्रुतिका अनुमान नहीं हो सकता और अनुमित स्मृति से श्रुति का अनुमान होगा। प्रत्यक्ष स्मृति से अनुमित स्मृति बाधित हो जाती है। वार्त्तिककार ने कहा है कि आचार से स्मृति का और स्मृति से श्रुति का ज्ञान होता है। अतः आचार का व्यवहित प्रामाण्य माना जाता है। उसका प्रामाण्य विप्रकृष्ट होता है। इसलिए इस प्रकार के आचार को

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

स्मृतिविरुद्धत्वात् । तदेवं श्रुतिस्मृत्याचाराणां धर्म्माधर्म्मयोः प्रामाण्यमुक्तम् ।

कर्मभेदनिरूपणम्

(१०८) स च धर्म्मः परस्परं भिन्नः । भेदकप्रमाणानि तु शब्दान्तरादीनि ।

तादृशाचारस्य निषिद्धत्वात् स्मृतिविरुद्धत्वम्। एवं च स्मृतिविरुद्धः शिष्टाचारः अप्रमाणमिति निज्ञेयम् । एवं रीत्या श्रुतेः, स्मृतेः, शिष्टाचारस्य च धर्माधर्मयोः प्रामाण्यम्प्रतिपादितम् ।

भेदकप्रमाणविचारः

(१०८) स चेति । एतावत्पर्यन्तं कृतेन विवेचनेन मीमांसाशास्त्रस्य प्रथमाध्याये वर्णितं धर्माधर्मप्रामाण्यं निरूपितम् । इदानीं द्वितीयाध्याये प्रतिपादितानां धर्मभेदकप्रमाणानां निरूपणार्थं उपक्रमते 'स च धर्मः' इति । उपरि निरूपितो धर्मः परस्परं भिन्नः अस्ति । धर्मस्य भेदकप्रमाणानि शब्दान्तरादीनि षट् भवन्ति । तथाहि—याग-दान-होमानां

प्रमाण नहीं माना जाता । इस प्रकार श्रुति, स्मृति तथा आचार को धर्माधर्म के प्रति प्रामाण्य का प्रतिपादन किया गया ।

(१०८) वह यागादि धर्म भी परस्पर भिन्न होता है । जिस प्रकार अङ्गता-बोधक छः प्रमाण बताये गये हैं, उसी प्रकार शब्दान्तर, अभ्यास, संख्या, संज्ञा, गुण और प्रकरणान्तर नामक कर्म भेद के छः प्रमाण होते हैं । "तथाहि" ग्रन्थ से उनका उदाहरण प्रस्तुत करते हैं—

शब्दान्तर का उदाहरण—'यजति' 'ददाति' 'जुहोति' पद एक दूसरे के पर्याय हैं और उन्हीं शब्दों से प्रतिपादित याग, दान तथा होम परस्पर भिन्न होते हैं; क्योंकि उनके प्रतिपादक शब्द भिन्न-भिन्न हैं । इसी को शब्दान्तर भी कहते हैं । यदि एक ही अर्थ का प्रतिपादन करना होता, तो भिन्न-भिन्न शब्दों का उच्चारण क्यों किया जाता । एक के

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizaqtion by eGangotri

तथाहि—यागदानहोमानां यजतिददातिजुहोत्यपर-पर्यायशब्दप्रतिपाद्यत्वाच्छब्दान्तराद्भेदः। स्वस्वत्वनिवृत्ति-पूर्वकं परस्वत्वापादनं दानम्।

(१०९) "समिधो यजति" इत्यादीनां पञ्चानां वाक्यानां

'यजति-ददाति-जुहोति' इति असमानार्थकशब्दैः प्रतिपादितत्वात् तेषां शब्दान्तराद् भेदो भवति। ज्योतिष्टोमयागे (१) 'सोमेन यजेत (२) हिरण्य-मात्रेयाय ददाति (३) दाक्षिणानि जुहोति' इति त्रिषु वाक्येषु निरूपिता यागदानहोमाः सन्ति। तत्र शब्दान्तराख्येन प्रमाणेन यागदानहोमाः परस्परं भिन्ना भवन्ति। स्व-स्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनं 'दानम्' इति दानपदार्थः। तथैव देवतामुद्दिश्य क्रियमाणो द्रव्यत्यागः इति 'याग'-पदार्थः। स यदा प्रक्षेपविशिष्टो भवति तदा स एव 'होम' इत्युच्यते।

(१०९) समिधो यजतीति। अभ्यासाख्यं 'कर्म-(धर्म) भेदकप्रमाणं'

ही पर्याय अनेक शब्दों के उच्चारण से कर्म भेद की प्रतीति होती है। 'यजति' से याग, 'ददाति' से दान, तथा 'जुहोति' से होत्र का बोध होता है। पहले कहा जा चुका है कि देवता को उद्देश्य करके द्रव्य का त्याग याग और प्रक्षेप-विशिष्ट को होम कहते हैं। स्व (अपना) स्वत्व (अधिकार) का निवृत्ति पूर्वक पर (दूसरे व्यक्ति) के स्वत्व (अधिकार) का आपादन (सम्पादन) करना ही दान कहलाता है। इस प्रकार का दान पदार्थ "विप्राय गां ददाति" इत्यादि उदाहरणों के लिए किसी प्रकार उचित हो सकता है; परन्तु 'रजकाय वस्त्रं ददाति' 'खण्डिकोपाध्यायः शिष्याय चपेटां ददाति' इत्यादि स्थलों में परस्वत्वापादन रूप अर्थ सङ्गत नहीं होता। "रजकाय वस्त्रम्" स्थल में कुछ समय के लिए परस्वत्वापादन रहता भी है; किन्तु 'खण्डिकोपाध्यायः' इत्यादि उदाहरणों में सम्बन्ध या उद्देश्यमात्र ही दान का अर्थ होता है।

(१०९) अभ्यास का उदाहरण—"समिधो यजति" "बर्हिर्यजति"

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizaction by eGangotri

मध्ये एकस्य कर्म्मविधायकत्वमन्येषां तस्मिन् कर्म्मणि गुणविधायकत्वमित्यत्र नियामकाभावात्सर्वेषां सर्वविधायकत्वे स्थिते विहितस्य कर्म्मणः पुनर्विधानं व्यर्थमिति पुनर्विधान-सामर्थ्यात् पूर्ववाक्यविहितकर्मापेक्षयोत्तरोत्तरवाक्यविहितस्य कर्म्मणो भेदः सिध्यतीत्येतादृशस्थलेष्वविशेषपुनःश्रुतिरूपाद्य-जतिपदाभ्यासात् कर्मभेदः ।

दर्शयितुम् आरभते । अत्र 'आदि'पदेन 'तनूनपातं यजति', 'इडो यजति', 'बर्हिर्यजति','स्वाहाकारं यजति'इत्येतानि वाक्यानि ग्राह्याणि । एतेषु पञ्चसु वाक्येषु एकस्य वाक्यस्य कर्मविधायकत्वे इतरेषां तत्र कर्मणि गुणविधाय-कत्वे नियामकप्रमाणाभावेन सर्वाण्यपि पञ्चवाक्यानि कर्मविधायकानीति निर्णीते सति एकवारं विहितस्य कर्मणः पुनर्विधानं व्यर्थं स्यादिति पुन-र्विधानसामर्थ्यात् पूर्ववाक्येन विहितात् कर्मणः सकाशात् अपरेण वाक्येन विहितं यत् कर्म तदवश्यं भिन्नमिति सिद्ध्यति । अतः एतादृशेषु स्थलेषु अविशेषपुनःश्रुतिरूपात् 'यजति'पदाभ्यासात् कर्मभेदो भवति । न विद्यते विशेषो यस्याः सा अविशेषा । अविशेषा चासौ श्रुतिश्चेति अविशेषपुनः-श्रुतिः । अत्र खलु यस्मिन् विधिवाक्ये धात्वर्थ एव विहितो भवेत्, न तदितरः तादृशस्य विधेः पुनः पुनः श्रवणम् 'अविशेषपुनःश्रुति'रित्युच्यते । 'यजति'पदस्य पुनरुक्त्या (अभ्यासेन) अत्र कर्मभेदो भवति । तस्मात् पञ्चभिर्वाक्यैर्विहितानि पञ्चकर्माणि परस्परं भिन्नानीतिविज्ञेयम ।

"तनूनपातं यजति" "इडो यजति", "स्वाहाकारं यजति" ये पाँच वाक्य पाँच प्रयाजों के विधायक हैं। इनमें से एक को कर्म का विधायक मानने तथा अन्य सभी को उसी विहित कर्म-सम्बन्धी गुण का विधायक मानने में कोई प्रमाण नहीं है। इसलिए सभी वाक्यों को कर्म के विधायक मान लेने पर विहित कर्म का पुनः पुनः विधान करना व्यर्थ हो जायेगा; किन्तु बार-बार विधान किया गया है। अतः पुनर्विधान के सामर्थ्य से

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

(११०) "तिस्र आहुतीर्जुहोति" इत्यत्र जुहोतिपदाभ्यासाभावेऽपि जुहोतीत्यर्थे होमे त्रित्वसङ्ख्याऽन्वयात्परस्परं भिन्नास्त्रयो होमा इति सङ्ख्ययाऽत्र कर्म्मभेदः ।

(१११) "अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेत" इति ज्योतिष्टोमप्रकरणे श्रुतानामपि ज्योतिराख्यानां त्रयाणां यागानां ज्योतिष्टोम-

---

(११०) तिस्र आहुतीर्जुहोतीति । 'तिस्र आहुतीर्जुहोति' अस्मिन् वाक्ये 'जुहोति'पदस्य अभ्यासात्मकपुनरुक्त्यभावेऽपि होमार्थकेन 'जुहोति'-पदेन सह 'त्रित्व'संख्याया अन्वयात् परस्परं भिन्नाः 'त्रयो होमाः' इत्यर्थो भवति । अतः 'संख्या'संज्ञकेन प्रमाणेन अत्र कर्मभेदो जातः इति ज्ञेयम् ।

(१११) अथैष इति । 'अथैष ज्योतिः' इति वाक्येन उक्तानां 'ज्योतिः,—विश्वज्योतिः,—सर्वज्योतिः' इतिसंज्ञकानां त्रयाणां यागानां

पूर्व वाक्य से विहित कर्म की अपेक्षा उत्तरोत्तर वाक्यों से विहित कर्म का भेद सिद्ध होता है। इस प्रकार इन स्थलों में सामान्य रूप से पुनः पुनः श्रवण रूप 'यजति' पद के अभ्यास से कर्म का भेद होता है। अतः उन पाँचों वाक्यों से विहित पाँच भिन्न-भिन्न प्रयाज होते हैं।

(११०) संख्या का उदाहरण—"तिस्र आहुतिर्जुहोति" इत्यादि में 'जुहोति' पद का अभ्यास अर्थात् पुनरावृत्ति नहीं है, तथापि 'जुहोति' पदार्थ होम में त्रित्व संख्या का अन्वय होने से परस्पर भिन्न तीन होमों का विधान है। इस प्रकार इस स्थल में त्रित्व संख्या के द्वारा कर्म का भेद होता है।

(१११) संज्ञा का उदाहरण—ज्योतिष्टोम प्रकरण में "अथैष ज्योतिः" "अथैष विश्वज्योतिः" "अथैष सर्वज्योतिः" ये तीन वाक्य सुने जाते हैं। ज्योतिष्टोम प्रकरण में श्रुत होने पर भी ज्योतिनामक तीन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

संज्ञाऽपेक्षया पृथक् संज्ञाकरणात् ज्योतिष्टोमापेक्षया भेदः। भिन्नसंज्ञावशादेव त्रयाणां परस्परं भेद इति संज्ञया कर्म्म-भेदः।

(११२) तथा "तप्ते पयसि दध्यानयति सा वैश्वदेव्या-मिक्षा वाजिभ्यो वाजिनम्" इत्यत्र "वैश्वदेवी" इतिवाक्ये विश्वदेवदेवताऽऽमिक्षाद्रव्यसम्बन्धानुमितो यागो विधीयते। "वाजिभ्यो वाजिनम्" इत्यत्रापि वाजिदैवत्य—वाजिनद्रव्यकं

ज्योतिष्टोमप्रकरणे पाठे सत्यपि ज्योतिष्टोमसंज्ञात्रयापेक्षया उक्तानां त्रयाणां यागानां पृथक्संज्ञाकरणात् ज्योतिष्टोमसंज्ञकाद् यागात् तेषां भेदः। एवंच पृथक् संज्ञावशात् एतेषां त्रयाणां परस्परं भेदो जातः। तेन अत्र 'संज्ञया' कर्मभेद इति वेद्यम्।

(११२) तथेति। 'तप्ते पयसि दध्यानयति' अत्र स्थले 'सा वैश्व-देव्यामिक्षा' इति वाक्यं द्रव्य-(आमिक्षा)-देवता (विश्वदेव) सम्बन्धेन अनुमितस्य यागस्य विधायकमस्ति। तथैव 'वाजिभ्यो वाजिनम्' इति वाक्येन 'वाजि' देवताक—वाजिनद्रव्यकस्य च कस्यचित् यागान्तरस्य विधानं क्रियते। अत्र विश्वदेवा इति देवता, विश्वदेवदेवता। आमिक्षा इति द्रव्यम् आमिक्षाद्रव्यम्। तयोः सम्बन्धः, तेन अनुमितः— विश्वदेवदेवतासंबंधानु-मितः पूर्वविहिते 'वैश्वदेव' संज्ञके यागे वाजिनद्रव्यात्मकस्य गुणस्य विधानं

यागों का ज्योतिष्टोम संज्ञा की अपेक्षा अलग-अलग संज्ञा करने के कारण ये तीनों भिन्न-भिन्न कर्म हैं। भिन्न-भिन्न संज्ञा के कारण ही तीनों परस्पर भिन्न कर्म हैं। इस प्रकार संज्ञा के द्वारा कर्म का भेद होता है।

(११२) गुण का उदाहरण— उसी प्रकार "तप्ते पयसि०" इत्यादि वाक्य में घटकी भूत "वैश्वदेवी" पदघटित वाक्य में विश्वेदेव देवता और आमिक्षा रूप द्रव्य के सम्बन्ध से अनुमित याग का विधान होता है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

कर्मान्तरं विधीयते। न तु पूर्वविहिते वैश्वदेवयागे वाजिन-द्रव्यरूपो गुणो विधीयते पूर्वयागस्याऽऽमिक्षागुणावरुद्धत्वेन तत्र वाजिनस्य निवेशायोगात्। न च व्रीहियववद्विकल्पः। वाजिनामिक्षयोः समशिष्टत्वाभावात् विषमशिष्टयोर्विकल्पा-योगात्। वैश्वदेवयागोत्पत्तिवाक्ये एवामिक्षागुणः शिष्यत इत्युत्पत्तिशिष्टः। शिष्यते विधीयते इत्यर्थः। वैश्वदेव-

---

न संभवति। यतो हि पूर्वविहितो वैश्वदेवाख्यो यागः, आमिक्षाख्येन गुणेन सम्बद्धः (अवरुद्धः)। तेन तत्र यागे वाजिनाख्यगुणस्य सन्निवेशो न भवितुमर्हति। व्रीहि-यववत् अत्र विकल्पोऽपि न संभवति। यतो हि वाजिनाख्यद्रव्यस्य—आमिक्षाख्यद्रव्यस्य च समशिष्टत्वं (समानबलत्वं) नास्ति। द्वयोर्विषमशिष्टत्वं (प्रबल—दुर्बलभाववत्त्वं) अस्ति। तस्मात् विषमशिष्टयोः (प्रबल—दुर्बलयोः) पदार्थयोर्विकल्पो नैव भवति। विकल्पस्तु समशिष्टयोरेव भवति। 'वैश्वदेव'यागस्य उत्पत्तिवाक्ये एव 'आमिक्षा'ख्यो गुणः विहितोऽस्ति। अतः स उत्पत्तिवाक्यशिष्टोऽस्ति। 'शिष्यते' इत्यस्यार्थः 'विधीयते' इति। तेन 'शिष्टः' विहित इति यावत्। 'सा वैश्वदेव्यामिक्षा'

"वाजिभ्यो वाजिनम्" इस वाक्य से भी वाजिदेवताक और वाजिन द्रव्यक भिन्न कर्म का ही विधान होता है। दोनों भिन्न-भिन्न कर्म हैं। पूर्व वाक्य से विहित वैश्वदेव याग में वाजिन द्रव्य रूप गुण का विधान नहीं किया जाता है; क्योंकि पूर्व वाक्य से विहित याग का आमिक्षा रूप गुण से अवरुद्ध हो जाने के कारण उसमें वाजिन का निवेश ही नहीं हो सकता है। अतः उसका गुण विधायकत्व सम्भव नहीं है। जिस प्रकार "व्रीहि-भिर्यजेत" 'यवैर्यजेत" इन वाक्यों से विहित व्रीहि और यव का विकल्प होता है, उसी प्रकार इस स्थल में भी आमिक्षा और वाजिन का विकल्प नहीं माना जा सकता; क्योंकि वाजिन और आमिक्षा समशिष्ट (समविहित) नहीं है और विषमशिष्ट (भिन्न-भिन्न वाक्यों से विहित) का विकल्प

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाक्यादुत्पन्ने कर्म्मणि वाक्यान्तरेण शिष्टो विहितो वाजिन-गुण उत्पन्नशिष्टः। तयोर्मध्ये ह्युत्पत्तिशिष्टः प्रबलः, कर्मोत्पत्तिवेलायामेव कर्माङ्गत्वेन प्राप्तत्वात्। उत्पन्नशिष्टो वाजिनगुणोऽनन्तरं प्रमितोऽपि विलम्बितत्वेन दुर्बलत्वात् तत्पूर्वकर्म्मणि निवेशमलभमानो वाजिरूपदेवतान्तरसम्बन्धात्

इति वैश्वदेववाक्यात् उत्पन्ने (विहिते) कर्मणि, अपरेण (केनचिदन्येन) वाक्येन (वाक्यान्तरेणोतयावत्) विहितः (शिष्टः) यो 'वाजिन'गुणः, स उत्पन्नशिष्टः (उत्पन्नवाक्यविहितः) अस्ति। उत्पत्तिशिष्टोत्पन्न-शिष्टयोर्मध्ये उत्पत्तिशिष्टः प्रबलः। यतो हि सः कर्मोत्पत्तिवेलायामेव कर्माङ्गत्वेन विज्ञातो भवति। उत्पन्नशिष्टो 'वाजिनगुणः' अनन्तरं ज्ञातोऽपि विलम्बितत्वेन दुर्बलो भवति। तेन तस्य वैश्वदेवयागे निवे-शमलभमानत्वात् 'वाजि'रूपदेवतान्तरेण सह सम्बन्धो भवति। 'वाजिभ्यः' इति चतुर्थ्या 'वाजिरूपा' देवता ज्ञायते। तस्मात् 'वाजिभ्यो वाजिनम्' इति वाक्येन पूर्वोक्ताद् वैश्वदेवयागाद् 'वाजिनयागो' भिन्न इति बोध्यते। 'वाजिभ्यो वाजिनम्' इति वाक्यं 'गुणप्रमाण'बलेन कर्मान्तरस्य विधानं

नहीं होता। वैश्वदेव याग के उत्पत्ति वाक्य में ही आमिक्षा रूप गुण का विधान है। अतः वह उत्पत्ति शिष्ट है। शिष्यते, विधीयते अर्थात् जिसका विधान किया जाता है, वही विहित या शिष्ट कहलाता है। वैश्वदेव याग से उत्पन्न (ज्ञात) कर्म में वाक्यान्तर से शिष्ट (विहित) वाजिन रूप गुण उत्पन्नशिष्ट कहलाता है। उन दोनों में उत्पत्तिशिष्ट प्रबल होता है, क्योंकि वह कर्मोत्पत्ति काल में ही कर्म के अङ्गरूप से प्राप्त (ज्ञात) है। उत्पन्नशिष्ट वाजिन रूप गुण पश्चात् प्रमित होने पर भी विलम्बोपस्थिक होने के कारण दुर्बल होता है। अतः तत्पूर्वक कर्म में समावेश न होने पर भी वाजिन रूप अन्य देवता के सम्बन्ध से उसके प्रतिपादक वाक्य को कर्मान्तर का विधायक माना जाता है। इस प्रकार

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्ववाक्यस्य कर्मान्तरविधायकत्वमानयतीति गुणाद्भेदः। तत्र घनीभूतं पय आक्षिमा, शिष्टं जलं वाजिनम्।

(११३) तथा कुण्डपायिनामयने श्रूयते—"उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति" इति। अत्र पूर्वं कर्म्म किञ्चिदपि सन्निहितं न भवति अपूर्वकर्मसन्निधानरूपात्

करोति। एवंचात्र 'गुणात् कर्मभेद' इति विज्ञेयम्। तप्ते पयसि दधिमिश्रणानन्तरं यत् घनीभूतं पयस्त 'आमिक्षा' इत्युच्यते। तत्र अवशिष्टं च जलं 'वाजिनम्' इत्युच्यते।

॥ इति कर्मभेदनिरूपणम् ॥

(११३) तथेति। 'कुण्डपायिनाम् अयनम्' इति नामके सत्रयागे श्रूयते "उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति" इति। 'अहीनः' 'सत्रं' चेति सोमयागस्य द्वौ प्रकारौ। तत्र द्व्यहप्रभृति द्वादशाहपर्यन्ता अहीना इत्युच्यन्ते। त्रयोदशरात्रप्रभृतिसहस्रसंवत्सरपर्यन्तानि रात्रिसत्राण्युच्यन्ते। 'कुण्डपायिनामयन'नामकं संवत्सरसाध्यं सत्रम्। अस्मिन् सत्रप्रकरणे उक्तं "उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति"—'उपसत्' संज्ञकं कर्म कृत्वा मासं यावत् 'अग्निहोत्र'कर्मणः अनुष्ठानं कर्तव्यम्—इत्यस्य वाक्यस्य सन्निधौ किमपि कर्म पूर्वं नाभिहितम्। तेन अपूर्वकर्मसन्नि-

---

गुण के द्वारा भेद प्रतिपादित होता है। गरम दूध में दध्यानयन (दधि डालने) करने पर वह दूध दो भागों में बँट जाता है। उसके घनीभूत भाग आमिक्षा और अवशिष्ट जल भाग को वाजिन कहते हैं।

(११३) प्रकरणान्तर का उदाहरण—कुण्डपायी ऋत्विजों के अयन में श्रुत है कि "उपसद् के द्वारा अनुष्ठान करके मासपर्यन्त अग्निहोत्र करना चाहिए।" इस कर्म के विधान से पहले कोई भी कर्म सन्निहित नहीं है अर्थात् इस कर्म का पूर्व के किसी कर्म के साथ सम्बन्ध नहीं है। इसलिए अपूर्व कर्म के सन्निधान रूप प्रकरणान्तर से प्रसिद्ध अग्निहोत्र-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकरणान्तरात् प्रसिद्धाग्निहोत्रधर्म्मकं तन्नामकं कर्मान्तरं विधीयते; नत्वग्निहोत्रशब्देन प्रसिद्धाग्निहोत्रमनूद्य गुणविधिः। प्राप्ते कर्म्मणि आनन्तर्य-मासरूपानेकगुणविधौ वाक्यभेदापत्तेरिति प्रकरणान्तरादत्र कर्म्मभेदः। प्रसिद्धाग्निहोत्रं नैयमिकाग्निहोत्रम्—नित्याग्निहोत्रमिति यावत्। तदेवं शब्दान्तरा-

धानात्मकेन प्रकरणान्तरेण प्रसिद्धस्य अग्निहोत्रकर्मणः धर्मैर्युक्तम् अन्यदेव अग्निहोत्रसंज्ञकं कर्म अनेन वाक्येन विधीयते। अत्र अर्थात् 'उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति' इत्यनेन वाक्येन 'यावज्जीवमग्निहोत्रं जुहोति' इतिवाक्यप्रसिद्धम् 'अग्निहोत्र'संज्ञकं कर्म अनूद्य गुणविधानमिति न मन्तव्यम्। यतो हि प्राप्ते कर्मणि—'उपसद्यागानन्तरत्व'मित्येकस्य गुणस्य 'मासात्मककालत्व'मित्यपरस्य गुणस्य विधाने कृते सति अनेकगुणविधानात्मको वाक्यभेदाख्यो दोषः समुत्पद्येत भिन्नप्रकरणत्वात्। अतः 'प्रकरणान्तरा'ख्येन प्रमाणेन अत्र कर्मभेद इति बोद्धव्यम्। प्रसिद्धाग्निहोत्रं हि नित्याग्निहोत्रम्, नैयमिकाग्निहोत्रमितियावत्। नियमेन कर्तव्यमिति नैयमिकम्। नैयमिकं नाम नित्यम्। अयमाशयः—कुण्डपायिनामयने श्रूयते—"उपसद्भिश्चरित्वा" "मासमग्निहोत्रं जुहोति"—अत्र प्राप्तं नित्याग्निहोत्रमनूद्य मासलक्षणो गुणोऽप्राप्तत्वाद् विधीयते इति पूर्वपक्षं कृत्वा सिद्धान्ती ब्रूते—अत्र किं मास एव विधीयते उत 'उपसद्भिश्चरित्वा' इत्युक्तोपसदाऽपि। नाद्यः, उपसदामपि नित्याग्निहोत्रप्राप्तिरहितानां पूर्वपक्षे विधातव्यत्वात्। न द्वितीयः, प्राप्ते कर्मणि अनेक गुणविधौ वाक्यभेदापत्तेः। ननु मा भूत्तर्हि गुणविधिः। कर्मान्तरत्वे

धर्मक तथा अग्निहोत्र नामक कर्मान्तर का विधान है। यहाँ प्रयुक्त अग्निहोत्र शब्द से पहले से प्रसिद्ध अग्निहोत्र का अनुवाद करके गुण का विधान नहीं किया जाता है, क्योंकि कर्म ज्ञात होने पर आनन्तर्य तथा मासरूप अनेक गुण का विधान मानने पर वाक्यभेद की आपत्ति होगी।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भ्यास-सङ्ख्या-संज्ञा-गुणनामधेय-प्रकरणान्तरैः कर्म्मभेदो दर्शितः ।

अथ प्रमेयादिविचारः

(११४) तत्र वेदादिप्रमेयोऽर्थस्त्रिविधः—क्रत्वर्थः, पुरु-

किं प्रमाणम् इति चेत् । 'प्रकरणान्तरम्' इति ब्रूमः । न हि एतत् नित्याग्निहोत्रस्य प्रकरणम्, असन्निहितत्वात् । अयनस्य हि एतत् प्रकरणम् । अयनमारभ्य अधीतत्वात् । का तर्हि नित्याग्निहोत्रे गुणविधिशङ्का इति चेत् । प्रकरणस्य असमर्पकत्वेऽपि अग्निहोत्रशब्देन एतत्समर्पणात् एषा शंका भवति । सा च वाक्यभेदापत्त्या निराकृता भवति । तथा सति स्वतः सिद्धं प्रकरणभेदं निराकृत्य प्रकरणैक्यापादनेन गुणं विधापयितुं प्रवृत्तस्य अग्निहोत्रशब्दस्य शक्तौ निरुद्धायां तदवस्थः प्रकरणभेदो नित्याग्निहोत्रात् इदं कर्म भिनत्ति । अत्र अग्निहोत्रशब्दः धर्मातिदेशार्थ इति सप्तमे स्थितम् । एवं च प्रकरणान्तरमेव अत्र भेदहेतुः । प्रसिद्धं च तत् अग्निहोत्रं च प्रसिद्धाग्निहोत्रम् । तस्य धर्मा इव धर्मा यस्य तत् प्रसिद्धाग्निहोत्रधर्मकम् । तदेवं (१) 'शब्दान्तरम्, (२) अभ्यासः, (३) संख्या, (४) संज्ञा, (५) गुणः, (६) प्रकरणान्तरम्' इत्येतैः कर्मभेदकप्रमाणैः कर्मभेदः प्रदर्शितः । इत्थम् मीमांसाशास्त्रस्य द्वितीयाध्यायप्रतिपाद्यविषयस्योपसंहारं प्रदर्शयितुम् 'इति कर्मभेदनिरूपणम्' इत्युक्तमस्ति ।

अथ प्रमेयादिविचारः

(११४) तत्रेति । वेदेन, स्मृत्या, शिष्टाचारेण च प्रतिपादितोऽर्थः

अतः इस स्थल में प्रकरणान्तर रूप हेतु से कर्मभेद का प्रतिपादन किया जाता है । सर्वजनप्रसिद्ध अग्निहोत्र नैयमिक (नित्य) अग्निहोत्र है । इस प्रकार शब्दान्तर, अतिमास, संख्या, संज्ञा, गुणनामधेय (गुण) तथा प्रकरणान्तर रूप छः कारणों से कर्मभेद का निरूपण किया गया ।

(११४) प्रमाण-निरूपण के पश्चात् प्रमेय का निरूपण प्रस्तुत करते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

र्थार्थः, उभयार्थश्चेति । तत्र प्रयाजादिकं केवलं क्रत्वर्थः, फलं तत्करणं च पुरुषार्थः, यथा—ज्योतिष्टोमादि। स्वर्गश्च। दध्यादि तूभयरूपम्—"दध्ना जुहुयाद्" इति फलासंयुक्त-वाक्येन क्रत्वर्थत्वात् "दध्नेन्द्रियकामस्य जुहुयात्" इत्यनेन फलाय विधानात् पुरुषार्थत्वात् । तदुक्तम्—"एकस्य तूभय-

(प्रमेयः) त्रिविधः—(१) क्रत्वर्थः, (२) पुरुषार्थः, (३) उभयार्थः इति। तत्र प्रयाजादिकं केवलं क्रत्वर्थः । फलं तत्साधनं (तत्करणं) च पुरुषार्थः। यथा—स्वर्गादिः, ज्योतिष्टोमादिश्च । दध्यादि तु उभयार्थम् (उभयरूपम्) अस्ति । यतो हि 'दध्ना जुहोति' इति वाक्यं फलेन असंयुक्तमस्ति, इति-कृत्वा 'दधि' क्रत्वर्थम्, तथैव 'दध्नेन्द्रियकामस्य जुहुयात्' इति वाक्येन दध्नः फलार्थत्वेन विधानात् पुरुषार्थत्वमपि अस्ति । तदुक्तम्—"एकस्य

हैं; क्योंकि "मानाधीना मेयसिद्धिः" इस न्याय के अनुसार पहले प्रमाणों का ज्ञान होना आवश्यक है। उसके बाद ही प्रमेय ज्ञान होगा; क्योंकि प्रमाण के अधीन ही प्रमेय की सिद्धि है । धर्म के प्रति वेदादि ही प्रमाण-भूत है। उनका भेदोपभेद के साथ निरूपण किया गया । अब प्रमेय का विचार आवश्यक ही हो जाता है ।

वेदादि प्रमाणों के प्रमेय तीन प्रकार के हैं—क्रत्वर्थ, पुरुषार्थ और उभयार्थ अर्थात् क्रत्वर्थ और पुरुषार्थ दोनों। उनमें प्रयाजादि केवल क्रत्वर्थ होते हैं। वे क्रतु के अङ्ग हैं और अङ्ग होने के कारण उनके उप-कारक हैं। प्रयाजापूर्व परमापूर्व के सहायक होते हैं। उनका अपना स्वतन्त्र कोई फल श्रुत नहीं है। इसलिये वे पुरुषार्थ नहीं हो सकते । फल और फल के साधन पुरुषार्थ होता है। पुरुषों के द्वारा अर्थ्यमान होने के कारण पुरुषार्थ कहा जाता है । पुरुष फल या फल के साधन को चाहता है, अन्य किसी को नहीं । इसलिए ये दोनों पुरुषार्थ कहलाते हैं, जैसे—

१३ मी०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रूपत्वे संयोगपृथक्त्वम्" इति (पू० मी० अ० ४ पा० ३ अधि० ३३ सू० ३)।

संयोगो वाक्यं, तस्य पृथक्त्वं भेदः, एकस्य उभयार्थत्वे नियामक इत्यर्थः ।

(११५) क्रत्वर्थे प्रयाजादौ क्रतुः प्रयोजकः । पुरुषार्थे फलं प्रयोजकम् । प्रयोजकत्वं नामानुष्ठापकत्वमित्यर्थः ।

तूभयत्वे संयोगपृथक्त्वम्" यदा एक एव पदार्थः उभयार्थी भवति, तदा स संयोगपृथक्त्वन्यायस्य विषयो भवति । 'संयोगो' नाम वाक्यम्, 'पृथक्त्वं' नाम भेदः । स वाक्यभेदः एकस्य पदार्थस्य उभयार्थत्वे नियामको भवति ।

(११५) क्रत्वर्थे इति । 'प्रयाजादयः' क्रत्वर्थाः, यतो हि तेषां प्रयोजकः 'क्रतुः' भवति । 'ज्योतिष्टोमादयः' पुरुषार्थाः, यतो हि तेषां प्रयोजकं 'फलं' भवति । प्रयोजकत्वं नाम अनुष्ठापकत्वम् ।

ज्योतिष्टोम और स्वर्ग । स्वर्ग फल है । उसको तो सभी पुरुष चाहते ही हैं । उसके साधन ज्योतिष्टोम को भी फल के लिए चाहता है । इसलिए ये दोनों पुरुषार्थ होते हैं । दधि आदि द्रव्य उभय रूप अर्थात् क्रत्वर्थ और पुरुषार्थ दोनों हैं । "दध्ना जुहुयात्" इस वाक्य में फल का श्रवण नहीं है । इस वाक्य को फल से संयुक्त न होने के कारण दधि केवल क्रत्वर्थ है । "दध्नेन्द्रियकामस्य०" इस वाक्य के द्वारा इन्द्रिय रूप फल को उद्देश्य करके दधि रूप गुण का विधान है । फल के लिए विधान होने के कारण पुरुषार्थ होता है । इसलिए यह दधि रूप द्रव्य पुरुषार्थ और क्रत्वर्थ दोनों है । महर्षि जैमिनि ने कहा भी है—"एक ही द्रव्यादि की उभयरूपता का नियामक वाक्यभेद है । संयोग (वाक्य) और उसका पृथक्त्व (भेद) एक ही द्रव्य के उभयार्थत्व का नियामक है ।

(११५) क्रत्वर्थ प्रयाजादि का क्रतु प्रयोजक होता है और पुरुषार्थ में फल प्रयोजक होता है अनुष्ठापक को ही प्रयोजक कहते हैं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(११६) विधिर्यदर्थं यदनुष्ठापयति स तत्र प्रयोजकः। दर्शादिविधिः स्वर्गार्थं दर्शादिकमनुष्ठापयतीति स्वर्गादिर्दर्शादौ प्रयोजकः। प्रयाजादिविधिः प्रयाजान् दर्शाद्यर्थम् अनुष्ठापयतीति दर्शादिः प्रयाजानां प्रयोजकः। दध्यानयनविधिः दध्यानयनमामिक्षार्थमनुष्ठापयति, न वाजिनार्थम्, आमिक्षार्थं दध्यानयनानुष्ठाने सति वाजिनस्य स्वतः सिद्धत्वात्, अत आमिक्षैव दध्यानयने प्रयोजिका, न वाजिनम्।

---

(११६) विधिरिति। यद् विधिवाक्यं यस्मै प्रयोजनाय यत् कर्म अनुष्ठापयति तत्प्रयोजनमेव तस्य कर्मणः प्रयोजकं भवति। यथा—'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति विधिः स्वर्गप्रयोजनाय दर्शादिकर्म अनुष्ठापयति तेन स्वर्गादिप्रयोजनमेव दर्शादिकर्मणां प्रयोजकमिति विज्ञेयम्। प्रयाद्यङ्गकर्मविधिः दर्शादिकर्म निष्पादनार्थं प्रयाजाद्यङ्गकर्म अनुष्ठापयति। तेन दर्शादिकर्म प्रयायाद्यङ्गकर्मणां प्रयोजकं भवति। 'तप्ते पयसि दध्यानयति' इति दध्यानयनविधिः 'आमिक्षार्थं' दध्यानयनम् अनुष्ठापयति। 'वाजिनार्थं' दध्यानयनं न अनुष्ठापयति। यतो हि आमिक्षार्थं दध्यानयने अनुष्ठिते सति 'वाजिनं' स्वतःसिद्धं भवति। अतः दध्यानयने

---

(११६) विधि-वाक्य जिस फल के लिए जिस यागादि के अनुष्ठान का बोध कराता है, वही उसका प्रयोजक होता है। दर्श आदि के विधायक विधि स्वर्ग आदि फल के लिए दर्शादि याग का अनुष्ठापक (बोधक) होता है। अतः स्वर्गादि फल दर्शादि याग का प्रयोजक होता है। प्रयाजादि के विधायक विधि दर्शादि के लिए प्रयाजों का बोधक होता है। अतः दर्शादि प्रयाजों का प्रयोजक है। दध्यानयन विधि आमिक्षा के लिये दध्यानयन के अनुष्ठान का बोध कराता है, वाजिन के लिए नहीं; क्योंकि आमिक्षा के लिए दध्यानयन के अनुष्ठान करने पर वाजिन स्वत सिद्ध हो जाता है। इसलिए आमिक्षा ही दध्यानयन की प्रयोजिका है,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"पुरोडाशकपालेन तुषानुपवपति" इति तुषोपवापाङ्गत्वेन पुरोडाशकपालं विधीयते, तथापि तुषोपवापः कपालस्य प्रयोजको न भवति, पुरोडाशार्थमुपात्तेनैव कपालेन तुषोपवापसिद्धेः। किन्तु पुरोडाश एव कपालस्य प्रयोजक इत्याद्यूह्यम् ॥

अथ क्रमनिरूपणम्

(११७) ननु विधिना साङ्गं प्रधानं कर्त्तव्यतया

'आमिक्षे'व प्रयोजिका अस्ति। वाजिनं न तत्र प्रयोजकम्। "पुरोडाशकपालेन तुषानुपवपति"—पुरोडाशकपालेन तुषाणाम् निष्कासनम् (उपवपनम्) कुर्यात्—इति वाक्येन पुरोडाशकपालं तुषोपवापाङ्गत्वेन विहितमस्ति। अर्थात् पुरोडाशकपालं तुषोपवापस्य अंगमस्ति। तथापि तुषापवपन, पुरोडाशकपालस्य प्रयोजकं न भवति। यतो हि पुरोडाशार्थं गृहीतेनव कपालेन तुषोपवापस्य सिद्धिर्भवति। अतः पुरोडाश एव कपालस्य प्रयोजकः इति ज्ञेयम्।

॥ इति प्रमेयादिनिरूपणम् ॥

अथ क्रमविचारः

(११७) नन्विति। अनुष्ठानक्रमस्य निरूपणात् पूर्वम् इयमाशंका भवति यत् विधिवाक्येन साङ्गं प्रधानं कर्मं कर्तव्यत्वेन प्रतिपाद्यते। तथासति

वाजिन नहीं। "पुरोडाशकपालेन०" इस विधि-वाक्य के द्वारा तुषोपवाप के अङ्गरूप से पुरोडाश-कपाल का विधान है, तथापि तुषोपवाप कपाल का प्रयोजक नहीं होता है; क्योंकि पुरोडाश के लिए विहित कपाल से ही तुषोपवाप की सिद्धि हो जाती है; किन्तु पुरोडाश ही कपाल का प्रयोजक होता है। अन्य स्थलों में भी इसी प्रकार ऊह कर लेना चाहिए।

(११७) शङ्का—विधि-वाक्यों के द्वारा अङ्गों के सहित प्रधान

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चोद्यते। तत्राङ्गानां प्रधानानां च कर्म्मणां बहुत्वात् क्रमेणानुष्ठानं वाच्यम्। तत्क्रमनियामकं प्रमाणं किम्? इति चेत्, न श्रुत्यादीनामेव क्रमनियामकत्वात्।

अंगकर्मणां प्रधानकर्मणां च बहुत्वात् तानि क्रमेणैव कर्तव्यानि भवेयुः। अतः तद्विषये क्रमनिर्धारणार्थं प्रमाणं किमिति शंका उदेति।

यागादि का कर्त्तव्य रूप से प्रतिपादन किया जाता है। उनमें अङ्ग तथा प्रधान कर्म अनेक हैं। इसलिए उन कर्मों का क्रम से अनुष्ठान-सम्पादन भी बताना चाहिए; अन्यथा कर्मों के अनुष्ठान की व्यवस्था ही नहीं बन पायेगी। उस क्रम का नियामक कौन प्रमाण है? तात्पर्य यह है कि क्रम के नियामक कोई प्रमाण उपलब्ध नहीं होता। इसलिए क्रम को बतलाने वाला कोई प्रमाण नहीं है।

समाधान—अङ्गों के अनुष्ठान में भी क्रम होता है और प्रधान के अनुष्ठान में भी क्रम होता है। कुछ लोग विततिविशेष को क्रम मानते हैं और कुछ लोग पौर्वापर्य को क्रम कहते हैं। पूर्वापरीभाव से ज्ञायमान पदार्थों के नैरन्तर्य अर्थात् व्यवधान-राहित्य को ही क्रम कहते हैं। म० म० चिन्नस्वामी शास्त्री जी ने भी एक पदार्थ प्रतियोगिक तथा अपर पदार्थानुयोगिक आनन्तर्य-विशेष को ही क्रम पदार्थ माना है। उक्त सभी मतों में अन्ततः नैरन्तर्य अर्थात् व्यवधानराहित्य ही अर्थ फलित होता है। वही क्रम पदार्थ है। क्रम मानने का अभिप्राय भी यही है कि एक पदार्थ के अनुष्ठान के पश्चात् दूसरे पदार्थ के अनुष्ठान में अधिक व्यवधान न मानना पड़े, जिससे अव्यवस्था की सम्भावना हो सके। क्रम से अनुष्ठान मान लेने पर सबका बराबर ही व्यवधान होता है। किसी का अधिक और किसी का कम नहीं। इस क्रम के प्रमापक प्रमाण भी बताये गये हैं। वे प्रमाण हैं—श्रुति, अर्थ, पाठ, स्थान, मुख्य तथा प्रवृत्ति। इन्हीं प्रमाणों के अनुसार क्रम समझा जाता है। अतः यह नहीं कहा जा सकता कि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(११८) तथा हि—"अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति" इत्यत्र क्त्वाश्रुत्या गृहपतिदीक्षाऽनन्तरं ब्रह्मदीक्षेति श्रौतक्रमः।

---

(११८) तथा होति। एवं शंका न कर्तव्या। श्रुत्यादीनि प्रमाणान्येव क्रमनिर्धारकाणि सन्ति। तथाहि—"अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति।" इत्यत्र 'क्त्वा'श्रुतिः अस्ति, तद्बलात् गृहपतेः दीक्षानन्तरं ब्रह्मणो दीक्षा कर्तव्येति श्रौतक्रमः। अर्थात् 'क्त्वा'श्रुतिप्रतिपादितः (निर्धारितः) क्रमः। बहुयजमानके सत्रे स्व-स्वासनेषूपविष्टेषु षोडशर्त्विक्षु यजमानासने उपविष्टो 'गृहपति'रित्युच्यते।

क्रम का नियामक कोई प्रमाण नहीं है। यागप्रयोगों को नियमित करने के लिए ही मीमांसादर्शन का आविर्भाव हुआ है। इसमें यागादि के सूक्ष्म तत्त्वों का सूक्ष्म विवेचन प्रस्तुत किया गया है।

(११८) "तथाहि" इत्यादि ग्रन्थ से क्रम बोधक सभी प्रमाणों का उदाहरण उपस्थित किया जा रहा है।

श्रुति-प्रमाण—"अध्वर्युर्गृहपति" इत्यादि-श्रुति का उदाहरण है। क्रम के बोधक वचनों को श्रुति कहते हैं। जिन वेद-वाक्यों में क्त्वा आदि क्रम-बोधक प्रत्ययों का प्रयोग देखा जाता है, उन वेद-वाक्यों में उन्हीं उन्हीं प्रत्ययों से क्रम का ज्ञान होता है; क्योंकि पूर्वकाल अर्थ में क्त्वाप्रत्यय का विधान है। पूर्वशब्द सम्बन्धी शब्द है। बिना उत्तर के पूर्वशब्द का व्यवहार ही नहीं है। इसलिए पूर्वशब्द से उत्तर शब्द का आक्षेप कर लिया जाता है। इस प्रकार पूर्वापरीभाव सम्पन्न होता है। "अध्वर्यु गृहपति (यजमान) को दीक्षित करके ब्रह्मा को दीक्षित करता है" इस वाक्य के मध्य में "दीक्षयित्वा" पद प्रयुक्त है और उसमें पूर्वकाल के वाचक क्त्वा प्रत्यय भी है। उस क्त्वा-श्रुति से ही यह निर्णय होता है कि पहले गृहपति की दीक्षा होगी और उसके बाद ब्रह्मा की दीक्षा होगी। यह जो दीक्षा का क्रम है, वह श्रौत-क्रम है; क्योंकि क्त्वा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(११९) "अग्निहोत्रं जुहोति यवागूं पचति" इत्यत्र यवागूपाकस्य होमार्थत्वेन पाकात् पूर्वं होमस्य कर्त्तुमशक्यत्वात् पाठक्रमं त्यक्त्वाऽऽर्थक्रमः स्वीकर्तव्यः। अर्थः प्रयोजनं होमादिरूपं तदर्थं क्रमः, अर्थक्रमः। तेन पूर्वं पाकः पश्चाद्धोमः ॥

---

(११९) अग्निहोत्रमिति। 'अग्निहोत्रं जुहोति', 'यवागूं पचति' इत्यत्र यवागूपाकः होमार्थः तेन यवागूपाकात् पूर्वम् अग्निहोत्रहोमस्य कर्तुमशक्यत्वात् श्रुतं 'पाठक्रमं' त्यक्त्वा 'अर्थक्रमः' स्वीकर्तव्यो भवति। 'अर्थो' नाम प्रयोजनम्। अत्र होमरूपं प्रयोजनम्, तदर्थं यः क्रमः स आर्थक्रमः। अतः पूर्वं यवागूपाकः तदनन्तरम् अग्निहोत्रहोमः। इत्थमनुष्ठानम् आर्थक्रमबलेन क्रियते।

प्रत्यय रूप श्रुति से ही इस क्रम का ज्ञान होता है। यह श्रुति दो प्रकार की है—केवल क्रम परक और क्रमविशिष्ट पदार्थ परक। "वषट्कर्तुः प्रथमभक्षः" दूसरे का उदाहरण समझना चाहिए।

अर्थ-प्रमाण—जिन स्थलों में प्रयोजन के अनुसार पदार्थों का निर्णय किया जाता है, वही अर्थ-क्रम कहलाता है।

(११९) "अग्निहोत्रं जुहोति" इस वाक्य से पहले अग्निहोत्र होम का विधान किया गया है। उसके बाद "यवागूं पचति" वाक्य से यवागू-पाक का विधान है। यवागू-पाक होम के लिए है अर्थात् होमानुष्ठान में वही द्रव्य है। इसलिए यवागू-पाक से पहले होम नहीं कर सकते हैं; क्योंकि उस समय द्रव्य ही नहीं है। पाठ-क्रम के अनुसार पहले अग्निहोत्र होम की प्राप्ति होने पर भी उस क्रम का परित्याग करके अर्थ (प्रयोजन) क्रम को स्वीकार किया गया है। होमादि रूप प्रयोजन के लिए जो क्रम है, वही अर्थ-क्रम है। इसलिए प्रयोजन के अनुसार पहले यवागू का पाक होता है और उसके बाद अग्निहोत्र होम का अनुष्ठान होता है।

Dr. Urmila Sharma Collection, Varanasi

CÇ0. In Public Domain, Digitizagtion by eGangotri

(१२०) "समिधो यजति" "तनूनपातं यजति" इत्यादौ विधिवाक्यपाठक्रमादेव समिदादियागानुष्ठानक्रमः ।

(१२१) तथा ज्योतिष्टोमे औपवसथ्यमहरारभ्य क्रमेणानुष्ठेयानाम् अग्नीषोमीयसवनीयानुबन्ध्यानां पशूनां त्रयाणां

---

(१२०) समिधो यजतीति । "समिधो यजति", "तनूनपात यजति" इत्यत्र विधिवाक्यानां यादृशेन क्रमेण पाठः, तेनैव क्रमेण समिदादियागानामनुष्ठानं कर्तव्यम्, अयं तावत् पाठक्रमः ।

(१२१) तथेति । तथा ज्योतिष्टोमयागे 'औपवसथ्य'दिनादारभ्य क्रमशः अनुष्ठेयानां (१) अग्निषोमीय—(२) सवनीय-(३) अनुबन्ध्यसंज्ञकानां त्रयाणां पशूनां 'साद्यस्क्र'संज्ञके सोमयागे 'सह पशून्-आलभते' इतिवाक्येन एकस्मिन्नेव काले अनुष्ठानं कर्तव्यमिति साहित्यम्प्रतीयते । तत् साहित्यं च सवनीयपशोः स्थाने विहितमस्ति । तत्र प्रकृतिभूतज्योतिष्टोमयागगतं क्रमं त्यक्त्वा सवनीयस्य पशोः स्थाने साहित्यविधानात् प्रथमं सवनीयस्य पशोः उपाकरणं, तदनन्तरमग्नीषोमीयस्य पशोरु-

---

(१२०) पाठ-प्रमाण—पदार्थ-बोधक वाक्यों के क्रम को पाठक्रम कहते हैं। जिस क्रम से वाक्य पढ़े हुए हैं, उनका उसी क्रम से अर्थ-ज्ञान भी होता है और उसी क्रम से उनका अनुष्ठान भी होना चाहिए। "समिधो यजति" इत्यादि वाक्यों से पाँच प्रयाजों का विधान है। इस विधि-वाक्य के पाठ के क्रम से ही समिदादि यागों का अनुष्ठान-क्रम माना जाता है। इसी को पाठ-क्रम कहते हैं। यह दो प्रकार का है—मन्त्र पाठ और ब्राह्मण पाठ।

(१२१) स्थान-प्रमाण—ज्योतिष्टोम याग में औपवसथ्यदिन से आरम्भ करके क्रमशः अग्नीषोमीय, सवनीय और आनुबन्ध्य नामक तीन पशु अर्थात् तीन पशु याग होते हैं। औपवसथ्य (सुत्या के पहले दिन) दिन में अग्नीषोमीय, सुत्याकाल में सवनीय और अन्तिम दिन आनुबन्ध्य का अनुष्ठान होता है। इस प्रकार ये तीनों पशुयाग भिन्न-भिन्न

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

साद्यस्काख्ये सोमयागे "सह पशूनालभते" इत्येकदाऽनुष्ठान-लक्षणं साहित्यं बोधितम्। तदपि सवनीयस्य स्थाने विहितम्। तत्र प्राकृतक्रमं परित्यज्य सवनीयस्य स्थाने

पाकरणं, तदनन्तरम् अनुबन्ध्यस्य पशोरुपाकरणम् इति क्रमः 'स्थान'-प्रमाणेन अवगन्तव्यः। सुत्यादिवसात् पूर्वतनो दिवसः 'औपवसथ्य' इत्युच्यते। मूले 'औपवसथ्यमहः' इत्युक्तम्। तस्यायमाशयः—यागीया देवता यागात् पूर्वस्मिन् दिने यजमानस्य गृह आगत्य निवसन्ति। तासां देवतानां स्थितिरूपो निवासः 'उपवसथ'शब्देनोच्यते। तद्योग्यो दिवसः स औपवसथ्यः। ज्योतिष्टोमयागस्य प्रधानदिने 'आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीय आग्नेयं सवनीयपशुमुपाकरोति।' इति वाक्येन आश्विनग्रहस्य ग्रहणानन्तरं सवनीयः पशुर्विहितोऽस्ति। तस्मात् पूर्वस्मिन् दिने (औपवसथ्ये दिने) दीक्षासम्बन्धितस्य (दैक्षस्य) पशोः (अग्नीषोमीयस्य) विधानमस्ति। सवनीयस्य पशोरनन्तरमनुबन्ध्यस्य पशोर्विधानमस्ति। किन्तु साद्यस्क्रसंज्ञकस्य सोमयागस्य एकदिनसाध्यत्वात् तत्र 'सहपशूनालभते' इतिवाक्येन पशुसाहित्यं यद्विहितमस्ति तत् तस्मिन् दिवसे क्रियमाणस्य सवनीयपशोः स्थाने कर्तव्यं भवति। पशूनां

प्रदेशों में विहित हैं। साद्यस्क्र एक सोमयागविशेष है। उनमें द्रव्य तथा देवता का निर्देश न होने के कारण वह अव्यक्त याग है और ज्योतिष्टोम का विकार है। इसलिए साद्यस्क्र में ये तीनों पशु याग अतिदेश से प्राप्त होते हैं। "सह पशूनालभते" इस विधि-वाक्य से समकालिक अनुष्ठान रूप साहित्य बोधित होता है। प्रधान की प्रत्यासत्ति तथा अपने-अपने स्थान के अतिक्रमण की समानता के कारण वह साहित्यानुष्ठान सवनीय स्थान में ही विहित है। सवनीय देश में अनुष्ठान मान लेने पर अग्नीषोमीय और अनुबन्ध्य का केवल अपने-अपने स्थान का अतिक्रमण होगा और इससे भिन्न किसी देश में अनुष्ठान मानने पर दो-दो स्थानों का अति-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

साहित्यावधानादादौ सवनीयपशोरुपाकरणे ततोऽग्नीषोमीयस्य ततोऽनूबन्ध्याया इति स्थानात् क्रमः। सुत्यादिवसात् पूर्वमहरौपवसथ्यम् ।

साहित्यं (सान्निध्यं) नाम पशुशरीरे स्थितानां सर्वेषामङ्गानां युगपत् अनुष्ठानम् । तत्र त्रयाणां पशूनां संस्कारः सवनीयपशोर्देशे (स्थाने) एव कर्तव्योऽस्ति । सवनीयपशोः स्थानं तु आश्विनग्रहस्य ग्रहणानन्तरः कालोऽस्ति । अतः आश्विनग्रहग्रहणानन्तरे काले अग्नीषोमीय–सवनीयाऽनुबन्ध्यसंज्ञकानां त्रयाणां पशूनाम् उपाकरणं (ज्वलदुल्मुकेन पर्यग्निकरणं) कर्तव्यम् । तत्र कतमस्य पशोरुपाकरणं प्रथमं कर्तव्यमिति सन्देहे उपाकरणस्य सवनीयस्थाने कर्तव्यत्वात् 'स्थानक्रम'प्रमाणेन प्रथमं सवनीयपशोरेव उपाकरणं कर्तव्यम् । तदनन्तरमितरयोः । अत्र प्रथमं औपवसथ्यस्य (अग्नीषोमीयस्य) ततः सवनीयस्य, ततः अनुबन्ध्यस्येत्येवं प्रकृतिगतक्रमस्य त्यागः कर्तव्य इति तात्पर्यम् ।

क्रमण करना पड़ेगा । अतः सवनीय देश में ही अनुष्ठान माना जाता है । प्रकृति-याग-सम्बन्धी क्रम का परित्याग करके सवनीय देश में साहित्य-सम्पादन होने के कारण पहले सवनीय पशु का तथा उसके पश्चात् आनुबन्ध्य पशु का उपाकरण होता है। स्थान-क्रम के सामर्थ्य से यह क्रम माना जाता है। उपस्थिति को स्थान कहते हैं। इसलिए अङ्गता-बोधक स्थान-प्रमाण से इस स्थान को भिन्न समझना चाहिए। जिस स्थान सोम का रस निकाला जाता है, वह सुत्या-दिवस कहलाता है और जिस स्थान पर सोम रस निकाला जाता है, वह सवनीय देश कहलाता है। सोम रस निकालने के समय जिस पशु का अनुष्ठान होता है, वह सवनीय पशु कहलाता है। इस दिन से पूर्व दिन को 'औपवसथ्य' दिन कहते हैं।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizaqtion by eGangotri

(१२२) तथा दर्शे सान्नाय्यधर्माणां शाखाच्छेदादीनां पूर्वम्, आग्नेयधर्माणां निर्वापादीनाञ्चानन्तरं प्रवृत्तावपि मुख्ययोराग्नेयसान्नाय्ययागयोर्मध्ये आग्नेययागस्य पूर्वमनुष्ठानान्मुख्ययागक्रमेणादावाग्नेयपुरोडाशस्य प्रयाजशेषाभिधारणम्, ततः पयसोऽभिधारणम् इति मुख्ययागक्रमादभिधारणक्रमः।

---

(१२२) तथेति। तथैव दर्शयागे शाखाच्छेदनादीनां सान्नाय्यधर्माणां पूर्वं निर्वापादीनामाग्नेयधर्माणां च अनन्तरं प्रवृत्तौ सत्यामपि मुख्ययोः आग्नेययाग-सान्नाय्ययागयोर्मध्ये आग्नेययागस्य पूर्वमनुष्ठानात् मुख्ययागक्रमेण प्रथमतः आग्नेयपुरोडाशस्य प्रयाजशेषाभिधारणम् (प्रयाजयागानुष्ठानं कृत्वा अवशिष्टस्य घृतस्य अभिधारणं क्षारणम्), तदनन्तरं दुग्धस्य अभिधारणमिति मुख्ययागक्रमात् अभिधारणक्रमो निर्धारितः।

---

(१२२) उसी प्रकार दर्शयाग में शाखाच्छेदनादि सान्नाय्य धर्मों की पहले ही प्रवृत्ति होती है और निर्वाप आदि आग्नेय धर्मों की उसके बाद प्रवृत्ति होती है; तथापि आग्नेय और सान्नाय्य याग मुख्य होते हैं और इन दोनों के बीच में आग्नेय याग का पहले अनुष्ठान होता है। इस लिए मुख्य याग के क्रम से पहले आग्नेय पुरोडाश के प्रयाजशेष का अभिधारण होता है। उसके बाद दूध का अभिधारण होता है। इस प्रकार मुख्य याग के क्रम से अभिधारण का क्रम माना जाता है। प्रधान के क्रम से जो अङ्गों के क्रम का आश्रयण किया जाता है, उसी को मुख्य क्रम कहते हैं। प्रधान क्रम के अनुसार अङ्गक्रम को मानने में कारण यह है कि सभी अङ्गों का अपने प्रधान के साथ तुल्य व्यवधान होता है और व्युत्क्रम से अनुष्ठान करने पर किसी अङ्ग का अत्यन्त अव्यवधान होगा और किसी अङ्ग का अत्यन्त व्यवधान होगा। इसको शास्त्रानुमोदित न होने के कारण यह समुचित नहीं है। अतः मुख्य क्रम से ही अनुष्ठान होता है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(१२३) तथा "सप्तदश प्राजापत्यान् पशूनालभते" इत्यत्र सप्तदशपशुद्रव्यकप्रजापतिदेवताकाः सप्तदश यागाः कर्त्तव्यत्वेन बोधिताः। तत्रोपाकरणाख्य आद्यः पदार्थः यतः कुतश्चिदारभ्य यत्र क्वचित् समापनीयः, नियोजनादिकन्तु येन क्रमेण उपाकरणं प्रवृत्तं तेनैव क्रमेण कर्त्तव्यम्। कथम्—

(१२३) तथेति। तथैव 'सप्तदश पशूनालभते' इत्यत्र सप्तदशपशुरूपद्रव्येण युक्ताः प्रजापतिदेवताका सप्तदशयागाः कर्तव्याः इति विधीयते। सप्तदश पशवः द्रव्याणि येषां ते सप्तदशपशुद्रव्यकाः। प्रजापतिर्देवता येषां ते प्रजापतिदेवताकाः। सप्तदशपशुद्रव्यकाश्च ते प्रजापतिदेवताकाश्च सप्तदशपशुद्रव्यकप्रजापतिदेवताकाः। ते च ते सप्तदशयागाश्च—सप्तदशपशूद्रव्यकप्रजापतिदेवताकसप्तदशयागाः। तत्र पशोः यूपे नियोजनाख्यः संस्कारः, एकः, तस्य प्रोक्षणाख्यः संस्कारोऽपरः, पिपासाशमनार्थं जलदानाख्यः अपरः संस्कारः, जुहूपात्रेण अञ्जनकरणाख्यः संस्कारः, पर्यग्निकरणाख्यः संस्कारः, विशसनाख्यः संस्कारः इत्यादिषु पशुसंस्कारेषु 'उपाकरणा'ख्यः प्रथमः संस्कारः अनुष्ठेयोऽस्ति। तत्र—आद्यः (प्रथमः) उपाकरणाख्यः पशुसंस्कारः यस्मात् कस्माच्चिदपि पशोरारभ्य यस्मिन् कस्मिन्नपि पशौ समापनीयः। किन्तु यूपबन्धनात्मकनियोजनादयः संस्कारास्तु येन क्रमेण उपाकरणमनुष्ठितं तेनैव क्रमेण अनुष्ठेयाः। कथमिति चेत्? तथाहि—अग्नी-

(१२३) प्रवृत्ति-प्रमाण—"सप्तदश प्राजापत्यान्" इस वाक्य से सत्रह-पशुद्रव्यक प्रजापति देवताक सत्रह यागों का अनुष्ठेय रूप से बताया गया है। उसमें उपाकरण नाम का पहला संस्कार जिस किसी पशु से आरम्भ करके जिस किसी पशु में समाप्त किया जा सकता है; परन्तु उपाकरण के पश्चात् होने वाले नियोजनादि संस्कार जिस क्रम से उपाकरण प्रवृत्ति (आरम्भ) हुआ है, उसी क्रम से करना होगा। इसके अनुष्ठान में स्वतन्त्रता नहीं है। इसका कारण यह है कि प्रकृति याग में

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकृतावग्नीषोमीयपशोरेकत्वेन उपाकरणमादौ कृत्वा द्वितीयक्षणे एव नियोजनं तृतीयक्षणे एव प्रोक्षणम्, व्यवधानप्रयोजकाभावात्। अत्र तु सप्तदशपशूनां सहानुष्ठेयत्ववचनात् प्रथमतो यत्र क्वचित् पशौ कृतमुपाकरणं स्वाश्रयकर्त्तव्यनियोजनाय षोडशभिः क्षणैः व्यवधानं सहते न त्वधिकम्। तत्रोपाकरणक्रमेण नियोजनं प्रथमपशावकृत्वा पश्वन्तरे नियोजनं कृत्वाऽनन्तरं प्रथमपशौ नियोजनकरणे

षोमीययागात्मकप्रकृतियागे अग्नीषोमीयाख्यः पशुरेक एवास्ति। तस्मात् एकस्य तस्य पशोः प्रथमतः उपाकरणं कृत्वा द्वितीयक्षणे एव नियोजनाख्यः संस्कारः, तृतीयक्षणे एव प्रोक्षणाख्यः संस्कारः क्रियते। यतोहि तत्र व्यत्यय (व्यवधान·) करणार्थं किमपि निमित्तं नास्ति। किन्तु अत्र प्राजापत्ययागात्मकविकृतियागे तु सप्तदशपशूनां सहानुष्ठेयत्व-वचनात् प्रथमतः यस्मिन् कस्मिश्चित् पशौ अनुष्ठितमुपाकरणं, कर्तव्यत्वेन स्वसम्बन्धितानां नियोजनादिसंस्काराणां कृते षोडशभिः क्षणैर्व्यवधानं सहते, नतु अधिकैः। नियोजनं न क्रियते अर्थात् पश्वन्तरेषु यदि उपाकरणक्रमेण प्रथमपशौ नियोजनं क्रियते चेत् षोडशक्षणाधिकनियोजनं कृत्वा तदनन्तरं प्रथमपशौ नियोजनं क्रियते चेत् षोडशक्षणाधिक-

---

एक ही अग्नीषोमीय पशु होता है। इसलिए प्रथम क्षण में उसका उपाकरण संस्कार करके द्वितीय क्षण में ही उसका नियोजन और तृतीय क्षण में ही प्रोक्षण सम्पन्न हो जाता है; क्योंकि व्यवधान के प्रयोजक कोई दूसरा पशु तो है नहीं। इसलिए क्रम का बाध नहीं होता। "सप्तदश प्राजापत्यान्०" स्थल में सत्रह पशुओं का एक ही साथ अनुष्ठान-बोधक वचन है। इसलिए पहले जिस किसी पशु में किया गया उपाकरण प्रथम-पशु-निमित्तक नियोजन के लिए सोलह क्षण के व्यवधान का सहन कर सकता है, अधिक क्षणों का नहीं, क्योंकि सोलह क्षण का व्यवधान स्वाभाविक है। उपाकरण संस्कार के क्रम से प्रथम पशु में नियोजन न

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

षोडशक्षणाधिकक्षणव्यवधानं शास्त्राननुमतमापद्यते, तन्निरासायोपाकरणं येन क्रमेण प्रवृत्तं तेनैव नियोजनादिकं कार्य्यमिति प्रवृत्तिक्रमः ।

क्षणव्यवधानं स्यात् तच्च शास्त्रानुमतं न भवेत् । अतः यस्य पशोः प्रथममुपाकरणं कृतं, तस्यैव उपकरणाऽव्यवहितोत्तरक्षणे (द्वितीयक्षणे) यूपबन्धनात्मकं नियोजनं कर्तव्यम् । उपाकरणसमये यः पशुः द्वितीयोऽस्ति, स एव नियोजनसमयेऽपि द्वितीय एव भाव्यः । तथैव तृतीयः चतुर्थः पञ्चमो भाव्यः । एवं सप्तदश पशुपर्यन्तं विज्ञेयम् । अयमभिप्रायः—सप्तदशपशूनामुपर्युक्त्याः सप्तसंस्काराः प्रथमतोऽनुष्ठितेन क्रमेणैव कर्तव्याः । तथाहि—सप्तसंख्याकेषु पशुसंस्कारेषु प्रथमः संस्कारः क्रमशः सर्वेषां पशूनां कर्तव्यः । ततः द्वितीयोऽपि संस्कारः तेनैव क्रमेण, ततः तृतीयोऽपि तेनैव क्रमेण । एवं सप्त-संस्काराः पूर्वानुष्ठितेन क्रमेणैव कर्तव्याः । एवं रीत्या प्रथमपशोरुपाकरणानन्तरम् अन्येषां षोडशपशूनामुपाकरणे षोडशक्षणात्मकः कालो व्यतीतो भवति । तदनन्तरं सप्तदशक्षणे प्रथमपशोरेव नियोजनं कर्तव्यम् । ततः पुनः इतरेषां पशूनां नियोजनसंस्कारकरणे षोडशक्षणा व्यतीता भवेयुः । तदनन्तरं सप्तदशक्षणे तस्यैव प्रथमपशोः तृतीयः संस्कारः कर्तव्यः । इत्थमेव अन्येऽपि संस्कराः षोडश-षोडशक्षणव्यवधानेन तस्य प्रथमपशोः कर्तव्याः । इयमेव रीतिः इतरेषां पशूनां कृते षोडशक्षणव्यवधानेन वर्तते । कस्यापि पशोः संस्कारः षोडशक्षणाधिकेन व्यवधानेन न कर्तव्य इत्यर्थः । अयं 'प्रवृत्ति'क्रमः अस्ति ।

करके दूसरे पशु में नियोजन किया । उसके बाद फिर प्रथम पशु में नियोजन करने पर सोलह क्षण से अधिक क्षण का व्यवधान समापन्न होगा, जो शास्त्रानुमोदित नहीं है । इस दोष को दूर करने के लिए जिस क्रम से उपाकरण संस्कार प्रवृत्त हुआ, उसी क्रम से नियोजनादि कार्य भी करना चाहिए- इसी को प्रवृत्ति-क्रम कहते हैं । अभिप्राय यह है कि उपाकरण की प्रवृत्ति के अनुसार ही नियोजनादि का अनुष्ठान करना चाहिए । उसमें अधिक क्षणों का व्यवधान नहीं होना चाहिए ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(१२४) इत्येवं श्रुति-अर्थ-पाठ-स्थान-मुख्य-प्रवृत्तिक्रमै-रेव कर्मानुष्ठानम् । अन्यथाऽनुष्ठाने वैगुण्यमित्यलम् ।

इति श्रीकृष्णयज्वकृता मीमांसा-
परिभाषा समाप्ता ।

---

(१२४) इत्येवमिति । एवं (१) श्रुतिक्रमः, (२) अर्थक्रमः, (३) पाठक्रमः, (४) स्थानक्रमः, (५) मुख्यक्रमः, (६) प्रवृत्तिक्रमश्च—इति प्रमाणैः विचार्यैव कर्मानुष्ठानं कर्तव्यम् । अविचार्य अनुष्ठाने कृते सति कर्मणि वैगुण्यं (अंगहानिः) भवेत् । विगुणं च कर्म फलाय नोपकल्पेतेति विज्ञेयम् ।

॥ इति मुसलगांवकरोपनामकश्रीगजाननशास्त्रिविरचिता
आशुबोधिनी व्याख्या सम्पूर्णा ॥

---

(१२४) इस प्रकार श्रुति, अर्थ, पाठ, स्थान, मुख्य तथा प्रवृत्ति रूप क्रम-बोधक प्रमाणों के द्वारा ही कर्मों का अनुष्ठान करना चाहिए। श्रुत्यादि प्रमाणों के द्वारा ज्ञात क्रम के वैपरीत्य होने पर यागादि से अनुष्ठान में वैगुण्य होगा। यागादि कर्मों में वैगुण्य होने पर अभिलषित फल की प्राप्ति नहीं होगी। अतः क्रम मानना अत्यन्त आवश्यक है।

श्रीवेङ्कटाचलाधीशं श्रियाध्यासितवक्षसम् ।
श्रितचेतनमन्दारं श्रीनिवासमहं भजे ॥ १ ॥

अञ्जनीनन्दनं धीरं जानकीशोकनाशनम् ।
दुःखानामपहर्त्तारं हनुमन्तमुपास्महे ॥ २ ॥

इस प्रकार सैतवगोत्रसमुद्भूत श्रीरामनन्दनसुतकमलनयनकृत 'मीमांसापरिभाषा' की "मञ्जु" नाम्नी व्याख्या समाप्त हुई।

॥ इति शम् ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नवीन ग्रन्थ

मध्यसिद्धान्तकौमुदी

'सीता' 'सावित्री' संस्कृत-हिन्दी व्याख्या नोट्स सहित

व्याख्याकार—पं० कालीकान्त झा

इसकी संस्कृत व्याख्या में 'सि० बालमनोरमा' टीका की तरह मूल ग्रन्थ के प्रतिपद की अतिसरल सुबोध शब्दों में व्याख्या की गयी तथा सूत्रार्थ, वार्तिकार्थ और परिभाषाओं के विवेचन उदाहरण-प्रत्युदाहरण दे-दे कर किये गये हैं। साथ में हिन्दी टीका और टीका के साथ विमर्शाख्य हिन्दी नोट्स हो जाने से सर्वसाधारण पाठक के लिए भी यह संस्करण सुलभ बोधगम्य हो गया है। संस्कृत टीका में प्रत्येक प्रयोग की साधनिका प्रश्नोत्तर लेखन-प्रकार की तरह की गयी है। अब परीक्षार्थियों को इस ग्रन्थ की प्रश्नोत्तरी की भी आवश्यकता नहीं पड़ेगी। ५०-००

मध्यसिद्धान्तकौमुदी

'सावित्री' हिन्दी व्याख्या नोट्स सहित

व्याख्याकार—पं० कालीकान्त झा

राष्ट्रभाषा प्रेमी छात्रों की तुष्टि के लिए तथा छात्र-सामान्य को अल्प व्यय में यह ग्रन्थ उपलब्ध हो सके, इसी उद्देश्य से यह लघु संस्करण प्रकाशित किया गया है। विद्वान् लेखक ने ग्रंथ के गूढार्थों का विमर्शाख्य नोट्स में सोदाहरण विवेचन किया है। यह इस संस्करण की प्रमुख विशेषता है। ३५-००

मृच्छकटिकम्

सविमर्श 'भावप्रकाशिका' संस्कृत-हिन्दीव्याख्या सहित

व्या०—डॉ० जयशंकरलाल त्रिपाठी

महाकवि शूद्रक विरचित यह नाटक प्रत्येक दृष्टि से अधिक गूढ है अतः संस्कृत नाटकों के सिद्धहस्त व्याख्याकार ने अपनी सरल सुबोध संस्कृत-हिंदी व्याख्या, पदपदार्थ, भावार्थ तथा सुविशद हिंदी विमर्श के द्वारा इसके दुरूहांश को सर्वथा दूर कर दिया है। इसकी संस्कृत व्याख्या से मूल ग्रंथ का प्रतिपद बड़ी सरलतापूर्वक समझा जा सकता है। समीक्षात्मक विमर्श परीक्षार्थी के लिए अधिक उपयोगी है। ग्रन्थ समालोचनात्मक प्रश्नोत्तर के लिए इसकी विशद भूमिका ही पर्याप्त है। ५५-००

प्राप्तिस्थान—कृष्णदास अकादमी, पो० बा० ११९८, वाराणसी-२२१००१

Dr. Urmila Sharma Collection, Varanasi